हः शस्तो ननु चंद्रग्रहः क्वचिदित्युक्तं ॥ विष्णुयामले ॥ देवीबोधं समारभ्य यावत्स्यान्नवमी तिथिः ॥ कृता तासु शुभे दीक्षा
सर्वाभीष्टफलप्रदा ॥ तथा ॥ बोधने चैव दुर्गायाः कालाकालं न शोधयेत् ॥ अशोकाख्याष्टमी यत्र रामाख्या नवमी तथा ॥
समयातन्त्रे ॥ युगाद्यायां जन्मदिने विवाहदिवसे तथा ॥ विषुवायनयोर्द्वन्द्वे नैव किंचिद्विचारयेत् ॥ अन्यत्रापि ॥ अय
ने विषुवे चैव युगाद्यासु तथैव च ॥ ग्रहणे च महातीर्थे न कालस्य विचारणा ॥ तुलसीनिकटे बिल्वमूले धात्रीतले तथा
अनादिदेवसान्निध्ये महाक्षेत्रे गवां गृहे ॥ देवीपूजादिने वापि नास्ति कालस्य निर्णयः ॥ योगिनीतंत्रे ॥ चंद्रग्रहे च या दीक्षा
या दीक्षा च न वारिणा ॥ जनकस्य तु या दीक्षा दारिद्र्यं सप्तजन्मसु ॥ रुद्रयामले तु ॥ न कुर्याच्छाक्तिकीं दीक्षां सुपरे क्तेविभाव
सौ ॥ न कुर्याद्वैष्णवीं दीक्षां तथा चंद्रमसो ग्रहे इत्युक्तं ॥ मुंडमालायां ॥ कालीतारामहाविद्याषोडशी भुवनेश्वरी ॥ भैरवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ता॰भ ॥ छिन्नमस्ता च विद्या धूमावती तथा ॥ बगलासिद्धविद्या च मातंगी कमलात्मिका ॥ एता एव महेशानि महाविद्याः प्रकीर्तिताः ॥ वाक्सि
॥ १२ ॥ द्ध्याद्यमेक्षास्ति नक्षत्रादिविचारणा ॥ कालादिशोधनं नास्ति साध्यादिदूषणं नहि ॥ तत्वसारसंहितायां ॥ तिथीं विनापि दीक्षायावि
शिष्टावसरं शृणु ॥ उद्यभे सङ्क्रमे सूर्यां तु सङ्क्रान्ते गडउपस्थिते ॥ तदज्ञाता यदा लब्धा सदीक्षावसरो महान् ॥ ग्रामे वा यदि वारण्ये क्षेत्रे वा
दिवसे निशि ॥ आगच्छति गुरुर्दैवाद्यदा दीक्षा तदा भवेत् ॥ तथा ॥ यदैवेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः ॥ न तिथिर्न व्रतं होमो न
स्नानं न जपक्रिया ॥ दीक्षायाः कारणं किंतु स्वेच्छावाप्ते तु सद्गुरौ ॥ तारामंत्रे तु विशेषो महोग्रताराकल्पे ॥ कृष्णपक्षस्य चाष्टम्यां
शुभे लग्ने शुभेक्षणे ॥ पूर्वभाद्रपदे शुक्लमित्रताराक्षसंयुते ॥ अथवा वाउराधायां रेवत्यां तु प्रशस्यते ॥ जानीयात् शोभनं काले
मेत्रस्य ग्रहणं प्रिये ॥ इषे वै वा विशेषेण कार्त्तिके च विशेषतः ॥ महाचीनक्रमे गौव न दोषो नीलशारदे ॥ वीरचूडामणौ ॥ नक्षत्रारि
र्नतारा च न राशिश्च ऋक्शोधनं ॥ न क्षणं न धनं चक्रं न मासनियमस्तथा ॥ न पक्षतिथिनक्षत्रं त्याज्यो वारो कुजार्कजौ ॥ इति काल
निर्णयः ॥ अथ देशाः ॥ यामले ॥ गङ्गापतीर्थे कुरुक्षेत्रे देवीपीठचतुष्टये ॥ प्रयागे श्रीगिरौ काश्यां कालाकालं न शोधयेत् ॥ योगि
नीतन्त्रे ॥ गयायां भास्करक्षेत्रे विरजे चंडपर्वते ॥ वङ्गले च मतंगे च तथा कन्याश्रमे शुभे ॥ नरक्रीयाज्ञानोदीक्षां तीर्थेष्वेतेषु पा ॥ राम ॥
र्वति ॥ ॥ अथ दीक्षामाहात्म्यं ॥ वाराहीतन्त्रे ॥ अदीक्षितेन मरणं रौरवान्न निवर्त्तते ॥ तस्माद्दीक्षां प्रकुर्वीत तंत्रमार्गिमतां ॥ १२ ॥
त्रिकाः ॥ मृडानीतंत्रे ॥ मायया मोहितो यस्तु किल्विषैः परिवेष्टितः ॥ सदीक्षामवमन्येत नारकी भविता हि सः ॥ अन्यत्रापि

21

दीक्षाहीनं कृतं कर्म कृतं भस्मनि तुल्यवत् ॥ अनीश्वरस्य मर्त्यस्य नास्ति त्राता यथाऽपि वि ॥ तथा दीक्षाविहीनस्य स्वाम्यमुत्र परत्र न ॥ महाहारके तं
त्रे ॥ अथ दीक्षाविहीनो यो वर्त्तते ऽविपापकृत् ॥ मोहांधकारे नरके गर्त्ते पतति दुःखितः ॥ दीक्षाहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ॥ य
द्यत्कुरुते मोहात्तत्तस्य फलभाग्भवेत् ॥ रुद्रयामले ॥ अदीक्षितेन वा मोहात्कृतं सर्वमनर्थकं ॥ पशुयोनिमवाप्नोति दीक्षाहीनोऽ
शुचिर्नरः ॥ वाराहीतंत्रे ॥ दीक्षामूलं जगत्सर्वं दीक्षा हि परमं तपः ॥ दीक्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे नरः ॥ कोटिजन्मकृतं या
पं ज्ञानाज्ञानकृतं च यत् ॥ दीक्षाग्रहणमात्रेण पलायेत न संशयः ॥ ततो वांछितसिद्धिः स्याद्धनधान्यसमृद्धिदा ॥ अंते देवालयं
यांति दिव्यभोगसमन्वितः ॥ महाहारकेतंत्रे ॥ दीयते ज्ञानमत्यंतं क्षीयते पापसंचयः ॥ तस्माद्दीक्षेति संप्रोक्ता वांछितार्थप्रसा
धिनी ॥ ज्ञानं दिव्यं यतो दद्यात्कुर्यात्पापक्षयं नृणां ॥ तेन दीक्षेति लोकेऽस्मिन् कीर्तिता तंत्रपारगैः ॥ ब्रह्महत्या सुरापानं स्वर्ण
स्तेयादिपातकान् ॥ उपपातकलक्षाणि हंति दीक्षाश्रयान्नरः ॥ दीक्षितो ब्राह्मणो याति ब्रह्मलोकमनोमयं ॥ इन्द्रलोकं क्षत्रियो
पि प्राजापत्यं तथा विशः ॥ यांति गंधर्वनगरं शूद्रो दीक्षाप्रभावतः ॥ चतुर्णामेव वर्णानां मतो दीक्षा प्रशस्यते ॥ वैशंपायनसं
हितायां ॥ मनसा कर्मणा वाचा यत्पापं समुपार्जितं ॥ तेषां विश्लेषकरणी परमज्ञानदायते ॥ तस्माद्दीक्षेति लोकेऽस्मिन् गीय
ते शास्त्रवेदकैः ॥ तंत्रांतरे ॥ पुस्तके लिखितो मंत्रो येन सुन्दरि जप्यते ॥ न तस्य जायते सिद्धिर्हानिरेव पदे पदे ॥ तंत्रराजे ॥ आ
चार्यादनभिप्राप्तः प्राप्तश्चादत्तदक्षिणाः ॥ सततं जप्यमानोऽपि मंत्रः सिद्धिं न गच्छति ॥ द्विजानामनुपनीतानां स्वकर्माध्ययना

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ता॰ म ॥
॥ १३ ॥

दिषु ॥ यथाधिकारो नास्तीह स्याच्चोपनयनादिषु ॥ तथाचादीक्षितानां च मंत्रदेवार्चनादिषु ॥ नाधिकारोस्त्यतः कुर्यादात्मानं शिव
संस्कृतं ॥ तंत्रांतरे ॥ यदृच्छया श्रुतं वापि प्रछन्नेन छलेन वा ॥ पत्रेक्षितं च गाथा वनृ प्रजप्तमपि निष्फलं ॥ प्रयोगसारे ॥ स्नेहा
ल्लोभतो वापि यद्दिष्टज्ञानमदीक्षया ॥ तस्मिन् गुरौ सशिष्ये च देवताशापमापतेत् ॥ अन्यच्चापि ॥ गुरुमुखाः क्रियाः सर्वा
भुक्तिमुक्तिफलप्रदाः ॥ तस्मान्मान्यो गुरुर्नित्यमस्त्यर्थं तु समाहितः ॥ गुर्वनुक्ताः क्रियाः सर्वा निष्फलाः स्युर्यथा ध्रुवं ॥ प्रपंचे ॥ कृ
ते श्रुत्युक्तमार्गः स्यात्त्रेतायां स्मृतिसंभवः ॥ द्वापरे स्यात्पुराणोक्तः कलावागमसंभवः ॥ अशुद्धाः शूद्रकल्पाहि ब्राह्मणाः कलिसं
भवाः ॥ तेषामागममार्गे स्यात्सिद्धिर्नश्रौतवर्त्मना ॥ तस्मादवश्यकी दीक्षा पूर्वोक्ताऽनेकवाक्यतः ॥ सम्यक्शिवार्यसाध्यारिराशि
चक्रादिभेदतः ॥ कुलार्णवे ॥ अदीक्षिता ये कुर्वंति जपपूजादिकाः क्रियाः ॥ न फलंति प्रिये तेषां शिलायामुप्तबीजवत् ॥ ॥
अथ दीक्षोपयुक्तमंडपार्थं भूमिपरीक्षा ॥ यामले ॥ प्रवस्यांतं च गंभीरं दीर्घतोयाशयं सरः ॥ अग्निशालाग्निहोत्रीणां पुराणस्था
नं परिष्कृतं ॥ द्विजानां सत्कृतानां वा आश्रयः स्वाश्रमोथवा ॥ दीक्षायामतिशस्तानि स्थानान्येतानि पार्वति ॥ नवदीक्षां प्रकुर्वी
त निकुंजे गहने वने ॥ द्विसीम्नि च महारण्ये मातृर्यमृगसेविते ॥ तंत्रांतरे ॥ महानदीनां तीराणि गंगासागरसंगमः ॥ प्रशस्त ॥ राम ॥
स्तानि च तीर्थानि क्षेत्राणि चाश्रमा अपि ॥ अरण्यानि च सर्वाणि पर्वताः सकला अपि ॥ सनिर्झरोपपगिरि देवतायतनान्य ॥ १३ ॥
पि ॥ महाकपिलपंचरात्रे ॥ तत्र भूमिं परीक्ष्येत वास्तुज्ञानविशारदः ॥ स्फुटिता च सशल्या च वल्मीकरोहिणी तथा ॥ दूरतः प

22

शिवज्ञा भूः कर्तुराशु धनापहा ॥ स्फुटिता मरणं कुर्यादूषरा धननाशिनी ॥ सशल्या क्लेशदा नित्यं विषमा शत्रुतो भया ॥ ईशकोणप्लवा सा च
कर्तुः श्रीदा सुनिश्चितं ॥ पूर्वप्लवा वृद्धिकरी वरदा तूत्तरप्लवा ॥ दक्षिणाप्लवा या भूमिर्नित्यं मृत्युभयप्रदा ॥ गृहक्षयकरी सा च भूमिर्या
नैर्ऋतप्लवा ॥ धनहानिकरी पृथ्वी कीर्तिता वरुणाप्लवा ॥ वातप्लवा तथा भूमिर्नित्यमुद्वेगकारिणी ॥ गोतमीयतन्त्रे ॥ भूमेः परिग्रहं कु
र्याद्यावदायतनं भवेत् ॥ शुक्ला मृत्स्ना च या भूमिर्ब्राह्मणी सा परिकीर्तिता ॥ क्षत्रिया रक्तमृत्स्ना च हरिद्वैश्या प्रकीर्तिता ॥ कृष्णा भूमि
र्भवेच्छूद्रा चतुर्धा परिकीर्तिता ॥ महाकपिलपञ्चरात्रे ॥ ब्राह्मणी भूः कुशोपेता क्षत्रिया स्याच्छराकुला ॥ कुशकाशाकुला वैश्या शू
द्रा सर्वतृणाकुला ॥ गोतमीयतन्त्रे ॥ ब्राह्मी सर्वार्थसिद्धिः स्यात् क्षत्रिया राज्यदा तथा ॥ धनधान्यकरी वैश्या शूद्रा तु निन्दिता सुते
प्रयोगसारे ॥ वितस्तिमात्रविस्तारं निर्माय विवरं भुवि ॥ निःक्षिपेत्तां मृदं तस्मिन् तासु शिष्टासु शोभने ॥ समासु मध्यमं वि
द्यान्न्यूनास्वधमसुव्रते ॥ गोतमीयतन्त्रे ॥ ततो भूमिं परीक्ष्येत वास्तुज्ञानविशारदः ॥ शल्यादिशोधनं कुर्यात्तुषांगारादि दूर
येत् ॥ एतदकरणे मन्त्री न किंचित्फलमाप्नुयात् ॥ महाकपिलपञ्चरात्रे ॥ खन्यमाने जलं यावच्छल्यदोषो विनश्यति ॥ दूर
नीचस्थितं वारि खनितुं नैव शक्यते ॥ पञ्चहस्तं प्रखातव्यं शल्यदोषोपशान्तये ॥ शल्योद्धारं ततः कृत्वा पूरयेत्तु समं यथा ॥
तस्यां भूमौ वास्तुयागं कृत्वा मंडपं कुर्यात् ॥ ॥ अथ वास्तुयागः ॥ यमः ॥ गृहादिकरणे यत्र नार्चितो वास्तुदेवतः ॥ तत्र भूतं भ
वेत्सर्वं रक्षोपिशाचादिभिर्हतं ॥ तस्माद्वास्त्वर्चनं सम्यक्कार्यं सम्पदमीप्सुभिः ॥ महाकपिलपञ्चरात्रे ॥ भूमेः परिग्रहं पूर्वं शिला

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ता॰ भ ॥ नोक्ष्थापनेनतथा ॥ जलाधारंगृहार्थंवर्जयेद्वास्तुविशेषतः ॥ अपरेष्वपिकार्येषुयागहोमादिकेषुच ॥ वास्तुमंडलकंकुर्यात्सूत्रयि
॥ १५ ॥ त्वासमंगरुत् ॥ शारदायां ॥ राक्षसंवास्तुनामानंहत्वाधिष्ठायतत्ततुं ॥ स्थितानाग्निपंचाशद्देवास्तेभ्यःपूर्वंबलिंहरेत् ॥ सोमशंभु ॥
आकुंचितकरंवास्तुमुत्तानमसुराकृतं ॥ स्मरेन्मूर्जास्तुकुर्यादिनिवेशोत्वधराननं ॥ जानुनीकूर्परासक्तेदिशिवातहुताश
योः ॥ पैत्र्यांपादपुटेरौद्र्यांशिरोस्यहृदयेञ्जलिः ॥ गौतमीयतन्त्रे ॥ विप्राशिषावेदघोषैर्मंगलाचारपूर्वकं ॥ वास्तोर्मंडल
कंकुर्याद्यथाशोभंयथाविधि ॥ पूर्वापरायतंसूत्रंविन्यसेद्धस्तमानतः ॥ तन्मध्येकिंचिदालम्ब्यमत्स्यौद्वौपरितोलिखेत् ॥
तयोर्मध्येस्थितंसूत्रंविन्यसेद्दक्षिणोत्तरं ॥ ताभ्यांताभ्यांतथाताभ्यांकोणेषुमकरान्लिखेत् ॥ मत्स्यमध्येस्थितान्प्राणितत्रसू
त्राणिपातयेत् ॥ चतुरस्रंभवेत्तत्रचतुःकोष्ठसमन्वितं ॥ तस्यतद्विभजेन्मन्त्रीचतुःषष्टिपदंयथा ॥ ईशानाद्राक्षसंयावद्या
वदग्नेःप्रभंजनः ॥ एवंसूत्रद्वयंदद्यात्कर्णसूत्रंसमाहितः ॥ ब्रह्माणंपूजयेदादौमध्यकोष्ठेचतुष्टये ॥ दिक्चतुःकेचपू
र्वादियजेदार्यमनंतरं ॥ विवस्वंततोमित्रंमहीधरमनंतरं ॥ कोणार्द्धकोष्ठद्वंद्वेषुवत्सादिपुरतःपुनः ॥ सावित्रंसविता
रंचशक्रमिन्द्रजयंपुनः ॥ रुद्रंरुद्रजयंविद्वानापंवाप्यापवत्सकं ॥ तत्कर्णसूत्रोभयतकोष्ठद्वंद्वेषुदेशिकः ॥ सर्वग्रहंवा ॥ रा ॥
र्यमणंजंभकंपिलिपिच्छकं ॥ चरकींचविदारींचपूतनामर्चयेत्क्रमात् ॥ अर्चयेद्दिक्षुपूर्वादिसार्द्धयंत्रपदेष्विमान् ॥ अ ॥ १४ ॥
ष्टाविष्टविभागेनदेवतादेशिकोत्तमः ॥ क्रमादीशानपर्जन्यौजयंतःशक्रभास्करौ ॥ सत्योभृशांतरीक्षौचदिशिप्राच्यांच

23

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थिताः ॥ अग्निः पूषा च वितथो यमश्च गृहरक्षकः ॥ गंधर्वो भृंगराजश्च मृगो दक्षिणादिगताः ॥ निर्ऋतिर्दौवारिकश्च सुग्रीववरुणो
ततः ॥ पुष्पदंतो वरोशोषरोगौ प्रत्यग्दिशि स्थिताः ॥ वायुर्नागश्च मुख्यश्च सोमो भल्लाटएव च ॥ अर्गलाख्योदितिर्दितीउत्तरस्यादि
शिस्थिताः ॥ महाकपिलपंचरात्रे तु ॥ गृहप्रासादकूपानां मंडपस्य जलस्य च ॥ वास्तुमंडलकं कार्यमष्टहस्तं तु नापरमित्युक्तं
ईशानशिवस्तु ॥ पूज्याश्चतुःषष्टिपदे पुविप्रैरेकोनराशीतिपदे नृपाद्यैरित्युक्तवान् ॥ हयशीर्षपंचरात्रे ॥ एकाशीतिपदं वा
स्तु गृहकर्मणि शस्यते ॥ चतुःषष्टिपदं वास्तु प्रासादेषु प्रशस्यते ॥ महाकपिलपंचरात्रे तु ॥ प्रासादार्थे चतुःषष्टिरेकाशीति
गृहे तथेत्युक्तं ॥ ब्रह्माणमिति कोष्टचतुष्टये यकाकारतया मार्जिते ॥ एकाशीतिपदपक्षे तु सोमशंभुः ॥ मध्ये नवपदे ब्रह्माणे
पाल्कपदिकाः स्मृताः ॥ षट्पदास्तु मरीच्याद्या दिक्षु पूर्वादिषु क्रमात् ॥ तत्राष्टदलकमलमपि लिखेत् ॥ तदुक्तं महाकपिलपं
चरात्रे ॥ पंचविंशपदे मध्ये ब्रह्माणां स्वच्छयेन कजमिति ॥ कादिमते ॥ सर्वमध्ये यजेत्तस्य क ब्रह्माणां कमलासनं ॥ हेमाभं च चतु
र्वक्त्रं वेदाध्ययनशालिनं ॥ पूजा च पंचभीरजोभिः पदानां पूरणं कृत्वा कार्या ॥ तदुक्तं गौतमीयतंत्रे ॥ उक्तानामिति देवानां प
दान्या पूर्यं पंचभिः ॥ रजोभिस्तत्र थोतेभ्यः पायसान्नैर्बलिं हरेत् ॥ पायसैर्मधुरैः सर्वान्संयजेत्मधुरान्वितैः ॥ तत्तद्वर्णमति
मान् पूजयेद्दोषशांतये ॥ दिव्यसारस्वते ॥ मध्ये पदानां नवकं मार्जयित्वा प्रपूजयेत् ॥ सितेन रजसा भूयस्तद्दिक्षु चतसृष्वपि
षट्कं संमार्जयेद्रजसा रक्तेन परिपूरयेत् ॥ शिष्टानि च पदान्यत्र यथास्थानं प्रकल्पयेत् ॥ विदिक्त्रयाणि तन्मध्ये ब्रह्माणां संप्रपूज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ना॰भ॥ येत्॥ ब्रह्मपूजाविधिर्यथा॥ कर्णिकायां मण्डूकादिपरतत्त्वान्तं केसरेषु मध्ये वाणिमादि सर्वसिद्ध्यन्तां नव पीठशक्तीः सर्वज्ञान
॥ १५॥ क्रियाव्यक्तकमलासनाय योगपीठाय नमः॥ इति मध्ये पीठं संपूज्य॥ तत्र यथोक्तब्रह्माणमावाह्य नमो ब्रह्मणा इति मंत्रेणा
पंचोपचारादिभिर्ब्रह्माणं पूजयेत्॥ ततस्तत्परिवारत्वेन अन्यानपि पूजये॥ तेषां ध्यानं तंत्रान्तरे॥ उक्तानां सर्वदेवानां स्व
रूपं च निगद्यते॥ अक्षमालास्रुवं दक्षे वामे दंडकमंडलुं॥ दधानमष्टनयनं यन्मध्ये वृजासनं॥ सर्वे चतुर्भुजा देवा वाम
देहे व्यवस्थिताः॥ कृतांजलिपुटा ऊर्ध्वखड्गखेटकपाणयः॥ ब्रह्माणं संनिरीक्ष्यन्ते तद्वक्त्राभिमुखाश्च ते॥ स्वस्वस्थानस्थिता
श्चैव साधारणमुदाहृतं॥ मरीचिः श्वेतवर्णः स्याद्विवस्वान्रक्तवर्णकः॥ शांतकुंभनिभो मित्रः कृष्णवर्णस्तु भूधरः॥ स
विता नीलवर्णाभः सावित्रो धूम्रविग्रहः॥ इन्द्रश्चारुणवर्णाभ इन्द्रजयस्तथा॥ रुद्रः प्रवालसदृशः पीतो रुद्रजय
स्तथा॥ आपो गोक्षीरधवल आपवत्सो जयाद्युतिः॥ ईशानः क्षीरधवलः पर्जन्यो जनसंनिभः॥ जयंतो जनसंकाशो महेंद्र
श्यामलद्युतिः॥ आदित्यो रक्तवर्णः स्यात्सत्यकश्चित्रवर्णकः॥ भृशो वंधूकपुष्पाभः कुंभेदाश्चांतरीक्षकः॥ उद्यद्दिनकराभो
ग्निः पूषा रक्ताङ्कसंनिभः॥ वितथश्चेन्द्रचापाभो विद्युद्वर्णो गृहरक्षकः॥ यमश्चांजनसंकाशो गंधर्वः पद्मरागवत्॥ भृग ॥ ल्म॥
राजस्तु भृंगाभो मृगो जीमूतसंनिभ॥ निऋतिः पावकाभश्च पीतो दौवारिकः स्मृतः॥ सुग्रीवो नीलकंठाभश्चन्द्राभः पुष्पदं ॥ १५॥
तकः॥ वरुणः स्फटिकाभो गोभृंगाभश्चांवरो मतः॥ शोषश्चोत्पलसंकाशो रोगश्चैवेन्द्रनीलवत्॥ वायुः कृष्णाभ्रवर्णः स्या

24

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्नागः शंखेन्दुसंनिभः ॥ भरुवा मौक्तिकसंकाशो भस्माटः श्वेतपद्मवत् ॥ सोमः स्फटिकसंकाशो ऽर्गलोरक्तोऽनलद्युतिः ॥ दितिकु
न्देन्दुधवला कपिला वादितिः स्मृता ॥ वरकी शंखसदृशी विदारी पावकद्युतिः ॥ पूतना हिमसंकाशो मेघाभा पिलपिच्छकी
खड्गं वपानपात्रं वकुरिकां कर्त्तरी तथा ॥ दधाना भीमरूपास्ता राक्षस्यः परिकीर्त्तिताः ॥ सितो रक्तश्च पीतश्च कृष्णाः स्कंदादि
काग्रहाः ॥ वज्रशक्तिं वरखड्गं वपाशैर्वविकृतानना: ॥ दधाना भीषणाः प्रोक्ता ग्रहाः स्कंदादिकाश्च ते ॥ अत्र प्रतिदेवतं वलि
द्रव्यभेदा मंत्राश्चोक्ताः ॥ महाकपिलपंचरात्रे गौतमीयतंत्रे ॥ पायसोदनलाजैश्च युक्तं धूपप्रसूनकैः ॥ अन्नादिभिश्च संयु
क्तं माषभक्तादिमंडितं ॥ गृहाणेमं वलिं ब्रह्मन् वास्तुदोषप्रशान्तये ॥ गंधादिशर्करायूपपायसोपरिसंयुतं ॥ आर्य्यकाख्य
गृहाणेमं सर्व्वदोषप्रशान्तये ॥ चंदनार्घ्यर्चितं नाथ कर्पूरागुरुमंडितं ॥ विवस्वन् वै गृहाणेमं सर्व्वदोषप्रशान्तये ॥ सक्तुकं या
वकं नाथ पुष्पादिसुसमन्वितं ॥ गृहाणेमं वलिं हर्य्यम्नि शान्तिं प्रयच्छ मे ॥ माषौदनं समांसं च गंधादिक्षीरसंयुतं ॥ गृहाणेमं महीभृत्त्वं
सर्व्वदोषप्रशान्तये ॥ एवं मध्ये तु संपूज्य ईशानादि वलिं हरेत् ॥ एतेन पूजाया माग्नेयादिक्रमेपि वला वीशानादिक्रमः ॥ अन्यत्रापि ॥
ईशानादिदक्षिणावर्त्ती वलिः सामान्यभाषितः ॥ सर्व्वेषां खलु वास्तूनां विशेषः पदनिर्णयः ॥ क्वचित्तु पूजापि तथैवोक्ता ॥ ईशकोणादि
प्रसुरान् पूजयेच्च विधानतः ॥ तथा ॥ ईशानादिचतुःकोणसंस्थितान् पूजयेद्बुध इति ॥ तथा ॥ क्षीरखंडसमायुक्तं पुष्पादिभिरलंकृ
तं ॥ गृहाणेमं वलिं ह्यय माप शान्तिं प्रयच्छ मे ॥ दधीदंपुडसंमिश्रं गंधादिभिः सुसंयुतं ॥ गृहाणेमं वलिं वत्स विघ्नं च प्रशान्तये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

|| ना.भ || पुष्पादिकृशपानीयंशर्करागुरुवासितं ॥ सावित्रवैगृहाशोमंशांतिमंत्रप्रयछमे ॥ पिष्टकंसगुडंनाथरक्तगंधादिशोभितं ॥ गृहा
|| १६ || शोमंबलिसूर्यविघ्नमंत्रप्रणाशयः ॥ शीनमन्नंतथापुष्पंकुंकुमादिसमन्वितं ॥ गृहाशोमंबलिंहृयंशाकदेवनमोस्तुते ॥ ओदनं
घृतसंयुक्तंवस्त्रगन्धादिमंडितः ॥ गृहाशोमंबलिंहृयमिंद्रजयनमोस्तुते ॥ पक्वापक्वमिदंमांसंवस्त्रपुष्पादिसंयुतं ॥ गृहाशो
मंबलिंहृयरुद्रदेवनमामिहं ॥ समांसंघृतसंपक्वगंधपुष्पादिसंयुतं ॥ गृहाशोमंबलिंरुद्रजयस्वामिनमोस्तुते ॥ रक्तपुष्पं
समांसंवैरक्तवस्त्रादिसंयुतं ॥ विरूपाक्षवैगृहाशोमरक्षोविघ्नविनाशय ॥ पित्तरक्तास्थिसंयुक्तंरक्तगंधादिमंडितं ॥ गृहाशोम
मूत्रनेत्वंरक्षोविघ्नविनाशयः ॥ सघृतंमाषभक्तंवरक्तगंधादिसंयुतं ॥ बलिंगृहाशार्वत्वंरक्षोविघ्नविनाशये ॥ मांसपुष्पा
दिसंयुक्तंमाषभक्तोपसंयुतः ॥ गृहाशोमबलिस्कंदरक्षोविघ्नविनाशयः ॥ श्वमांसंपिष्टकैर्युक्तंपक्वमांसोदकान्वितं ॥ अर्यमन्
वैगृहाशोमंसर्वविघ्नविनाशय ॥ रक्तमांसोदनंमन्नंगंधधूपसमन्वितं ॥ जंभकत्वंगृहाशोमंरक्षोविघ्नविनाशय ॥ छागक
गान्वितंमांसंवस्त्रगंधादिसंयुतं ॥ पिलिपिछगृहाशोमंरक्षोविघ्नविनाशय ॥ घृतेनसाधितंमांसंवस्त्रगंधादिसंयुतं ॥ चरकि
त्वंगृहाशोमंरक्षोविघ्नविनाशय ॥ सघृतंवाक्षतंतन्त्रवस्त्रगंधाद्यलंकृतं ॥ गृहाशोमंबलिंत्वीशावास्तुदोषापहारकं ॥ उत्पलं || राम ||
पायसैर्युक्तंवस्त्रादिकसमन्वितं ॥ गृहाशोमंबलिंहृयंमेघराजनमोस्तुते ॥ पंचहस्तंसुपीतंवध्वजंभक्तादिमंडितं ॥ गृहाशो || १६ ||
मंबलिंहृयंजिष्णुभूतनमोस्तुते ॥ ओदनंघृतसंपूर्णंपंचरत्नादिमंडितं ॥ गृहाशोमंबलिंहृयंदेवराजनमोस्तुते ॥ रक्तपुष्प

25

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेभक्ष्यैस्रग्गंधादिभिर्युतं ॥ गृह्णातोमं वलिं ह्यं भास्कराय नमोस्तुते ॥ वितानं धूम्रवर्णाभं गंधादिकसुशोभितं ॥ रक्तपुष्पं गृह्ण
तोमं वलिं सत्यनमोस्तुते ॥ इदं तु मांसभक्ष्यं वैवस्त्रगंधादिपूजितं ॥ गृह्णातोमं पूषवलिं वास्तुदोषंविनाशय: ॥ इदं तु साद्वलं मांसं
नैवेद्यादिसुसंयुतं ॥ गृह्णातोम वलिं ह्यं व्योम शांति प्रयछमे ॥ सुवर्णपिष्टकं चाथ वस्त्रगंधादिभिर्युतं ॥ घृताक्तं गृह्णातोमं स
वजिह्व नमोस्तुते ॥ क्षीरलाजसमायुक्तं गंधपुष्पादिसंयुतं ॥ गृह्णातोमं वलिं ह्यं पूषदेव नमोस्तुते ॥ मांसौदनं गंधमाल्ययुतं व
स्त्रादिभूषितं ॥ वितथे मं वलिं गृह्ण वास्तुदोषं विनाशय ॥ मत्स्यमांसयुतं भक्ष्यं गंधपुष्पाद्यलंकृतं ॥ यमराज गृह्णातोमं वलिं शां
तिं प्रयछमे ॥ पक्वमांसौदनं नवनीतं वस्त्रादिमंडितं ॥ प्रीतिकरं गृह्णातोमं गृहरक्ष नमोस्तुते ॥ नानागंधसमायुक्तं रक्तधूपा
दिभिर्युतं ॥ वलिं गृह्णातो गंधर्व सर्वदोषप्रणाशय ॥ इमां तु शाकुनीं जिह्वामाषभक्तोपरिस्थितां ॥ गृह्णातोम भृंगराज वलिं शांतिं
प्रयछमे ॥ सर्वं तिलघृतोपेतं गंधपुष्पादिभिर्युतं ॥ गृह्णातोमं वलिं ह्यं मृगदेव नमोस्तुते ॥ शर्करामंडितं खंडवस्त्रगंधाद्यलं
कृतं ॥ प्रीतो वलिं गृह्णातोमं रक्षोराज नमोस्तुते ॥ चन्दनागुरुकारवंडं वस्त्रगंधादिभिर्युतं ॥ गृह्णातोमं वलिं ह्यं दौवारिक नमो
स्तुते ॥ इदं तु पायसं नाथ गंधपुष्पादिमिश्रितं ॥ सुग्रीव वै गृह्णातोमं वलिं शांतिं प्रयछमे ॥ यवाग्वलंकृतं दुग्धं भक्तोपरिस
मर्पितं ॥ गृह्णातोमं वलिं ह्यं जलदेव नमोस्तुते ॥ मासभक्ष्यं कुशलं वघृतं गंधादिसंयुतं ॥ पुष्पदंत गृह्णातोमं वास्तुदोषं प्र
णाशय: ॥ मधुना साधितं पिष्टं गंधाद्यै रूपशोभितं ॥ वलिं गृह्णातोसुरेन्द्र सर्वदोषं प्रणाशय ॥ घृतवान्नसमायुक्तं कर्पूरादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ वा·भ ॥
॥ १७ ॥

समन्वितं ॥ गृहाणेमं वलिं शोघसर्वशांतिं प्रयच्छ मे ॥ यवान्नं तंडुलं नाथं गंधपुष्पादिशोभितं ॥ गृहाणेमं वलिं रोगसर्वदोषप्र॰
णाशाय ॥ सघृतं मंडकं वेदमन्त्राद्यैरूपशोभितं ॥ गृहाणेमं वलिं हृष्ट मृगवाहन नमोस्तु ते ॥ इदं तु कृशरान्नं मेतुध्व गंधादिसाधि
तं ॥ पाताले सुगृहाणेमं विघ्नमंत्रप्रणाशाय ॥ नारिकेरोदकं भक्तं पीतवस्त्रादिसंयुतं ॥ गृहाणेमं वलिं सुरव्यवास्तुदोषं प्रणाश
यः ॥ दधिगंधादिभिर्युक्तं पीतपुष्पसमन्वितं ॥ वलिं प्रगृह्यतां सोम सर्वदोषप्रणाशाय ॥ ओदनं घृतसंमिश्रं गंधपुष्पसमन्वि
तं ॥ गृहाणेमं वलिं हृष्टं भल्लाटक नमोस्तु ते ॥ माषान्नं तु घृताभ्यक्तं गंधपुष्पादिमंडितं ॥ गृहाणेमं वलिं हृष्ट मंगलाख्य नमो
स्तु ते ॥ क्षीरखंडसमायुक्तं नानापुष्पोपशोभितं ॥ दैत्यमातर्गृहाणेमं सर्वदोषं प्रणाशय ॥ पोलिकां मधुसंमिश्रां वस्त्रगंधा
दिसंयुतां ॥ गृहाणेमं वलिं हृष्ट देवमातर्नमोस्तु ते ॥ स्वर्गपाताल मर्त्येषु ये देवा वास्तुदेवताः ॥ गृह्णंत्विमं वलिं हृष्टं तु स्थापयंतु
स्वमंदिरे ॥ मानरो भूत वेतालाये चान्ये वलिकांक्षिणः ॥ विष्णोः पारिषदा ये च तेपि गृह्णंत्विमं वलिं ॥ पितृभ्यः क्षेत्रपालेभ्यो
वलिं दत्वा प्रकामतः ॥ अभावाद्युक्तमार्गस्य कुशपुष्पादिभिर्यजेत् ॥ प्रयोगसारे ॥ वास्तुशेषक्रियाभूतः सर्वरक्षाविभूतिकृ
त् ॥ भूतप्रीतिप्रदश्चास्मिन् दिशावलिहदीर्यते ॥ दिक्पालपरिषत्सर्वभूतानुद्दिश्य नामभि ॥ पूजाविसर्जनानातयत् स विज्ञेयो ॥ राम ॥
दिशावलिः ॥ दध्यंकुरजनीपुष्पलाजसक्तुतिलौधसा ॥ ऽद्वेणावितरेद्दिक्षु वलिं दिक्क्रमयोगतः ॥ सुराणां तेजसां चैव यक्षाणां रा ॥ १७ ॥
क्षसामपि ॥ तथा जलानां प्राणानां नक्षत्राणां च तत्तु नः ॥ विधानामधिपानां च नाम्नाथोक्त्वा वलिं हरेत् ॥ सर्वांहत्पदं प्रोक्त्वा परि

26

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वारायणात्मके ॥ तत्यार्घदेयश्च ततः सर्वेभ्यइति संपुतं ॥ भूतेभ्यश्चक्रमाद्दद्यः प्रादक्षिण्यात्क्षिपेद्बलिं ॥ द्विषद्भिशाचवेतालरक्षो
रक्षार्थिनामिह ॥ दिशाबलिविशेषेण सर्वसंपत्समृद्धिदः ॥ वास्तोष्पते प्रतीहि भूतक्रोहेत्रहप्रवेशेच ॥ चितनेव शांतिहोमे दिशा
बलिः क्षिपेद्भयोक्तव्यः ॥ विसर्जनमत्रस्तु तेत्रांतरे ॥ यांतु देवगणाः सर्वे पूजामादाय पार्थिवी ॥ इष्टकामसमृद्ध्यर्थं पुनराग
मनायचेति ॥ अत्रायं क्रमः ॥ वास्तुमंडलं लिखित्वा रजोभिः पदानि परिपूर्य मध्ये अष्टदलकमलं वक्ष्यमाणरीत्या निर्माय तत्रोक्त
प्रकारेण ब्रह्माणं ध्यात्वा तत्तत्पदेषु तत्तद्देवताश्च संपूज्य ॥ पूर्वदिशि कुंडं स्थंडिलं वा निर्माय ॥ तत्र वक्ष्यमाणक्रमेणाग्निमुपस
माधाय मंडलाद्ब्रह्मादिदेवतानां त्रावायुब्रह्मणोष्टोत्तरशतमन्येभ्यो दशदशाहुतीर्दत्वा पूर्णाहुतिं विधायः ॥ पुनर्मंडले देवा
नानीय तेभ्यो यथोक्तद्रव्यैर्यथोक्तमंत्रैश्च बलिं दिशाबलिं च विधाय पुनस्तान्समभ्यर्च्य उक्तमंत्रेण विसर्जयेत ॥ तत आचार्याय
दक्षिणां दत्वाशिष्यसंप्रणमेदिति ॥ इति वास्तुयागविधिः ॥ ॥ अथमंडपरचनार्थं पूर्वादिदिक्ज्ञानोपायः ॥ तत्रराजे ॥ भानो
र्गत्यादिशोज्ञात्वाकुर्यात्कर्माणिदेशिकः ॥ वास्तुवैषम्यतोयत्र सम्यक्तन्नज्ञायते ककुप् ॥ तत्रशंकुं प्रतिष्ठाप्यज्ञानीयाद्धक्कोदि
क्स्थितिं ॥ तकृत्यादिकपरिज्ञानं शृणु वक्ष्येयथाविधि ॥ सुसमे भूतले कृत्वा वृत्तं प्रमाणरूपतः ॥ तन्मध्यविंदौ शंकुं तु स्थाप
येद्द्वादशांगुलं ॥ भग्रछायाद्वयं वृत्ते पूर्वापरद्वये ॥ पूर्वापराह्नयोः कृत्वा चिह्ने तन्नाम भिन्नस्तथा ॥ स्वसमानपरिभ्रान्त्या कृत्वा
वृत्तद्वयं पुनः ॥ तयोः संश्लेषसंजातमत्स्य दक्षोत्तरस्थिते ॥ संधिद्वये च प्राक्पश्चात्सूत्रं मध्ये तु विन्यसेत् ॥ सूत्रं दक्षोत्तरं तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ता भ ॥ मध्ये॥ प्रागादिकल्पयेत्॥ क्रियासारेऽपि॥ कृत्वा भूमिं समां तत्र चतुर्हस्तमितं समं। द्वादशांगुलमानोच्चं शंकुं खादिरनिर्मितं॥ अ
॥ १८ ॥ लाभे यज्ञवार्क्षं वा तत्र संस्थापयेत्सुधीः॥ तच्छायासंस्पृशेद्यत्र तन्मध्ये मध्यमं स्मृतं॥ तिर्यक्प्रसारयेत्सूत्रं मध्यया मोत्तरे स्मृ
ते॥ कोणाः स्युरन्ये चत्वारश्चतुःसूत्रप्रसारणात्॥ एवमाशापरिज्ञानं समाख्यातं यथास्फुटं॥ ज्ञात्वैवं मंडपादीनि कुर्यात्सम
कविचक्षणाः॥ ॥ मंडपस्तु त्रिविधः॥ उत्तमाधममध्यमभेदात्॥ तदुक्तं प्रतिष्ठासारसंग्रहे॥ स्वल्पो द्वादशहस्तोऽयं द्विद्वि
स्ताततः क्रमात्॥ सोमशंभावपि॥ मंडपोऽर्ककरोऽथवा॥ द्विहस्तोत्तरयावृद्धाः षोडशाः स्युर्मंडपाः शुभाः॥ महाकपिलपंच
रात्रेऽपि॥ हस्तांस्तु द्वादशारभ्य क्रमाद्वौ द्वौ प्रवर्धयेत्॥ एवं वर्ध्मभिवृद्धिं विधायेत्थं रचयेद्यागमंडपं॥ नवहस्तं पंचहस्तं त्रिह
स्तं वा यथामतीति॥ गौतमीयतंत्रवचने॥ नवहस्तं पंचहस्तमित्यनेन चतुर्दशहस्तो नवहस्तं त्रिहस्तमित्यनेन द्वाद
शहस्तो मंडप उक्तः॥ तथा॥ पंचभिः सप्तभिर्हस्तैर्नवभिर्वा मतं तरमिति॥ शारदायामपि पंचभिः सप्तभिरित्यनेन द्वाद
शहस्तः पंचभिर्नवभिरित्यनेन चतुर्दशहस्तः सप्तभिर्नवभिरित्यनेन षोडशहस्तो मंडप उक्तः॥ तथा॥ अचलदेमि 27
नमंत्रस्क मंडपं ममसृणा वेदिकमारचयेन्न नइतिक्रमदीपिकायामपि॥ अचलानां सप्तानां हेत्वर्थं यं तेन चतुर्दशहस्तास्तस्य ॥ राम ॥
रिमितमित्यर्थः॥ यथाश्रुतेऽष्टकवेदीकृतिकृत्प्रवरणाय नुपपत्तेः॥ यत्तु राज्ञां होमाभिषेकादिप्रयोगार्थं तु मंडपं ॥ १८ ॥
विदध्यात्तु नवहस्ते न विस्तारायामसंयुतमिति तंत्रराजवचनं तद्दीक्षातिरिक्तकर्मोपयुक्तमंडपपरं प्रथमार्धं तथैवोक्तेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तशेखरे ॥ स्थलादर्कांगुलोच्छ्रायं मंडपस्थलमीरितं ॥ महाकपिलपंचरात्रे तु ॥ उच्छ्रायो हस्तमानं स्यात्तु समं च सुशोभन
मित्युक्तं ॥ शारदायां ॥ षोडशस्तंभसंयुक्तं चत्वारस्तेषु मध्यगाः ॥ अष्टहस्तसमुच्छ्रायाः संस्थाप्या द्वादशाभितः ॥ पंचहस्तप्रमा
णास्ते निर्दिष्टा ब्रह्मजवः शुभा ॥ तन्त्रेष्वमासंनिखनेत्सीदिग्मानं तत्र वित्तमः ॥ नारिकेलदलैर्वा शैशच्छादयेत्तत्समं ततः ॥ अष्टह
स्तेति ॥ इदंच षोडशहस्तमंडपरूपं ॥ मंडपार्धोच्छ्रितान्वेदसंख्याकूडान्वितान्स्तर्थेति पंचरात्रवचनात् ॥ मध्ये वाहिवास्तंभनि
वेशनमाग्नेयादिक्रमेणाकार्ये ॥ स्तंभोच्छ्रायशिलान्यासे सूत्रयोजनकीलके ॥ खननावटसंस्कारप्रारंभो वह्निगोचरः इति व
चनात् ॥ सिद्धान्तशेखरे ॥ मध्ये स्तंभचतुष्कं स्यात्तन्मध्ये वेदिकामता ॥ तंत्रांतरे ॥ वेदिकोरोपविन्यस्ये स्तंभान्वेदस्वरूपका
न् ॥ पंचरात्रे ॥ सारदारुभवान्स्तंभान्दृढान्कुर्यादृजून्समान् ॥ क्रियासारे ॥ यज्ञीयवृक्षोद्भवो वाक्षुकः स्तंभकर्मणि ॥
अन्यविशुष्कवृक्षा वा भवेयुर्नाम्यभूरुहाः ॥ गृहशाल्यः स्वयंशुष्कः कुटिलश्चपराननः ॥ असौम्यभूमिजनितः संत्याज्यः स्तंभ
कर्मणि ॥ मध्यमाधमयोर्द्वादशाङ्कस्तंभप्रमाणाङ्गैराशिकेनानेय ॥ पंचमांसन्यसेन्मौसर्वसाधारणो विधिरिति वास्तुशास्त्रव
चनात् ॥ पंचमांसे नवा वा खातं सर्वेषां वशिवोदितमिति सिद्धान्तशेखरवचनाच्च खननं सर्वमंडपस्तंभानां पंचमांशेन चेव ना
रिकेलदलैरित्याद्युपलक्षणं कटैः सच्छिद्रसंछाद्या विजयार्थाः स्तु मंडपा इति वास्तुशास्त्रवचनात् ॥ मंत्रमुक्तावल्यां ॥ दिक्षु
द्वाराणि चत्वारि विदध्यात्पंच मांशनः ॥ पंचरात्रे ॥ कनीयसि स्यादेकं वतुरंगुलवृद्धितः ॥ मध्यमोत्तमयोर्द्वारमिति न्यसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ता॰भ ॥
॥ १९ ॥

मनोहरं ॥ हस्तमानेन मंडपाद्बहिर्द्वारेषु तोरणाचतुष्टयं कुर्यात् ॥ तदुक्तं ॥ मंडपद्वारबाह्ये च वेदिमानेन दिक्क्रमात् ॥ प्लक्ष-
मौदुम्बरञ्चाश्वत्थं तोरणं न्यसेद्दिशि ॥ सोमशंभुः ॥ प्लक्षोदुम्बरकाश्वत्थवटजास्तोरणाः क्रमात् ॥ पूर्वादितो विधानं वा यद्वा य-
त्नविपर्ययः ॥ अलाभादेकमेवैषां सर्वाशासु निवेशयेत् ॥ सिद्धान्तशेखरे ॥ एकमेषामलाभे स्यात्तदभावेज्ञामीडुमः ॥ जंबू-
खदिरसाराश्च तालावा तोरणास्मृताः ॥ महाकपिलपंचरात्रे ॥ देवास्तोरणरूपेण संस्थितास्तत्र मंडपे ॥ विघ्नविध्वंसनार्थं
च रक्षार्थं त्वध्वरस्य च ॥ न्यसेन्न्यग्रोधमैन्द्र्यां तु याम्यां चौदुम्बरं तथा ॥ वारुण्यां पिप्पलं चैव कौवेर्यां प्लक्षकं न्यसेत् ॥ सुशोभनं
तु पूर्वस्यां सुश्रवेत्यादि मंत्रितं ॥ इषेत्वेति च मंत्रेण सुभद्राख्यं तु दक्षिणे ॥ सुकर्माख्यं तु वारुण्यां सामवेदादिकेन तु ॥ शन्नो
देवीति मंत्रेण सुहोत्रं तूत्तरे न्यसेत् ॥ शारदायां ॥ द्वारेषु तोरणानि स्युः क्रमात्क्षीरमहीरुहां ॥ स्तंभोच्छ्रायः स्मृतस्तेषां स-
प्तहस्तैः पृथक्पृथक् ॥ दशांगुलप्रमाणेन तन्मरीणाह ईरितः ॥ तिर्यक्फलकमानं स्यात्स्तंभमानार्धमानतः ॥ शूलानि क-
ल्पयेन्मध्ये तोरणे हस्तमानतः ॥ सप्तहस्तैरित्युत्तममंडपपक्षे ॥ यद्वास्तुशास्त्रे ॥ पंचहस्तप्रमाणास्ते विस्तारेणाद्विहस्तकाः ॥ ष-
डंगुलादिवृद्ध्यादि सप्तहस्तास्तथोत्तमे ॥ षडंगुलादीति ॥ तेन अधममंडपे तोरणस्तंभयोरन्तरालभूमिर्द्विहस्ता ॥ मध्यमे ष-
डंगुलाधिकद्विहस्ता ॥ उत्तमे द्वादशांगुलाधिकद्विहस्ता ॥ एतेन मंडपभेदेन तिर्यक्फलकमानमप्युक्तं भवति ॥ अधमो-
त्तमयोः पंचसप्तहस्तोच्छ्रायकथनान्मध्यमे षड्हस्तोच्छ्रायतोक्ता भवति ॥ पिंगलामते ॥ शूले न विहिता कार्या द्वादशांगुलमस्त-

28
॥ ताभ ॥
॥ १९ ॥

के ॥ अग्रवेमध्यशृंगं स्यात्किंचिद्वक्रं च पक्षयोः ॥ उभयं तन्तमाख्यातं अंशुलं रोपयेत्तदा ॥ क्रियासारे ॥ तोरणां घटयित्वैव मूर्द्ध
भूलत्रयं न्यसेत् ॥ भूले नवांगुलं दैर्घ्यं तुरीयांसे न विस्तृतिः ॥ शेषाणां चांगुलाहृद्धिर्वै पंचांगुलहानितः ॥ अयं वज्रत्रिशूलवि
न्यासः शैवशाक्तादौ ॥ वैष्णवे तु विशेषो वास्तुशास्त्रे ॥ मत्स्यके तु दशांशेन शंखचक्रगदांबुजं ॥ प्रागादिक्रमयोगेन न्यसेत्तेषां
मुदारुजं ॥ शारदायां ॥ दिक्षु ध्वजान्निवध्नीयाल्लोकपालसमप्रभान् ॥ वितानदर्भमालाद्यैरलंकुर्वीत मंडपं ॥ प्रतिष्ठासारसं
ग्रहे ॥ पीतरक्तादिवर्णाश्च पंचहस्ता ध्वजाः स्मृता ॥ द्विपंचहस्तैर्दंडैस्तैर्वंशजैः संयुता मता ॥ द्विपंचहस्ते दशहस्ते ॥ अन्यत्रा
पि पंचहस्ता ध्वजाः कार्या वै पुंल्ले न द्विहस्तकाः ॥ दंडश्च दशहस्तः स्याद्दृष्टदिक्षु वितान्न्यसेत् ॥ हयशीर्षपंचरात्रे ॥ ध्वजेन र
हितेन त्वत्र मंडपेन तु वृथा भवेत् ॥ पूजाहोमादिकं सर्वं जपाद्यं यत्कृतं तु वै ॥ रक्षके न विना यद्वत्क्षेत्रं न स्यति क्षेत्रिणा ॥
ध्वजं विना देवगृहं तथा नश्यति सर्वथा ॥ विघ्नपारिषदाः क्रूराः कूष्माण्डाद्यास्तु ये स्मृताः ॥ पूजादिकं तु गृह्णंति देवद्वारानरक्षि
तं ॥ तस्माद्ध्वजास्तु देवस्य मंडपे पूज्वलप्रभान् ॥ नश्यंति सर्वे ते वार्करश्मिभिन्नं तमो यथा ॥ सिद्धांतशेखरे ॥ चूतपल्लवमाला
ढ्यं वितानैरुपशोभितं ॥ विचित्रवंशसंछन्नं तुलास्तंभविभूषितं ॥ सफलैः कदलीस्तंभैः क्रमुकैर्नारिकेलजैः ॥ फलैर्नाना
विधैर्भोज्यैर्दर्पणैश्चामरैरपि ॥ भूषितं मंडपं कुर्याद्रत्नपुष्पसमुज्वलं ॥ हयशीर्षपंचरात्रे ॥ दर्पणैश्चामरैर्घंटैः स्तंभान्वस्त्रैर्वि
भूषयेत् ॥ कलशैर्घटिकाभिश्च साधारैः कर्करैस्तथा ॥ तत्र प्रतितोरणां एकैकः कलशः स्थाप्यः प्रतिद्वारपार्श्वयोर्द्वयोः प्रतिकोणां

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना॰४ ॥
॥ २० ॥

चैकैकः॥ तदुक्तं॥ गंधपुष्पांबरोपेतान् कुंभांस्तेषु विनिक्षिपेत्॥ तेषु तोरणोष्ठ॥ कुंवधरां वा कलितं वसिष्ठशं तेषु पूजयेत्॥
मंडपस्य तु कोणस्थकलशेषु क्रमादमी॥ अमृतो दुर्जयश्चैव सिद्धार्थो मंगलस्तथा॥ पूज्या द्वारस्थकुंभेषु शक्राद्यास्त्वन्यतन्त्रमे
अन्यत्रापि॥ मंडपे कलशौ द्वौ द्वौ द्वारे द्वारे निवेशयेत्॥ गालितोदकसंपूर्णौ वस्त्रपल्लवशोभितौ॥ शारदायां॥ तत्त्रिभागमिते
क्षेत्रे ऽरत्निमात्रसमुच्छ्रिता॥ चतुरस्रां ततो वेदीं मंडलाय प्रकल्पयेत्॥ अन्यत्रापि॥ ततो मंडपमध्यं तु त्रिशगां परिकल्पयेत्॥
पूर्वादिषु क्रमात्तस्य मध्यभागे तु वेदिका॥ सिद्धांतशेखरेपि॥ नवांशं मंडपं कृत्वा मध्यांशे वेदिका मता॥ अरत्निमात्रसमुच्छ्रि-
तो हस्तमात्रोन्नता॥ नैश्चतुर्भिर्भवेत्तुष्टिर्वितस्तिभिस्त्रिभिर्गुरौ॥ अरत्निमत्र हृदये तस्माद्धस्तस्य हृद्यतः शिवे॥ इति तंत्रराजव-
चनेनारत्निहस्तशब्दयोः पर्यायतोक्तेः॥ तत्रैव॥ तत्त्रिभागैकभागतः॥ विदध्यान्मध्यतो वेदीं करमात्रसमन्वितामित्युक्ते-
श्च॥ मंत्रमुक्तावल्यामपि॥ इष्टकाभिर्मृदा वापि वेदी दर्पणसंनिभा॥ राजहस्तोच्छ्रया कार्या विदुषा सिद्धिमिच्छता॥ क्रियासारे-
पि॥ त्रिभागं मंडलं कृत्वा मध्यभागस्य वेदिका॥ हस्तमानेन तुत्सेधं चतुरस्रं समं यथा॥ तथा॥ वक्रपार्श्वाक्षिन्नमध्या परूषा
दृगशोभना॥ मानहीनाधिका या सा कर्तुः कर्मविनाशिनी॥ मंडपान्यथाभावे दोष उक्तः॥ क्रियासारे॥ अनुक्तसाधनैः क्रू-
रो यदि वा कुटिलाकृतिः॥ मानाधिकोथवा न्यूनो मंडपः कर्तृनाशनः॥ आख्यातसाधनैः कॢप्तः शोभनः सममानकः॥ मनो-
ज्ञो मंडपो यो सौ कर्म कर्तुः शुभावहः॥ इति मंडपलक्षणं॥ ॥अथ कुंडानि॥ शारदायां॥ प्राक्प्रोक्ते मंडपे विदधान् वेदिकाया

29

॥ राम ॥
॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वहिस्त्रिधा ॥ क्षेत्रं विभज्य मध्यांशे पूर्वादि परिकल्पयेत् ॥ अष्टास्वाशासु कुंडानि रम्याकाराण्यनुक्रमात् ॥ चतुरस्रं योनिमर्द्धचंद्रं
त्र्यस्रं सुवर्तुलं ॥ षडस्रं पंकजाकारमष्टास्रं तानि नामतः ॥ आचार्यकुंडं मध्ये स्याद्गौरीपतिमहेन्द्रयो ॥ सिद्धांतशेखरे ॥ पुरंदरे
शयोर्मध्ये वृत्तं वा चतुरस्रकं ॥ तदाचार्यविनिर्दिष्टमिति ॥ क्रियासारे ॥ वृत्तं वा चतुरस्रं स्यान्मध्यस्थानं वृषेशयो ॥ ॥ अथ च
तुरस्रकुंडं ॥ तंत्रराजे ॥ प्राक्प्रत्यक्सूत्रमास्फाल्य तन्मध्ये विन्दुकल्पनं ॥ कृत्वा तत् पूर्वतः पश्चाद्द्वादशांगुलमानतः ॥ परं
प्रसृत्य तत्रापि विदध्याच्चिह्नयुग्मकं ॥ प्राक्प्रत्यक्चिह्नमानेन तयोरेवावलंबनतः ॥ दक्षिणोत्तरतो हंसपदे कृत्वा ततस्तयोः
प्रसार्य सूत्रं तत्रापि मार्जयित्वोक्तमानतः ॥ ततस्तदग्रारणालेत्य मध्ये विन्दुस्यमानतः ॥ कुर्याद्धंसपदे कोणेष्वभितस्तेषु पात
येत् ॥ चतुष्टयं तु सूत्राणां चतुरस्रं भवेत्समं ॥ तस्मिन्नन्यानि कुंडानि वडामि तव मानतः ॥ गौतमीयतंत्रे ॥ पूर्वापरायत
सूत्रं हस्तमानं प्रसार्य च ॥ तस्याग्रयोर्मत्स्ययुग्मं कुर्यात्स्पष्टं यथा भवेत् ॥ द्विभागीकृत्य तन्मत्स्यं पातयेद्दक्षिणोत्तरं ॥ तदग्र
योर्मत्स्ययुग्मं कुर्यात्स्पष्टं यथा भवेत ॥ चतुर्दिक्षु चतुः सूत्रं पातयेत्तत्प्रमाणतः ॥ चतुरस्रं चतुःकोष्ठं भवेदतिमनोहरं ॥ कोणा
स्रत्र्यदयं दद्यात्प्रमाणं तेन लक्षयेत् ॥ चतुरस्रं भवेत्कुंडं सर्वलक्षणलक्षितं ॥ तथा ॥ अनेन जनयेत्सर्वकुंडानि मनुवित्तमः
शारदायां ॥ चतुर्विंशत्यंगुलाद्यो हस्तं हस्तविदो विदुः ॥ कर्तुर्दक्षिणहस्तस्य मध्यमांगुलिपर्वणः ॥ मध्यस्य दैर्घ्यमानेन मानां
गुलिमुदीरितं ॥ अत्रभूवदनसमासो धमध्यमं लंवेन संगृणाये दिन्दुक्रेशीत्याच द्भुसप्रत्याधिकपंचशतांगुलानि ॥ ५७६ ॥ ह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ना॰भ॥
॥२१॥

स्तमात्रकुंडस्य क्षेत्रफलं॥ द्विहस्तादौ तद्द्विगुणादि॥ एकहस्तकुंडकर्णसूत्रेण द्विहस्तकुंडमध्यसूत्रं॥ एवं तत्कर्णसूत्रेण चतुर्हस्तकुंड
मध्यसूत्रमवगंतव्यं॥ एवमग्रेपि॥ तदुक्तं गौतमीयतंत्रे॥ कर्णसूत्रप्रमाणेन द्विहस्तं कुंडमुद्धरेत्॥ सर्वकुंडेषु सर्वत्र वर्धयेद्विधि
नामुना॥ इति॥ वस्तुतस्त्वेकहस्तक्षेत्रफलं द्विगुणत्रिगुणादिकृत्वा तन्मूलमानीय द्विहस्तत्रिहस्तादिकुंडमध्ये सूत्रपरिमाणं
ज्ञेयं॥ मूलानयनप्रकारस्तु॥ लीलावत्यां त्यक्त्वान्त्याद्विषमात्कृतिं द्विगुणयेन्मूलं समे तद्धृते त्यक्त्वा लब्धकृतिं तदाद्यविषमान्मूलं
द्विनिघ्नं न्यसेत्॥ पंक्त्यां पंक्तिहृते समेऽन्यविषमात्त्यक्त्वाप्तवर्गं फलं पंक्त्यां तद्द्विगुणं न्यसेदिति मुहुः पंक्तेर्दलं स्यात्पदं॥ मू
लावशेषकं भेकमष्टघ्नं विकलान्वितं॥ द्विगुणे तद्द्विनिघ्नेन मूलेनाप्तं फलं लभेत्॥ एवमनेन प्रकारेण गणितेन यथाक्र
ममितिज्ञानार्थं वचनात्॥ गणितज्ञाने द्विहस्तादिकुंडमध्ये सूत्रपरिमाणं समभियुक्तैर्बोध्यं॥ यथा॥ विस्तारांगुल
मानमेककरतो यावद्दशस्यात्क्रमात्॥ २४॥ वेदाश्विनो ३४ कुसागराः शरयवोपेताः ४१।५ भुजंगाब्धि ४८॥ निघ्नांबुधिसा
यकाः ५३।६ विषयवसंकेषु ५८।७ धर्तुग्रामष ६३॥ ४ नागांगाश्चययवानि ६७।७ हत्रिन्दुनि ७२ यवेनोनाश्च षट्पर्वताः॥
७५॥ ७॥ एवं च॥ चतुर्विंशत्यंगुलान्येकहस्तस्य व्यासः॥ २४॥ चतुस्त्रिंशद्द्विहस्ते ३४॥ एकचत्वारिंशदंगुलानि पंचय
वाश्च त्रिहस्तस्य ४१॥ यव ५ अष्टचत्वारिंशदंगुलानि चतुर्हस्तस्य ४८॥ त्रिपंचाशदंगुलानि षड्यवाश्च पंचहस्तस्य ५३
यव ६॥ अष्टपंचाशदंगुलानि सप्तयवाश्च षड्ढस्तस्य ५८॥ यव ७॥ त्रिषष्टिरंगुलानि चत्वारो यवाश्च सप्तहस्तस्य॥ ६३

30

॥राम॥
॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यव॥४॥ सप्तषष्टिरंगुलानि सप्तपञ्चवाश्चाष्टहस्ताः॥६८॥ यव ८॥ द्वासप्ततिरंगुलानि नव हस्ताः॥७२॥ पंचसप्ततिरंगुलानि सप्त
यवाश्च दश हस्ताः॥७५॥ यव ७॥ द्विहस्तादिकुंडानि तु षयोगोपयुक्तानि प्रसंगादुक्तानि॥ दीक्षायामेकहस्तकुंडस्यैवोपयोगा
त्॥ इति चतुरस्रकुंडलक्षणं॥ अथ योनिकुण्डलक्षणं॥ तंत्रराजे॥ तन्मध्यपश्चिमाङ्कोनविकासत्र्यस्रसूत्रकं॥ पूर्वतः पश्चिम
दृढकोष्ठयोर्मध्यदेशतः॥ ततः कोणमानेन तथाप्रामयेन्यस्य चिमात्रकान्॥ उत्तराशावधि तथा दक्षिणाशावधिप्रिये॥ तन्मध्यात्
र्यकसूत्राग्रद्वयावष्टम्भतस्तथा॥ विकाशितत्र्यस्रसूत्रावधिसूत्रद्वयं भवेत्॥ योनिकुण्डमिदं भद्रे साक्षात्तु भयातमम्॥ इति
योनिकुंडलक्षणं॥ ॥अथार्धचन्द्रकुंडलक्षणं॥ यथा॥ चतुःकोणक्षेत्रे जिनलवकमध्यास्थितगुणोविहायाधस्तार्धद्वयगु
परिमाचच्चमतिमान्॥ कलांशेनाशस्योनितगुपरितिर्यक्कृतगुणोभ्रमार्धतन्मानादपि शशिदलं कुंडमिति तु॥ अत्र तांत्रिकवचनानि
विशंवादिक्षेत्रफलकानीति नोक्तानिति॥ व्यासार्द्धवर्गवर्गात् क्षेत्रफलदशगुणान्मूलमितिवचनात्॥ इत्यर्धचंद्रकुंडलक्ष
णं॥ ॥अथ त्रिकोणकुंडलक्षणं॥ अत्रापि तांत्रिकवचनानि विसंवादिक्षेत्रफलकानि॥ क्षेत्रस्य मध्यमगुणो जिनभागभक्ते
श्रोणपोः पृथक्शरलवान् परिवर्ध्य धीमान्॥ अत्रैविनाष्टमलवेदनशाथसत्रेस्ता त्रिस्त्रिभिर्भवति कुंडमिह प्रयुक्तैरित्यभियुक्तादि
शापि समसूत्रतायाः अभावः॥ तस्माद्द्वात्रिंशदंगुलं मध्यमलं च षट्त्रिंशदंगुलं च भवं विधाय सूत्रत्रयदानेन त्रिकोणकुंडं सं
पादनीयं॥ तेन समसूत्रताक्षेत्रतासेत्रफलपूर्णाता च भवतीत्याकलनीयं॥ षट्त्रिंशदंगुलमितां भुवमारचय्य द्वात्रिंशदंगुल

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना·प ॥
॥ २२ ॥

मितं कुंडमध्यलेवं॥ व्यग्रत्रयावधिविधायवसूत्रयुग्मं त्र्यस्रं मनोज्ञ नवमत्रविधेहि कुंडमिति॥ तदुक्तमित्यलवयं॥ इति त्रिको
णकुंडलक्षणं॥ ॥अथवृत्तकुंडलक्षणं॥ षोडशधाकृतमध्यमसूत्रे क्षेत्रपरःपरिवर्धितभागे॥ एककएववततोनरविभ्रान्मे
द्वलकुंडमितिप्रमाणात्स्यात्॥ अन्यानितु वचनानिविसंवादिक्षेत्रफलकानीत्युपेक्षितानि॥ इतिवृत्तकुंडलक्षणं॥ ॥अथ
षट्कोणकुंडलक्षणं॥ क्रियासारे॥ क्षेत्रवस्वंसकं कृत्वा बहिःपार्श्वद्वयेशकौ॥ न्यस्त्वा तेन प्रमाणेन मध्यात्तुल्यं यथान्यसेत्॥
कोणान्यन्यानि चत्वारि पार्श्वयोश्च द्वयं द्वयं॥ षट्सूत्राणि न्यसेत्तेषु तत्तस्मात्षट्कोणकुंडकं॥ सिद्धान्तशेखरे॥ चतुरस्रे समे
क्षिद्वेक्षेत्रमष्टांशकं बहिः॥ अग्रयोर्गर्भसूत्रस्य योजयेत्तत्प्रदेशतः॥ गर्भमध्यप्रमाणेन सूत्रेणाप्रभयंत्रकं॥ गर्भमध्ये बहिर्भागे
विन्यसेद्भ्रमनाद्भवेत्॥ उत्तरे दक्षिणे वा स्ये मत्स्ययोर्द्वितयं ततः॥ मीनेवाष्टांशके मीनेमीनत्र्युग्मे ततः क्रमात्॥ सूत्रषट्कं न्यसे
त्तत्तुकुंडं षट्कोणमीरितं॥ अस्यार्थः श्रीविद्यार्णवे तं वेडिकायां मया व्यक्तीकृत इति नेहोच्यते॥ इतिषट्कोणकुंडलक्षणं॥ ॥
अथपद्मकुंडलक्षणं॥ पद्मकुंडे मध्यसूत्रं चतुर्विंशतिधा भजेत्॥ प्रथमे कर्णिकावृत्तं त्र्यंशवृत्ताधमानतः॥ षडंशवृत्तार्ध
मानप्रमितवृत्ते तु केसराः॥ नवांशवृत्तार्धमाने वृत्ते स्यात्तत्रमध्यभूः॥ द्वादशांशात्तु वृत्तार्धोद्धृतं पत्रार्धभूः स्मृता॥ दलाग्राणां ॥ राम ॥
तु वृत्तार्धं कृत्वा पंचदशांशके॥ न्यूनैः पंचभिरेकांशा चतुःषष्ट्यंशके प्रमान्॥ रेखाग्रेभ्यः पुत्रसीम्नो दलाग्राणि प्रकल्पयेत्॥ ॥ २२ ॥
वचनान्तराणि तु विसंवादिक्षेत्रफलकानीत्युपेक्षितानि॥ तत्र कर्णिकात्र्यंगुलोच्चा षडंगुलव्यासा कार्या॥ तदुक्तं कामिके॥ उक्ते

5 31

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धेर्नुं ततः ॥ कुर्यात्कर्णिकार्धेशमानतः ॥ इति ॥ इति पद्मकुंडलक्षणं ॥ ॥ अथाष्टकोणकुंडलक्षणं ॥ कुंडेष्टास्त्रे मध्यसूत्रं चतु
र्विंशतिधा भजेत् ॥ एकत्रिदशमासार्धसर्धंशतं तथा च वर्तुलं ॥ तन्मध्ये दिक्षु सूत्रं च दानादष्टास्रकं समं ॥ वचनांतराणि तु विसं(
वादिक्षेत्रफलानि विषमसूत्र प्रतीयादिकानीत्युपेक्षितानि ॥ इत्यष्टकोणकुंडलक्षणं ॥ ॥ एतावत्कुंडकरणाशक्तस्तु चतुरस्र
कुंडमेव वा सर्वत्र कुर्यात् ॥ कुंडानि चतुरस्राणि वृत्तानानाकृतीनि वेत्याम्नायरहस्यस्य ॥ शक्तानि नानिवृत्तानि चतुरस्राणि वा
सदेति सोमशंभोश्च वचनात् ॥ मध्यमस्तु पंचकुंडीपक्षः एककुंडकरणपक्षः कल्पकनिष्ठः ॥ नवपंचाथवैकं वा कर्तव्यं लक्षणा
न्वितमित्याम्नायरहस्यवचनात् ॥ तन्निवेशनमपि तत्रैवोक्तं ॥ विधाने पंचकुंडानामीशाने पंचमं भवेदिति ॥ ज्ञानरत्नाव
ल्यामपि ॥ दिक्षु वेदास्रवृत्तानि पंचमं त्वीशगोचरमिति ॥ नारदीये तु ॥ पश्चाद्यदिश्यते कुंडं चतुष्कं तत्र कर्मणि ॥ वेदास्रम
र्धचंद्रं च वृत्तं पद्मनिभं तथा ॥ कुर्यात्कुंडानि चत्वारि प्रागादिषु विचक्षणः ॥ पंचमं कारयेत्कुंडमीशदिग्गोचरं द्विजेत्युक्तं
एककुंडपक्षे निवेशनमुक्तमाचार्यैः ॥ अथवा दिशि कुंडमुत्तरस्यां प्रविदध्याच्चतुरस्रमेकमेवेति ॥ सोमशंभुनातु ॥ एकं
वाशिवकाष्ठायां प्रतीच्यां कारयेद्बुधः इत्युक्तं ॥ एतच्च कुंडं चतुरस्रं वृत्तं वा कार्यं ॥ तदुक्तं क्रियासारे ॥ चतुरस्रं भवेत्कुंडं वृत्तं कुंडं
मथापि वा ॥ स्थिरार्चने चरार्चायां नित्ये हवनकर्मणीति ॥ पिंगलामतेपि ॥ कुंडमेककरं वृत्तं मेखलाकंठनाभिमत् ॥ नित्येक
र्मणि दीक्षायां शांतौ पुष्टौ मतं शुभमिति ॥ ॥ अथ खातं ॥ शारदायां ॥ यावान् कुंडस्य विस्तारः खननं तावदीरितं ॥ प्रयोगसा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना॰ भ ॥ रदिक्षमारस्वनयोरपि ॥ चतुरस्रं चतुः कोष्ठं सूत्रे कृत्वा यथा पुरा ॥ हस्तमाने ततन्मध्ये तावन्निम्नाय तं खनेत् ॥ गणेश्वरवि
॥ २३ ॥ मर्शिन्यां ॥ चतुर्विंशाङ्गुलायामं तावत्खातसमन्वितं ॥ यत्तु ॥ हस्तमात्रं खनेत्तिर्यगूर्द्ध्वमेखलया सहेति मोहशूरे ॥ व्यासात्
खातः करप्रोक्तो निम्नतिथ्यंगुले तत्विति विश्वकर्मणि ॥ कुंडं जिनांगुलैस्तिर्यगूर्द्ध्वमेखलया सहेति प्रथमतंत्रे ॥ खातं तु कुंडं
प्रमाणात्स्यादूर्द्ध्वमेखलया सहेति शिक्षान्तशेखरे च प्रोक्तं ॥ तत्तु स्वल्पतरहोमविषयं ॥ सुकुमारमालत्यादिपुष्पहोमविष
यं चेत्यवधेयं ॥ गौतमीये ॥ ततः कुंडं खनेन्मन्त्री यथाशास्त्रविधानतः ॥ स्यन्कासपर्यस्य गात्रं च शिरोदेशं प्रयत्नतः ॥ शिरो
घाते भवेन्मृत्युः पिंडे च पिंडघातनं ॥ उच्छेदुःखसंभूतं कोडे सर्वार्थसाधनं ॥ नागशिरआदिनिर्णयस्तंत्रान्तरे ॥ वास्तुप्रमा 32
णेन तु गात्रकेणा वामेन शेते खलु नित्यकालं ॥ त्रिभिस्त्रिमासैः परिवर्त्तयन्भूमौ तं वास्तुनागं प्रवदंति सिद्धाः ॥ भाद्रादिके वास
वदिक्शिरास्यान्मार्गादिके तु त्रिषु याम्यमूर्द्धा ॥ प्रत्यक्शिरास्यात्खलु फाल्गुनादौ ज्येष्ठादिको वेरशिराः स नागः ॥ ॥ अथ
कंठमानं ॥ महाकपिलपंचरात्रे ॥ चतुर्विंशतिभागेन कंठो वै परिकीर्तितः ॥ खातान्वाह्ये गलः कंठः सर्वकुंडेष्वयं विधिः ॥ च
तुर्विंशतिमे भागमंगुलं परिकल्पयेत् ॥ ॥ अथ मेखला ॥ पिंगलामते ॥ खातादेकांगुला मेखलानां स्थितिर्भवेत् ॥ शार ॥ राम ॥
दायां ॥ कुंडानां यादृशं रूपं मेखलानां च तादृशं ॥ वायवीयसंहितायां ॥ मेखलानां त्रयं वापि द्वयमेकमथापि वा ॥ क्रियासा ॥ २३ ॥
रे ॥ नाभियोनिसमायुक्तं कुंडं श्रेष्ठं त्रिमेखलं ॥ कुंडं द्विमेखलं मध्यं नीचं स्यादेकमेखलं ॥ सोमशंभौ ॥ त्रिमेखलं द्विजे कुंडं क्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रियस्याद्धि मेखलं ॥ मेखले कांतु वैश्येष्येति ॥ तत्रैव ॥ कुंडानायश्चतुर्विंशो भागः सोंगुलसंज्ञकः ॥ विभज्यानेन कर्त्तव्या मेखला कंठनाभ
यः ॥ महाकपिलपंचरात्रे ॥ कुंडेष्वग्निकान्वाप्याद्वितीयांशं दशकाम्मता ॥ तृतीया द्वादशांशा स्यादिति ॥ योगिनीहृदये ॥ मेखला कुण्ड
मे देवि हस्तादिषु विशेषतः ॥ षरागागार्कांशसंभागैर्मिताः स्युर्गोपिताः शुभाः ॥ तंत्रान्तरे ॥ यायातु मेखला पूर्वा सा सा भूमिरुदाहृता ॥
अत्रवाद्यमारभ्य सर्वत्वं वोध्यं ॥ क्रियासारे ॥ प्रधानमेखलोत्सेधमुक्तमंत्र नवांगुलं ॥ तद्वाह्यमेखलोत्सेधं पंचांगुलमिति स्मृतं
तद्वाह्यमेखलोत्सेधमंगुलद्वितयं क्रमात् ॥ चतुस्त्रिद्व्यंगुलोत्सासो मेखलात्रितयस्य तु ॥ अथोच्चतो क्रिमूलभूमिमवधीकृत्य
लक्षणासंग्रहे ॥ प्रथमा ह्यंगुली याभाउन्नता सा नवांगुलैः ॥ मध्यमा चांगुली वाह्ये तृतीया तु यमांगुलैः ॥ यत्तु सत्वपूर्वकगुणान्विताः क्र
मात् द्वादशाष्टचतुरंगुलोच्छ्रिता ॥ सर्वतोंगुलचतुष्कविस्तृता मेखलाः सकलसिद्धिदा मता ॥ इत्याचार्यैरुक्तं तत्तत्फलविशेषप
रं अत एव ॥ प्रथमा मेखला तत्र द्वादशांगुलविस्तृताः ॥ चतुर्भिरंगुलैस्तस्याश्चोन्नतिश्च समंततः ॥ तस्याश्चोपरि वप्रः स्याच्चतु
रंगुलमुन्नतः ॥ अष्टाभिरंगुलैः सम्यक् विस्तीर्णाः स्मसमंततः ॥ तस्योपरि पुनः कार्यो वप्रः सोपि तृतीयकः ॥ चतुरंगुलविस्तीर्णा
श्चोन्नतश्च तथाविध ॥ इति वसिष्ठसंहितापि तथैव ॥ यच्चः व्यासे चतुर्विंशतिधा विभाजिते तित्रश्चतुस्त्रीक्षणाभाग विस्तृता
स्समंततः कंठवहिस्तु मेखला तत्र तु रामाशकतुंगता मता ॥ विस्तारस्तुस्योन्नतयस्तु कश्चिदुक्ता इमाः केनचिदर्कभागैः ॥ आद्यो
च्चतोक्तापरयोस्तु नाग वेदांशमाना विविधं क्रमेणेति वाजपेयिभिरुक्तं तत्तु प्रमाणाभावादुपेक्षणीयं ॥ गौतमीये ॥ सात्विकी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेखला पूर्वद्धितीया राजसी स्मृता ॥ तृतीया तामसी ज्ञेया इत्युक्तं कुंडलक्षणं ॥ पंचमेखलापक्षे ॥ तन्त्रान्तरोक्तं लक्षणसंग्रहे ॥
मेखलाः पंच वै कार्याः षट्पंचाष्टित्रिपक्षकैः ॥ सिद्धांतशेखरेपि ॥ षड्भागात्त्रिवह्निनेत्रमिताः स्युः पंच मेखलाः ॥ द्विमेखला
पक्षे तन्त्रान्तरे ॥ षष्ठांशेनाष्टमांशेन मेखलाद्वितयं मतं ॥ एकमेखलापक्षेपिंगलामते ॥ एका षडंगुलोत्सेधविस्तारा मेखलाम
ता ॥ महाकपिलपंचरात्रेपि ॥ सात्वतर्थांशविस्तारा मेखलैका थवा स्मृता ॥ प्रथमतंत्रेपि ॥ कंठांगुलाद्बहिः कार्या मेखलैका
षडंगुला ॥ सिद्धांतशेखरेपि ॥ कुंडानां मेखलां कुर्यादेकां वै षड्भिरंगुलैः ॥ अथ योनिः ॥ शारदायां ॥ होतुरग्रे योनिरासामुप
र्यश्वत्थपत्रवत् ॥ सोमशंभौ ॥ तासामुपरि योनिः स्यान्मध्येऽश्वत्थदलाकृतिः ॥ स्वायंभुवे ॥ प्रागग्नियाम्यकुंडानां प्रोक्ता योनि
रुदङ्मुखा ॥ पूर्वाभिमुखाः स्मृताः शेषा यथाशोभं व्यवस्थिता ॥ त्रैलोक्यसारेपि ॥ दक्षिणास्या पूर्वयाम्येजलस्या पश्चिमोत्तरे ॥ न
वमस्यापि कुंडस्य योनिर्दक्षदलस्थिता ॥ स्वायंभुवे ॥ मेखलामध्यतो योनिः कुंडार्धत्र्यंशविस्मृता ॥ अंगुष्ठमानोष्ठकंठाका
र्यश्वत्थदलाकृतिः ॥ सिद्धांतशेखरेपि ॥ दीर्घार्द्धपर्वभिर्योनिर्विस्तारेणाष्टकांगुला ॥ उन्नतिर्द्व्यंगुले मास्याः ॥ प्रयोगसारेपि
त्रिभागां मध्यतो योनिमायामेद्वादशांगुलां ॥ द्वादशांशोच्छ्रितां कुर्यान्न किंचिन्कुंडनेवेशिनी ॥ एवं च ॥ मुख्यरत्नेकहस्तानां कुं
डानां योनिरीरिता ॥ षड्वक्त्रद्व्यंगुलायामविस्तारोन्नतिशालिनीति शारदावचनं ॥ तत्षडंगुलमायामं विस्तारं चतुरंगुलमिति
क्रियासारवचनं चैकमेखलपक्षे ॥ इति राघवभट्टः ॥ वस्तुतः षड्वक्त्रद्व्यंगुलेति समुच्चितमेवायामादिष्वन्वेति ॥ तदुक्तं पंचरात्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्कांगुलोछ्रयांयोनिंविदध्यात्तावदायतां ॥ अन्यत्रापि ॥ उत्सेधायामतस्तुल्यायोनिः स्याद्द्वादशांगुला ॥ इदमपिवसिष्ठसंहितायु
क्तस्थूलमेषापक्षे ॥ नारदीयेतु ॥ कुंडव्यंशेनविस्तारायोनिरुच्छ्रायतोंगुला ॥ कुंडार्धेनतुदीर्घास्यादित्येकांगुलतोच्चताउक्ता ॥ त्रैलो
क्यसारेपि ॥ दैर्घ्यान्नर्यांगुलायोनिर्व्हद्यंशोनाविस्तरेणातु ॥ एकांगुलोछ्रितासान्विति ॥ पिंगलामतेपि ॥ विस्तारोष्टांगुलोयोनेरुच्छ्रा
योंगुलसंमितः ॥ अष्टांगुलविस्तारत्वंचादिभागे ॥ अग्रेसंकुचितत्वाद्दश्वत्थपत्रवदित्युक्तं ॥ त्रैलोक्यसारे ॥ प्रविष्टाम्यंतरेतथा
कुंभद्वयसमायुक्ताअश्वत्थदलवन्मता ॥ वायवीयसंहितायामपि ॥ मेखलामध्यतः कुर्यात्पश्चिमेदक्षिणेपिवा ॥ शोभनांमध्य
मः किंचिन्निम्नांतुमूलिकांशनैः ॥ अग्रेणाकुंडमभिमुखींकिंचिदुन्नतांमेखलां ॥ शारदायां ॥ एकांगुलंतुयोन्यग्रंकुर्यादीषदधोमुखं
अत्रैकांशेनविस्तारोन्नतिशालिनीयोन्युपरितोनेमिरपिकार्या ॥ नतुनक्तरामवाजपेयिनाकुंडव्यासदलायतताथविततात्र्यंशेनतु
गाचतुर्विंशांशेनवर्त्तनावर्त्तापरिधिनायोनिः समंतात्स्थुना ॥ तावन्माननिजाग्रकेशविशतींकुंडांतरेनर्विलासाधोहृन्नद्दलद्वयेन
तुविराजमानाश्वत्थपत्राकृतिरिति ॥ मध्येनालविलेतियथाश्वविघ्नधारणार्थंविलमेवंविलवतीत्यर्थः ॥ अधोहृन्नेतिमूलभागेकुंभा
कारवृत्तार्धद्वययुक्तेत्यर्थः ॥ ॥ अथनालं ॥ शारदायां ॥ स्थूलादारभ्यनालंस्याद्योन्यामध्येसरंध्रकं ॥ पंचरात्रेपि ॥ स्थूलादारभ्यना
लंस्याद्वाह्यमेखलयासमं ॥ प्रयोगसारेतु ॥ योन्याः पश्चिमतोनालमायामेचतुरंगुलं ॥ त्रिद्व्येकांगुलविस्तारक्रमान्न्यूनाग्रमिष्यते ॥
दृश्यतं ॥ चतुरंगुलोत्सेधविस्तारावाह्यमेखलासंलग्नावर्तुरस्रनालमूलवेदिः कार्येतिसंप्रदायः ॥ ॥ अथनाभिलक्षणं ॥ शा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना॰भ ॥ रदायां ॥ कुंडानां कल्पयेदंतर्नाभिमंबुजसंनिभं ॥ ततः कुंडानुरूपं वा मानमस्याभिगद्यते ॥ मुष्टिरत्निकहस्तानां नाभिरुत्सेधता
॥ २५ ॥ रतः ॥ नेत्रवेदांगुलोपेता कुंडेष्वन्येषु वर्धयेत् ॥ यवद्वयक्रमेणैव नाभिः पृथग्दारधीः ॥ रामवाजपेयिनातु सर्वकुंडानुगत
मेकमेव लक्षणमुक्तं ॥ कुंडाकंशिखाग्रतो यां द्विनिघ्नः तत्यासास्याडीमता कल्पनीयः ॥ शारदायां त्वत्र्यांतरत्वात् स्थूलदृष्ट्यो
क्तं ॥ शारदायां ॥ योनिकुंडे योनिमत्कुंडे नाभिं विवर्जयेत् ॥ यथा ॥ नित्यं नैमित्तिकं होमं स्थंडिले वा समाचरेत् ॥ अनुष्ठाने
धसंयुक्तं चतुरस्रं समंततः ॥ चन्द्रपीठेतु ॥ त्रिरस्रं चतुरस्रं वा वितस्त्युछ्रायसंमितं ॥ सिकताभिर्विधानज्ञः स्थंडिलं हस्तमात्र
कं ॥ द्विरंगुलोछ्रितो वप्रः प्रथमः परिकीर्तितः ॥ अंगुलोछ्रायसंयुक्तो वप्रभूमिमथोपरि ॥ अंगुलस्तत्र विस्तारः सर्वेषां क
थितो बुधैः ॥ होमाधिक्ये न चैव ॥ सार्धद्विगुणिता वापि करणी स्थंडिले नयेत्युक्तं ॥ ॥ अथ भल्लसरां ॥ शारदायां ॥ प्रक
ल्पयेत्स्रुवं यागे वक्ष्यमाणेन वर्त्मना ॥ श्रीपर्णीशिंशपाक्षीरशाखिविशेषकनमंगरुः ॥ गृहीत्वा विभजेद्धस्तमात्रं षड्विंशताय
नः ॥ विंशत्यंशैर्भवेद्दंडो वेदिस्तैरष्टभिर्भवेत् ॥ एकांशेन मितः कंठः सप्तभागमितं मुखं ॥ वेदीत्र्यंशेन विस्तारः कंठस्य परिकी
र्तितः ॥ अग्रे कंठसमानं स्यान्मुखमार्गे प्रकल्पयेत् ॥ कनिष्ठांगुलिमानेन सर्पिषो निर्गमाय च ॥ वेदिमध्ये विधातव्या भागेनैके ॥ राम ॥
न कर्णिका ॥ विदधीत बहिस्तस्या एकांशेनाभितोऽवटं ॥ तस्य खानं त्रिभिर्भागैर्वृत्तमर्धांशतो बहिः ॥ अंशेनैकेन परितो दला ॥ २५ ॥
नि परिकल्पयेत् ॥ मेखलाद्वयवेद्योः स्यान्नेमिरर्धांशमानतः ॥ दंडमूलाग्रयोः कुंभो गुणावेदांगुलैः क्रमात् ॥ गंडौ युग्मं यमांशे

34

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्याद्दंडस्यानाहईरितः॥ षड्भिरंशैः पृष्ठभागो वेध्याः कूर्माकृतिर्भवेत्॥ हंसस्य हस्तिनो वापि पोत्रिणो वाप्यखेन्मुखं। मुखस्य पृष्ठ
भागेतु संप्रोक्तं लक्षणांश्रुवच॥ श्रीपर्णीगंभारीः क्षीरशाखिनः अश्वत्थोदुम्बरवटप्लक्षाः॥ फेत्कारिणीतंत्रे॥ कारस्करेणामल
कीपलाशखदिरैरपि॥ सुवर्णरूप्यताम्रैर्वा अयोभिरपिकारयेत्॥ वायवीयसंहितायां॥ स्रुकस्रुवौ तैजसौ ग्राह्यौ न कांस्यायस
सीसकौ॥ यज्ञदारुमयौ वापि तान्त्रिकौ शिल्पिसंमतौ॥ पर्णे वा ब्रह्मवृक्षादेश्छिद्रे मध्ये उच्छ्रिते॥ अत्रायसे विधिनिषेधौ क्रूर
सौम्यकर्मविषयौ॥ तदुक्तं तंत्रांतरे॥ सौवर्णौ स्रुकस्रुवौ स्यातां सौम्यकर्मणि सर्वतः॥ भवेतामायसावेतौ स्तंभनादिषु क
र्मसु॥ अन्यत्रापि॥ तद्दलाभे पलाशस्य पर्णाभ्यां ह्रूयते हविः॥ वसिष्ठसंहितायामपि॥ पलाशपत्रे निश्छिद्रे सच्छिरे स्रुक
स्रुवौ मतौ॥ विदध्याद्वाश्वत्थपत्रे संक्षिप्ते होमकर्मणि॥ हस्तमात्रमिति वा ऊर्ध्वमात्रमित्यर्थः॥ स्रुवं बाहुप्रमाणेन होमार्थं विद
धीत वै॥ इत्यगस्तिसंहितावचनात्॥ षट्त्रिंशदंगुला स्रुक स्यादिति फेत्कारिणीवचनाच्च॥ वेदीत्र्यंशेन॥ वेदीतृतीयभा
गेन न त्वंशत्रयेण वेदी पदं वैयर्थ्यापत्तेः॥ अत्र दलानां खननं नास्ति प्रमाणाभावात्॥ श्रुवमधिकृत्यैव मंत्रमुक्तावल्यां॥
कंठाधः कारयेन्मार्गं विज्ञानाज्यस्य निर्गमे॥ वेधं च मुखतः कुर्यात्तप्तलोहशलाकया। वसिष्ठसंहितायां॥ शुषिरं कंठदेशे स्या
च्छिद्रेयावत्कनीयसी॥ ॥अथस्रुवलक्षणं॥ शारदायां॥ स्रुचश्च तुर्विंशतिभिर्भागैरारचयेत्स्रुवं॥ द्वाविंशत्या दंडमानं मं
शैरेतस्य कीर्तितं॥ चतुर्भिरंशैरानाहः कर्णाज्यग्राहि तच्छिरः॥ अंशद्वयेन निखनेत्स्यंकेमृगपदाकृतिः॥ दंडमूलाग्रयोर्गंडी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ना.भ ॥
॥ २६ ॥

र्भवेत्कं कराभूषिता॥ स्रुवस्त्रुविधिराख्यात इति॥ अथांकुरार्पणं॥ शारदायां॥ प्रागेव दीक्षादिवसात्सप्तभिर्विधिवद्दिने
सर्वमंगलसंपत्त्यै विदध्यादंकुरार्पणं॥ शिवागमशेखरे॥ प्रतिष्ठायां च दीक्षायां स्नापने चोत्सवे तथा॥ मंत्रोक्षणे च शांत्यर्थे विवा
हे मौंजिबंधने॥ सर्वमंगलकार्येषु कारयेदंकुरार्पणं॥ प्रतिष्ठादिवसात्पूर्वं नवमे सप्तमेऽपि दिने॥ पंचमे वा तृतीये वा मध्ये वांकुरा
र्पणं॥ महाकपिलपंचरात्रेऽपि॥ उत्सवाहद्घोषणां कृत्वा आसयैः सह देशिकः॥ मंगलांकुरसंरोपं कुर्यात्तत्रैव वासरे॥ सप्तमान्नवमद्वा
पि प्रागेव यज्ञकर्मणः॥ तंत्रांतरेऽपि॥ शस्तयागदिवसात्तु पुरस्तात्सप्तमे ह्नि शुभे नवमे॥ पंचमेऽथ सुदिने सुमुहूर्ते मंगलांकु
रविधिं विदधीत॥ अन्यत्रापि॥ गुरुर्विशुद्धः प्रागेव शुद्धाहात्सप्तमेऽहनि॥ संकल्प्याथ कर्तव्यमंकुरारोपणं शुभं॥ कुर्यात्तान्दी
मुखश्राद्धं पूर्वेद्युः स्वस्तिवाचनं॥ स्वगृह्योक्तप्रकारेण तदेतद्विदधीत वै॥ संहितायामपि॥ सर्वत्राभ्युदयश्राद्धमंकुरोत्पाद
ने तथा॥ आदावेव प्रकुर्वीत कर्मणोऽभ्युदयात्मनः॥ शारदायां॥ मंडपस्योत्तरे भागे शालां पूर्वापरायतां॥ गूढां कुर्यात्ततस्त
स्यां मंडलं रचयेत्सुधीः॥ इदं च दक्षिणोत्तरावनी ज्ञेया॥ तथा॥ पंचहस्तप्रमाणानि पंचसूत्राणि पातयेत्॥ पूर्वापरायता
न्येषां मंतरं द्वादशांगुलं॥ दक्षिणोत्तरसूत्राणि तद्वदेकादश पातयेत्॥ पदानि तत्र जायंते चत्वारिंशत्प्रमार्जयेत्॥ पंक्त्या वी
थीश्च तस्यां तत्र शुक्लोभयपार्श्वयोः॥ वीथ्यौ द्वे च चतुःकोष्ठत्रयमत्रावशिष्यते॥ प्रयोगसारेऽपि॥ प्रसार्य स्फोटयेत्तत्त्वं यथा ॥ राम ॥
याम्योत्तरायतं॥ पंचहस्तप्रमाणेन द्वे द्वे पार्श्वे च पातयेत्॥ तद्वत्पूर्वोक्तमानेन द्वादशाद्वादशांगुले॥ प्राक्प्रत्यक्च समं पश्चा ॥ २६ ॥

35

न्मत्राणपेकादशक्रमात् ॥ पातयेत्तासु रेखासु पूर्वसूत्रां नरां नरं ॥ शारदायां ॥ पश्चान्निरंजयेत्तानि श्वेतपीतारुणासितैः ॥ रजोभि
रुपामले नाथवा थीरापूरयेत्सुधी ॥ प्रपंचसारे तु ॥ पीतारक्तसितासितैः प्रतिपदं चन्द्रादिशर्वान्तकर्मिन्निरंजनक्रमोप्युक्तः ॥
शारदायां ॥ पात्राणि त्रिविधान्याहुः रंकुरार्पणकर्मणि ॥ पालिकाः पंचमुखाश्च शरावांश्च चतुः क्रमात् ॥ प्रोक्ताः स्युः सर्वतन्त्र
जैर्हरिद्रसुशिवात्मकाः ॥ पालिकोच्छ्राय उन्नेयः षोडशद्वादशाष्टभिः ॥ अंगुलैः क्रमशस्तानि सुभान्यावेष्टयेत्तंतुना ॥ प्रक्षाल्य देशि
कस्तेषु पदे वाहितशालिषु ॥ सुगंधिदर्भपुष्पेषु पश्चिमादिनिवेशयेत् ॥ महाकपिलपंचरात्रे ॥ पालिकावक्त्रविस्तारः षोडशां
गुल उच्यते ॥ भवेत्तु कंठविलं वास्यानष्टांगुलविस्तृतं ॥ पदे पीठस्य विस्तारं षडंगुलमुदाहृतं ॥ चतुरंगुल उन्नेधस्तत्संधिश्चां
गुलं भवेत् ॥ तत्स्कंधे स्तु भवेन्नाहं पदे पीठार्धमेव च ॥ भवेत्पंचमुखी चैवं घटिका सर्वकामदा ॥ चतुरंगुलविस्ताराः शरावाहुर्वक्त्रा
णि पंच वै ॥ चत्वारि च चतुर्दिक्षु ऊर्ध्वमेकं यथाविधि ॥ घटिकायाः सुविस्तारो द्वादशांगुल उच्यते ॥ आचार्याः कथयंत्येके षोडशां
गुलमेव च ॥ द्वादशांगुलविस्तारं शरावस्य मुखस्मृतं ॥ चतुरंगुलविस्तारमधस्तान्मूलमुच्यते ॥ अन्यत्रापि ॥ नालमात्रमिह
पंचमुखी स्यात् ग्रासतो ह्युपमिता घटी स्यात् ॥ दिक्षु तन्मुखचतुष्टयमेकं मध्यतस्तु समवर्तितभागं ॥ नालविस्तृतमुखं तु शराव
व्यासतो ह्युपगतार्धमिता घि ॥ दंडमस्य चतुरंगुलनाहं कंठमस्य विलवर्जमुदग्रं ॥ संभवेत्कनकरूप्यताम्रतो मार्त्तिकान्यभिन्न
वान्यथवाथ स्युः ॥ प्रयोगसारे ॥ तेषु पात्राणि विन्यसेत् ॥ वह्न्यादीशानपर्यंतं चतुष्केषु पृथक्पृथक् ॥ सारस्वतमते ॥ प्रोक्तेषु

॥ ता·प ॥ तेषुपात्रेषु ब्रह्मविष्णुशिवान्यजेत् ॥ सिद्धांतशेखरेपि ॥ संपूजयेच्छरावेषु रुद्रं चंदनपुष्पकैः ॥ पालिकासु तथा विष्णुं ब्रह्मा
॥ २८ ॥ णं घटिकासु च ॥ शारदायां ॥ करीषवालुकामृद्भिस्तानि पात्राणि पूरयेत् ॥ प्रयोगसारे ॥ मृद्वालुकाकरीषैश्चोर्द्धतपात्राणि पू
रयेत् ॥ मृत्तिकायां विशेषः सिद्धांतशेखरे ॥ गंधादिभिश्च ऊषलं पूजयित्वादिनांतरे ॥ गीतनृत्यसमायुक्तं गजवाजिसमन्वि
तं ॥ सर्वदयोरथारूढाङ्गजारूढास्तथापरे ॥ गत्वातीरं तडागस्य नद्याः पुष्पवनस्य वा ॥ तत्रशुद्धं भुवोभागं दर्भैः संमृज्य चा
स्रत ॥ अक्षुण्णवाघतोयेन तन्मंत्रं मनुस्मरन् ॥ हृदाभूमिसमावाह्य गंधपुष्पैः समर्चयेत् ॥ कुद्दालीमस्त्रमंत्रेण खात्वा
भूमिमथोमृदं ॥ गृहीत्वा वामदेवेन पूरयेत्कांस्यपात्रके ॥ हृदामृदं च संमृज्य वस्त्रेणाच्छाद्य धारयेत् ॥ पुरं वा निलयं वापि स 36
र्वमंगलनिस्वनैः ॥ गुरुः प्रदक्षिणां कृत्वा मंडपं त्वानयेत्ततः ॥ एतत्कर्म दिवाकाले कुर्यात्प्राज्ञो नबुद्धिमान् ॥ शारदायां ॥ सुधा
बीजेन बीजानि दुग्धप्रक्षाल्य तंत्रवित् ॥ मूलमंत्राभिजप्तानि पंचघोषपुरःसरं ॥ आशीर्वाग्भिर्द्विजातीनां मंगलाचारपूर्वकं
निर्वपेत्तेषु पात्रेषु देशिको यतमानसः ॥ सारस्वतमतेतु ॥ बीजानि तानि प्रक्षाल्य जलैःक्षीरेणावक्रमादिति प्रथमतो जले
नप्रक्षालनमुक्तं ॥ सिद्धांतशेखरे ॥ बीजमुख्येन मूलेन प्राङ्मुखो वाउदङ्मुखः ॥ वापयेत्सर्वबीजानि पालिकादिषु तत्क्रमा ॥ राम ॥
त् ॥ बीजानामधिपः सोमस्तस्मात्प्राज्ञोतु निर्वपेत् ॥ बीजमुख्येनेति ॥ बीजं बीजाक्षरं ॥ मुख्यमादौ यस्य तेनेत्यर्थः ॥ सारस्व ॥ २८ ॥
तमते ॥ बीजेभ्यो देवतेभ्यश्च सराज्ञो कांतिमान्यतः ॥ तस्मात्कुरुतु बीजानि निशायामेव वापयेत् ॥ शारदायां ॥ शालीश्यामा

ढकीगुञ्जतिलनिःपावसर्षपाः ॥ कुलत्थकं गुमारवाश्चवीजानं कुरकर्मणि ॥ सारस्वते ॥ स्कंदपुराणेयंगोनिष्पावेवाणुमश्विं कुल
त्थके ॥ आढक्यां निर्ऋतिसोमं मुकुंदे वै वस्त्रं तंतिले ॥ प्रजापतिं शालिवीजे त्वनंतं सर्षपे र्वयेत् ॥ इन्द्रं श्यामेतु माषे च वरुणं गोधू
नगात्मजे ॥ मिश्रान्नेश्वरे ॥ सोमं संपूजयेन्नित्यमधिवासदिनावधि ॥ अधिवासदिने प्राप्ते सोमसूक्तानि यजेद्गुरुः ॥ प्रयोगसा
रे ॥ ॐ नमो वकाय च शर्वाय शंकराय शिवाय च ॥ सर्वलोकप्रधानाय शाश्वताय नमो नमः ॥ विकीर्याने नमं त्रेण हरिद्राचूर्णमि
श्रितं ॥ तोयं प्रवर्षयेत्तेषु सिंचेत्तोयैर्दिने दिने ॥ शारदायां ॥ हरिद्राद्भिः समभ्युक्ष्य वस्त्रेणाच्छादयेद्देशिकः ॥ बलिं त्रिविधपा
त्राणां दिक्षु पूर्वादितः क्षिपेत् ॥ प्रणवाद्येन मो नैश्वरानौरानीशानामभिः ॥ वस्त्रैरितिवर्ऊवचनं कपिं जलाधिकरणाम्याये
नत्रिनत्वपरं ॥ तेनपात्रत्रयं तत्पृष्ठे यं मे केके न वस्त्रेणाच्छादयेदिति फलितं ॥ तथा ॥ भूतानि पितरो यक्षा नागा ब्रह्मा
शिवो हरिः ॥ सप्तानामपि रात्रीणां देवताः समुदीरिताः ॥ भूतेभ्यः सुर्लाजनिलहरिद्रादधिसक्तवः ॥ मान्नाः पितृभ्यः सति
लास्तंडुलाः परिकीर्तिताः ॥ करंभलाजा यक्षेभ्यो नालिकेलोदकान्वितं ॥ सक्तुपिंडं च नागेभ्यो ब्रह्मणे पंकजाक्षताः ॥ साज्यम
न्नं शर्वाय विष्णवे स्पाकुंडेदनं ॥ नवरात्रपक्षेतु ॥ वैष्णवं च वैशंस्यानं ब्रह्मारं च वैष्णवे यं यदिनवरात्रं क्रमेण बलि रुक्तं इन्या (
चार्यै रुक्तं ॥ इदं चार्यदिनद्वयेवाध्यं ॥ पंचदिनपक्षे यक्षमारभ्य ॥ दिनत्रयपक्षे ब्रह्माणमारभ्य बलिः ॥ शारदायां ॥ ततो लोके
श्वरेभ्योपि विधिवद्दिनशे बलिं ॥ सारस्वतमते ॥ प्ररूढाणां पंकुराणां प्यो नवीक्षेतकदाचन ॥ आचार्यस्तत्र विघ्ने तद्धितस्मै वात

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ना॰भ॥ दाज्ञया ॥ सिद्धान्तसारे ॥ यजमानाभिवृद्ध्यर्थमंकुराणि परीक्षयेत् ॥ सम्यक्पूर्वं प्ररूढानि कोमलानि सितानि च ॥ धूम्रवर्णान्यपू
॥२८॥ र्णानि तथा तिर्यग्गतानि च ॥ श्यामलानि वक्रभृज्ञा वर्जयेदशुभानि च ॥ अहृष्टिं कुरुते रूक्षं धूम्राभं कलहं तथा ॥ अपूर्णा जन
नाशं च दुर्भिक्षं श्यामलांकुरं ॥ तिर्यग्जाते भवेद्व्याधिः कुब्जे शत्रुभयं भवेत् ॥ अशुभेष्वंकुरे जाते शान्तिहोमं समाचरेत् ॥ मूलमं
त्रेण जुहुयात् रुद्रसूक्तैर्द्विजैः सह ॥ अघोरास्त्रेण वास्त्रेणाश्नं तेनाथ सहस्रकं ॥ सारस्वतमते ॥ प्ररूढैरंकुरैः कर्त्तुर्निर्दिशेत् शुभाशु
भं ॥ श्यामैः कृष्णैरंकुरैरर्थहानिस्तिर्यग्रूढैर्व्याधिरान्दोलितैस्तैः ॥ कुब्जैर्दुःखं दुःप्ररूढैर्मृतिं च ज्ञागाभग्नैस्थानदेशोपहानिः ॥
इत्यंकुरार्पणलक्षणं समाप्तं ॥ ॥ इति महामहोपाध्यायसत्कुरश्रीनरसिंहविरचिते ताराभक्तिसुधार्णवे द्वितीयस्तरंगः
२ ॥ अथ दीक्षाविधिः ॥ शारदायां ॥ चतुर्विधा सा संदिष्टा क्रियावत्यादिभेदतः ॥ क्रियावती वर्णमयी कलात्मा वेधमय्यपि
ताक्रमेणैव कथ्यन्ते तेनैवास्मिन् संप्रदायतः ॥ देशिको विधिवत् स्नात्वा कृत्वा पौर्वाह्णिकीः क्रियाः ॥ यायाद् दलं कृतो मौनी यागा
र्थ्यं यागमंडपं ॥ गौतमीये ॥ शिष्यः स्नातः सुवेशश्च सर्वद्रव्यसमन्वितः ॥ आचार्यं प्रणम्य याज्ञ्या वस्त्रालंकारभूषणैः ॥ कु
र्यान्नारीश्च स्वं श्राद्धं ब्राह्मणान् परितोषयेत् ॥ गोभूहिरण्यवस्त्राद्यैस्तोषयेद्गुरुमात्मनः ॥ यथा ददाति संतुष्टः प्रसन्नो वरदो ॥राम॥
मंत्रं ॥ तथा ॥ ऋत्विजं प्रणम्य यान्तं दशपञ्चकयं तथा ॥ यामले ॥ ततः आचमनं कृत्वा शिष्योपि विजितेन्द्रियः ॥ आजन्मपा ॥२८॥
पनाशार्थं मन्त्रेण तिलकांचनं ॥ शारदायां ॥ गुरुपरपक्रम्य ॥ आचम्य विधिना तत्र सामान्यार्घ्यं विधाय च ॥ द्वारमस्त्राद्भिः

37

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ःप्रोक्तप्रकारपूजांसमाचरेत् ॥ स्नानसंध्यातर्पणाद्वारपूजादिकंनित्यार्चनतरंगेवक्ष्यते ॥ तथा ॥ किंचित्स्पृशन्वामशाखांदेहलीलं
घयेद्गुरुः ॥ अंगसंकोचयत्नेनः प्रविश्यदक्षिणांघ्रिणा ॥ नैर्ऋत्यांचैववास्त्वीशंब्रह्माणंचसमर्चयेत् ॥ पंचगव्यार्घतोयाभ्यां
प्रोक्षयेद्यागमंडपं ॥ चतुःपथांतानकुट्टिंविदध्याद्वीक्षणादिभिः ॥ वीक्षणंमूलमंत्रेणशस्त्रेणाप्रोक्षणंमतं ॥ तेनैवताडनंकु
र्याद्वर्मणाभ्युक्षणंमतं ॥ चंदनागरुकर्पूरैर्धूपयेदंतरंसुधीः ॥ विकिरान्विकिरेत्तत्रसप्तान्शारागुना ॥ लाजचन्दनसिद्धार्थ
भस्मदूर्वांकुराक्षताः ॥ विकिराइतिसंदिष्टाः सर्वविघ्नौघनाशनः ॥ अस्त्रजप्तेनदर्भाणांमुष्टिनांमार्जयेच्चतान् ॥ ईशस्यदिशि
वर्धन्याआसनायप्रकल्पयेत् ॥ सोमशंभौतुविकिरान्शुद्धलाजासप्रशस्त्राभिमंत्रितान् ॥ अस्त्रांबुप्रोक्षितान्नेतान्कवचेना
वगुंठितान् ॥ नानाप्रहरणाकारान्विघ्नौघविनिवारकान् ॥ दर्भाणांतालमानेनकृताःषट्त्रिंशतादलैः ॥ सप्तजप्ताशिवास्त्रे
णामुष्टिर्बोधयेसज्ञमेस्मृतः ॥ शारदायां ॥ पुण्याहंवाचयित्वाचब्राह्मणान्परितोष्यच ॥ उक्तेषुमंडपेष्वेकंवेदिकायांसमा
लिखेत् ॥ मंडलंसर्वतोभद्रादि ॥ तत्रसर्वतोभद्रमंडलंयथा ॥ शारदायां ॥ चतुरस्रेचतुःकोष्ठेकर्णसूत्रसमन्विते ॥ चतुर्धापि
चकोष्ठेषुकोणसूत्रचतुष्टयं ॥ मध्येमध्येयथामत्स्याभवेयुःपातयेत्तथा ॥ पूर्वापरायतेद्वेद्वेमंत्रीयाम्योत्तरायते ॥ पातये
त्तेषुमत्स्येषुसमंसूत्रचतुष्टयं ॥ पूर्ववत्कोणकोष्ठेषुकर्णसूत्राणिपातयेत् ॥ यावद्गतद्वयंमंत्रीषट्पंचाशत्पदान्यपि ॥
तावत्तेनैवविधिनातत्रसूत्राणिपातयेत् ॥ षट्त्रिंशतायदैर्मध्येलिखेत्पद्मंसलक्षणं ॥ बहिःपंक्त्याभवेत्पीठंपंक्तियुग्मेनवीथि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना·भ ॥
॥ २९ ॥

काः ॥ द्वारशोभोपशोभास्त्रानृशिष्टाभ्यां परिकल्पयेत् ॥ शास्त्रोक्तविधिना मंत्री ततः पद्मं समालिखेत् ॥ पद्मक्षेत्रस्य संत्यज्य वा
दशांगं बहिः सुधीः ॥ तन्मध्यं विभजेद्वृत्तैस्त्रिभिः समविभागतः ॥ आद्यं स्यात्कर्णिकास्थानं केसराणां द्वितीयकं ॥ तृतीयं तत्र
पत्राणां सक्तांशेन दलाग्रकं ॥ बाह्यवृत्तांतरालस्य मानं यद्विधिना सुधीः ॥ निधाय केसराग्रेषु परितोर्धनिशाकरान् ॥ लि
खित्वा संधिसंस्थानि तत्र सूत्राणि पातयेत् ॥ दलाग्राणां वयन्मानं तन्मानं वृत्तमालिखेत् ॥ तदंतरालं तन्मध्यसूत्रस्यो
भयतः सुधीः ॥ आलिखेद्बाह्यहस्तेन दलाग्राणि समंततः ॥ युग्मशो दलमूलेषु केसराणि प्रकल्पयेत् ॥ एतत्साधार
णं प्रोक्तं पंकजं तत्र वेदीभिः ॥ पदानि त्रीणि पादार्थे पीठकोणेषु मार्जयेत् ॥ अवशिष्टैः पदैर्विद्वान् पीठगात्राणि कल्पयेत्
पदानि वीथिसंस्थानि मार्जयेत्पंक्तिभेदतः ॥ दिक्षु द्वाराणि रचयेद्द्विवनुः कोष्ठकैस्ततः ॥ पदैस्त्रिभिरथैकैकं शोभाः स्युर्द्वारपा
र्श्वयोः ॥ उपशोभाः स्युरेकेन त्रिभिः कोष्ठैरनंतरं ॥ अवशिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयं ॥ रंजयेत्पञ्चभिर्वर्णैर्मंडलं
तन्मनोहरं ॥ पीतं हरिद्राचूर्णं स्यात् सितं तंडुलसंभवं ॥ कुसुंभचूर्णमरुणं कृष्णं दग्धपुलाकजं ॥ विल्वादिपत्रजं श्याममि
त्युक्तं पंचवर्णकं ॥ अन्यत्रारुणांतरमुक्तं ॥ तथा सोपारजः क्षारसंयुक्तं तद्वत्तदिति ॥ श्यामांतरमुक्तं प्रयोगसारे ॥ श्यामं श्या
मकसोढ्रंतरजः प्रोक्तं सुकर्मसु विति ॥ तंत्रांतरे तु विशेषः ॥ शक्तस्तु वांछेद्यदि सिद्धिमुग्रां तदर्णरत्नैरिह मंडलानि ॥ आसूत्र
येन्मौक्तिकपुष्परागमाणिक्यनीलैर्हरितैश्च रत्नैः ॥ महाकपिलपंचराज्ञेत्वस्या वश्यकतोक्ता ॥ पीतं क्षितिस्तु विज्ञेया भक्त

॥ रा·प ॥
॥ २९ ॥

38

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मापः प्रकीर्तिताः ॥ तेजो वै रक्तवर्णास्यात् श्यामं वायुः प्रकीर्तितः ॥ आकाशं कृष्णवर्णं तु पंचमे तु महाप्रभे । सितेऽधिदेवता रु
द्रो रक्ते ब्रह्माधिदेवता ॥ पीतेऽधिदेवता विष्णुः कृष्णे चैवाच्युतः स्मृतः ॥ श्यामेऽधिदेवता नागः समाख्यातो मया नघ ॥ भूलोक
हा पदं हंति रक्तं क्रूरग्रहोद्भवां ॥ कृष्णः सर्वासुरोत्साहं नीलं वैनायिकीं तथा ॥ पैशाचीं राक्षसीं चैव वह्नि हंति हरितं रज ॥ तस्मा
द्धोमेऽभिषेके च यागे चैव विशेषतः ॥ वर्तयेन्मंडले नैक्कदेवसंतुष्टिकारकं ॥ शारदायां ॥ अंगुलोत्सेधविस्ताराः सीमारेखा
ः सिताः शुभाः ॥ कर्णिकां पीतवर्णेन केसरारुणरोचनैः ॥ शुभ्रवर्णानि पत्राणि तत्संधीन् श्यामलेन च ॥ रजसा रंजयेन्मंत्री
यद्वा पीतेन कर्णिका ॥ केसराः पीतरक्ताः स्युरुरूणानि दलान्यपि ॥ संधयः कृष्णवर्णाः स्युः पीतेनाथ सितेन वा ॥ रंजयेत्पीठ
गर्भाणि पदाः स्युररुणप्रभाः ॥ गात्राणि तस्य शुक्लानि वीथी शुक्लेऽप्यपि ॥ आलिखेत्कल्पलतिकादलपुष्पसमन्विता
वर्णैर्नानाविधैश्चित्राः सर्वदृष्टिमनोहराः ॥ गौतमीये तु ॥ तद्बहीरुविरान् कुर्याच्च तुरः कल्पशाखिनः ॥ ललितान्रूढकुसुमा
न् फलपल्लवशालिनः ॥ जलजैः स्थलजैश्चापि सुमनोभिः समन्वितान् ॥ हंससारसकारंडभृंगभ्रमरकोकिलैः ॥ मयूर
चक्रवाकाद्यैरारूढविटपांतरानिमुक्तं ॥ शारदायां ॥ द्वाराणि रक्तवर्णानि शोभा रक्ताः समीरिताः ॥ उपशोभाः पीतवर्णाः
कोणान्यसितभासि च ॥ त्रिस्रो रेखा बहिः कुर्यात्सितरक्तासिताः क्रमात् ॥ मंडलं सर्वतोभद्रमेतत्साधारणं स्मृतं ॥ वसिष्ठ
संहितायां तु विशेषः ॥ पीतं पूर्वे सितं देयं पश्चिमे पुत्तरे तथा ॥ रक्तं तु दक्षिणे कृष्णं याटलं वह्निसंस्थितं ॥ नैर्ऋत्ये नीलव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ना॰ भ ॥ तु वायव्ये धूम्रवर्णकं ॥ ईशे गौरं विनिर्दिष्टं मष्टपत्रेष्वयं क्रमः ॥ ततआसनउपविष्टप्रभूतशुद्धिमान् कान्यासविशेषन्यासान्त
॥ ३० ॥ र्यजनार्घ्यस्थापनादिविधायसर्वतोभद्रमंडलकमलोपरि आधारः शक्त्यादिपीठमंत्रपर्यंतं संपूज्य कलशस्थापनं कुर्यादि
तिसकलतंत्रक्रमः ॥ शारदायां ॥ हेमादिरचितं कुंभ मस्राद्भिः क्षालितान्तरं ॥ चंदनागुरुकर्पूरधूपितं शोभनाकृति ॥ आवे
ष्टितांगं नीरंध्रं तंतुनात्रिगुणात्मना ॥ अर्चितं गंधपुष्पाद्यैः कूर्चाक्षतसमन्वितं ॥ नवरत्नोदरं मंत्री स्थापयेन्नारदस्त्वरन्
तंत्रराजे ॥ सप्तविंशतिदर्भाणां वेणीग्रंथिविभूषितं ॥ वेष्टयेत्सर्वयज्ञेषु तन्तुं वै परिकीर्तितं ॥ शारदायां ॥ स्कांसे कल्प
कुंभस्य पीठस्य च विधानवित् ॥ क्षीरद्रुमकषायेन पलाशत्वग्भवेन वा ॥ तीर्थोदकैर्वा कर्पूरगंधपुष्पसुवासितैः ॥ आत्मा 39
भेदेन विधिवन्यासं कांप्रतिलोमतः ॥ जपेन्मूलमंत्रं तदनु पूरयेद्देवताधिया ॥ शंखेवकाथं तु संपूर्णं गंधाष्टकमभीष्टकं ॥
विलोक्य पूजयेत्तस्मिन्नावाह्य सकलाः कलाः ॥ दशवह्नेः कलाः पूर्वं द्वादशार्कादशात्मनः ॥ षोडशापि च सोमस्य पश्चात्पंचा
शतं कलाः ॥ जपित्वा प्रतिलोमेन मूलमंत्रं च मंत्रवित् ॥ समाहितेन मनसा ध्याये मंत्रस्य देवता ॥ प्राणप्रतिष्ठां कुर्वीत तत
त्र नेत्रविवस्वराः ॥ कलात्मकं शंखसंस्थं क्वाथं कुंभे विनिःक्षिपेत् ॥ चंदनागुरुकर्पूरचोरकुंकुमरोचनाः ॥ जटामांसीकपी ॥ राम ॥
तनाशकं गंधाष्टकं विदुः ॥ इति ॥ हेमाद्रीति आदि पदात् जननादिः चोरो भटउरइति प्रसिद्ध ॥ कपिर्गोठि मनइति प्रसिद्धः ॥ म ॥ ३० ॥
लकपिलपंचरात्रे ॥ सौवर्णं कलशं रम्यं रौप्यं ताम्रमथापि वा ॥ निर्दोषं मृण्मयं वापि चंदनेनविलेपितमिति ॥ कलशपरि

मारोत्तु ॥ पंचाशदंगुलव्यासउत्सेधः षोडशांगुल ॥ कलशानांप्रमाणं तु मुखमष्टांगुलं भवेदिति तंत्रांतरे प्रोक्तं ॥ वायवीयसंहि
तायांमपि ॥ सौवर्णाराजतं वापि ताम्रं मृण्मयमेव वा ॥ गंधपुष्पाक्षताकीर्णांकुशद्दूर्वांकुरार्चितं ॥ सितसूत्रावृत्तकंठेन
नवस्त्रयुगान्वितं ॥ ततो विशेषसंज्ञां तंत्रे ॥ कन्याकर्त्तितसूत्रेणाग्निगुणेन ववर्मणा ॥ गुणात्रयात्मकेनैव वेष्टयेद्दभितःस
मभिति ॥ शारदायां ॥ पश्चादश्वत्थपनसचूतकोमलपल्लवैः ॥ इंद्रवल्लीसमावद्धैः मुरडुमधियागुरु ॥ कुंभवक्त्रं पिधाया
स्मिंश्चषकं सफलाक्षतं ॥ संस्थापयेत्फलधियाविधिवत्कल्पशाखिनो ॥ ततः कुंभनिर्मलेन क्षौमयुग्मेन वेष्टयेत् ॥ मू
लेन मूर्त्तिमिष्ट्वास्मिन् शारदायां कल्पशाखिनो ॥ आवाह्य पूजयेत्तस्यां मंत्री मंत्रस्य देवता ॥ तथा ॥ अंगानिलोकपालानेय
जेदावरणान्यपि ॥ पंचायतनदीक्षायक्षेयं व कलशान्संस्थाप्य तत्तद्देवतामावाह्य पूजयेत् ॥ प्रोक्तेनैव कलशविधिनैके
नवानेकंकुंभैरितिप्रपंचसारवचनात् ॥ तत्र देवतास्थापनउक्तोत्तानमालायां ॥ यदा तु शंकरं मध्ये ऐशान्यां श्रीपतिं यजे
त् ॥ आग्नेय्यां च तथा हंसं नैरृत्यां पार्वतीसुतं ॥ वायव्यां च सदा पूज्या भवानी भक्तवत्सला ॥ यदा तु मध्ये गोविंदमैशान्यां श
करं यजेत् ॥ आग्नेय्यां गणनाथं च नैरृत्यां तपनं तथा ॥ वायव्यामंबिकां चैव यजेन्मंत्री समाहितः ॥ सहस्रांशु यदा मध्ये ऐ
शान्यां पार्वतीपतिं ॥ आग्नेय्यां मेकदंतं च नैरृत्यां मच्युतं यजेत् ॥ वायव्यां पूजयेद्देवीं भोगमोक्षैकभूमिकां ॥ भवानी तु य
दा मध्ये ऐशान्यां माधवं यजेत् ॥ आग्नेय्यां पार्वतीनाथं नैरृत्यां गणनायकं ॥ प्रद्योतनं तु वायव्यामावार्यैस्तु प्रपूजयेत् ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेरंबंतुयजेन्मध्येईशान्यामच्युतंयजेत् ॥ आग्नेय्यांपंचवक्त्रंतुनैर्ऋत्यांजगदंबिकां ॥ वायव्यांतुमणिंदेवंयजेन्मंत्रीहुतंततः ॥ स्वस्थान
वर्ज्जितादेवाःशोकदुःखभयप्रदाः ॥ तन्मंडलस्थितोराजासाधकश्चविनश्यति ॥ तंत्रांतरे ॥ शंभौमध्यगतेहरीनहरभूदेवाहरौशंक
रेभास्मेनागसुतारवौहरगणेशांबिकास्थापिताः ॥ देव्याविष्णुहरैकदंतरवयोलंबोदरेजेश्वरार्येनाःशंकरभागतोनिगदि
ताव्यस्तास्तुनेहानिदाः ॥ पूजाक्रमस्तुतंत्रांतरे ॥ पुष्पपुष्पांजलिंदत्वागणेशार्चनंभवेत् ॥ गणेशस्यवमुखश्चेनत्वसूर्यक्र(
माद्भवेदिति ॥ चामुंडातंत्रे ॥ इणमायांभैरवीतांराध्यित्वमस्तासुभैरवे ॥ मंजुघोषेतथारौद्रेपंचाग्नेनेष्यतेबुधैः ॥ पंचाग्नो
यागःपंचायतनदीक्षाहृपः ॥ शारदायां ॥ दक्षिणेस्थंडिलंकृत्वातत्राधायहुताशनं ॥ संस्कृत्यविधिवद्विद्वान्वैश्वदेवंस
मावरेत् ॥ तत्रसंपूज्यगंधाद्यैर्देवतांशुक्तविग्रहां ॥ तारव्याहृतिभिर्हुत्वामूलमंत्रेणमंत्रवित् ॥ सर्पिष्मतापायसेनपंच
विंशतिसंख्यया ॥ हुत्वाव्याहृतिभिर्भूयोगंधाद्यैःपुनरर्चयेत् ॥ तांयोजयित्वापीठस्थमूर्त्तौवह्निंविसर्जयेत् ॥ अवशि
ष्टेनहविषाविकिरेत्परितोवलिं ॥ देवतायाःपार्षदेभ्योगंधपुष्पाक्षतान्वितं ॥ अत्रवैश्वदेवपदेननित्यहोमएवउच्य
ते ॥ सर्वदेवसंबंधित्वशुभत्वेरितिकौमुदीकृतः ॥ नित्यहोमाङ्गिन्नएवायंवह्निसंस्कारश्रुते ॥ अग्न्याधानादिकंकर्मनि
त्यहोमेनविद्यतइतिवसिष्ठसंहितायांनित्यहोमवह्निसंस्कारनिषेधात् ॥ एतद्धोमानंतरंचलौकिकाग्नौपरिषिच्यततो
देविनित्यहोमंसमाचरेत् ॥ मूलमंत्रेणदेवेशिहुनेत्पंचाहुतीःक्रमात् ॥ प्राणायापानौतथाव्यानउदानश्चसमानकः ॥ ए

॥ रम ॥
॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्स्वरूपंज्ञानीयाद्धाहुतीनांचपंचकं ॥ षडाहुतीः षडंगेषुनित्यहोमोयमीरितः इति ॥ ज्ञानार्णवोक्तनित्यः होमकार्यइतिरा
घवभट्टाः ॥ तन्न ॥ अत्रतंत्रांतरेक्तविदपिवैश्वदेवस्यकर्मांतरत्वाश्रुतः ॥ नित्यनैमित्तिकेकाम्येएतदग्निमुखंस्मृतः ॥ मित्र
गत्तिसंहितायांनित्यहोमेपिवह्निसंस्कारश्रुतेश्च ः तस्मान्नित्यहोमेशारदाज्ञानार्णवोक्तक्रमयोर्विकल्पएवेतितत्वं ॥ शा
रदायां ॥ सहस्राष्टसंख्यासंजप्यमूलमंत्रमनन्यधीः ॥ तंजपंसर्वसंपत्त्यैदेवतायैसमर्पयेत् ॥ ततः शंभोर्दिशिगुरुर्विकि
रेत्पूर्वसंचिते ॥ हेमवस्त्रादिसंयुक्तांकर्करीतोयपूरितां ॥ संस्थाप्यतस्यांसिंहस्थांखड्गखेटकधारिणीं ॥ घोररूपांपश्चि
मास्यांपूजयेदस्त्रदेवतां ॥ वलासनेनसंपूज्यतामादाययगुरुः पुनः ॥ रक्षेतिलोकपालानांनालयुक्तेनवारिणा ॥ देवा
ज्ञांश्चावयन्नेतः परितम्पप्रदक्षिणां ॥ अस्त्रमंत्रंसमुच्चार्ययथापूर्वंनिवेशयेत् ॥ अभ्यर्च्यभूयोगंधाद्यैर्वस्त्रेणतस्याःस्थि
रासनः ॥ ततश्चसंस्कृतेवह्नौगोक्षीरेणचरुंपचेत् ॥ अस्त्रेणक्षालितेपात्रेनवेताम्रमयादिके ॥ तंदुलान्शालिसंभूतान्मू
लमंत्राभिमंत्रितान् ॥ प्रसृतीः पंचदशभिः क्षिप्त्वाचास्त्रमनुंजपेत् ॥ प्रक्षाल्यपात्रवदनंपिधायकवचात्मना ॥ प्राङ्मु
खोमूलमंत्रेणादेशिकेन्द्रश्चरुंपचेत् ॥ स्रुवेणाज्येनसंपन्नेदद्यात्तत्राभिघारणं ॥ मूलेनपश्चात्तत्पात्रंकवचेनावतारये
त् ॥ अस्त्रजप्तकुशास्तीर्णेमंडलेविधिवद्गुरुः ॥ तंविभज्यत्रिधाभागमेकंदेवायकल्पयेत् ॥ आचार्यकर्तव्यत्वात् ॥ तदुक्तंप्र
योगसारे ॥ ॐडमस्त्रेणासंप्रोक्ष्यतत्राधायहुताशने ॥ सान्नाधानादिकंदेवंयथावत्पूजयेत्ततः ॥ कृत्वातंदुलनिर्वापंत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

॥ ना॰ भ ॥
॥ ३२ ॥

स्मिन्क्षीरे पचेच्चरुमिति ॥ अन्यमग्नौ प्रकुर्यादिति आचार्यऋत्विकयोर्विशेषः ॥ ततत्कमस्तु नचैव ॥ आचार्यकुंडे आचार्यकर्त्र
याग्निसंस्कारमुक्त्वा ॥ ततोन्येष्वपि कुंडेषु संस्कुर्वीत यथाविधि ॥ आचार्योविहरेदग्निं पूर्वादिषु समाहितः ॥ ऋत्विजोगंधपुष्पाद्यै
रंगाद्यावरणान्वितं ॥ तेषोक्तदेवतामिष्ट्वा पंचविंशतिसंख्यया ॥ मूलेनाज्येन जुहुयुः साज्येनचरुणा तथे मुक्तः ॥ कुंडान
रसंस्कारस्तत्रऋत्विक्कर्तृकः शिष्यगोति ॥ अत्रविशेषः सोमशंभौ ॥ वरोक्तनीयभागं तु ग्रासमत्तनयसंमितं ॥ अष्टग्रासप्रमा
णं वा दशनस्पर्शवर्जितं ॥ पालाशोदुंबके प्रक्षोऽप्यर्कोपिप्पलपत्रके ॥ हुत्वा संभोजयेन्मन्त्री घृतेनाचामयेज्जलैः ॥ शारदायां
आचांतं शिष्यमानीय सकलीकृत्य देशिकः ॥ तालद्रुमाग्रं हृज्ज प्रक्षीरवृक्षादिसंभवं ॥ दंतकाष्टं ततो दद्याच्छिष्याय विनता
त्मने ॥ दंतान्विशोधयेत्तेन ततः प्रक्षाल्य विसर्जयेत् ॥ नारायणीये ॥ दंतकाष्ठं हृद्याज प्रक्षीरवृक्षादिसंभवं ॥ संमार्ज्य दंता
नच्छित्वा प्रक्षाल्य नैऋते क्षिपेत् ॥ दिक्षु पूर्वायधोर्ध्वासु तस्याग्रपतनं क्रमात् ॥ मृष्टिता पोष्टनिर्विघ्नक्षयं शांतिर्गदोधनं ॥ सु
खं वृद्धिः परं दुःखं फलान्येतानि शंसति ॥ वायवीयसंहितायामपि ॥ न्यक्तं तदंतधवनं ह्यपनेत्तरुणायदि ॥ प्रागुदक्पश्चिमे शांतं शिव
मन्यच्छिवेतरं ॥ अशस्तास्तासु खेतस्मिन्गुरुस्तदोषशांतये ॥ शतमर्धं वा जुहुयात्तदर्धं मूलमंत्रकं ॥ तेषां तरे ॥ अथात्रदूतन्हृक्षस्य द्वा ॥ राम ॥
दशांगुलमानतः ॥ दंतकाष्ठं प्रदातव्यं तद्दंताग्रविवर्धितं ॥ दुर्नां सप्लक्षेपयेत्तत्र मंडलेपीठमुन्नयेत् ॥ पश्चिमोत्तरदुर्दैश्च शुभपातोन्यथा ॥ ३२ ॥
शुभः ॥ दुर्निमित्तविनाशाय जुहुयाद्धुतमस्त्रतः ॥ शारदायां ॥ यथाविधि तमाचांतं शिखाबंधाभिरक्षितं ॥ विधायसार्धमस्त्रेनावेद्यां द

41

र्भास्तरे ग्रहः॥ इशानत नस्यां तां रात्रिमधिवासः समीरितः॥ नारायणीये॥ उनस्तं शिष्यमावां ते शिरवावंधाभिरक्षितं॥ कृत्वा वेगांस
हानेनस्वयेदर्भास्तरे ग्रहः॥ पिंगलामते॥ स्वप्नमाणवमाश्रित्यस्नापयेन्मूर्वमस्तकं॥ सोमशंभावपि॥ गृहस्यान्दर्भशय्यायां पूर्व
शीर्षास्तरक्षितान्॥ हृदासजन्मशय्यायां यतीन्दक्षिणामस्तकान्॥ वायवियसंहितायां॥ देवस्यदक्षिणे भागे शिष्यं तमधिवासये
त्॥ अहतास्तरणास्तीर्णे सदर्भशयनेशुचि॥ मंत्रितेन वशिष्यं धायन्प्राक्शिरस्को निशि स्वापयेत्॥ शिखाबद्धस्य सूत्रस्य शिखया तत
छिखांगुरुः॥ आवेष्ट्याहतवस्त्रेण नमास्याय वर्मणा॥ रेखात्रयं च परितो भस्मनातिलसर्षपैः॥ कृत्वास्त्रजप्तैस्तद्बाह्ये दिगीशा
नां बलिं हरेत्॥ महाकपिलपंचरात्रे॥ गुरुपादार्चनं कृत्वा उपवासी जितेन्द्रियः॥ दर्भशय्यां गतो रात्रौ दृष्ट्वा स्वप्नं निवेदयेत्॥ यो
गिनी तंत्रे॥ यज्ञाग्रतो हरगृहे ति देवमानृत्य मंत्रान्प्रयतनिद्रिरेतान्॥ लब्धे कंभुकदक्षिणपार्श्वशायी स्वप्नं परीक्ष्येत यथोपदे
शं॥ भगवन्देवदेवेश शूलभृद्वृषवाहन॥ इष्टानिष्टं समाचक्ष्व मम सुप्तस्य शाश्वत॥ एवं गुरुः कुशास्तीर्णे तनः प्रयतमानसः॥
निशांते पश्यति स्वप्नं शुभं वा यदि वाऽशुभं॥ पिंगलामते॥ तारोहिलिखयेभूलपाणयेद्विठईरितः॥ स्वप्नमाणवमंत्रोयं शंभुना परि
कीर्तितः॥ नमोऽजयत्रिनेत्राय पिंगलाय महात्मने॥ वामाय पिंगलाय महात्मने॥ वामाय विश्वरूपाय स्वप्नाधिपतये नमः॥ स्वप्नेक
थयमेतत्थ्यं सर्वकार्येष्वशेषतः॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वरः॥ मंत्रतंत्रप्रकाशे॥ ॐ हंसकललोकायविप्लवे वि
श्वायविश्वरूपाय स्वप्नाधिपतये नमः॥ स्वप्नमाणवमंत्रोयं कथितो नारदादिभिः॥ नारदीये॥ परंब्रह्मस्वरूपत्वं मे तथ्वरक्षिवि श्व

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ता॰ भ ॥ धक॥ शुभाशुभ गतिं देवस्वप्ने मे विनिवेदय॥ इत्युच्चार्य नमस्कुर्यात्तत्तु भ्याम अवनीं गतः॥ प्रसन्नो वाग्पतत्तस्मिन् शायी ते दृष्टं विवि
॥ २३ ॥ नयेत्॥ ॥अथ शुभस्वप्नाः॥ योगिनीतंत्रे॥ त्रिविधं दर्शनं तस्य यथार्थमयथार्थकं॥ अपाकं जं यन्तुस्थानां संयतानां हि दर्शनं
यथार्थमयथार्थं तद्दुस्थानां विकारजं॥ अपाकजं मानसं च यथार्थफलमुच्यते॥ आगमसिद्धांते॥ आद्ये वर्षाद्वत्सरार्धाद्द्वि
तीये यामे पाको वर्षपादात्तृतीये॥ यामे पाकः शर्वरीतुर्ययामे सद्यः पाको योविसर्गे प्रदृष्टः॥ तथा॥ क्रूरे धमामध्यमा स्याद्दृ
ष्टे उत्तमोत्तमे॥ स्वप्ने यः पश्यति वै देवं निजेष्टं सर्वतो मुखं॥ गुरुप्रसादमुत्सर्वं निर्मलं चंद्रमंडलं॥ गंगां गां भारतीभानुलिंगितं
लिंगमैश्वरं॥ प्रसन्नत्वां तत्र जानीयात्सिद्धिं तु स्वप्ननिदर्शने॥ नारदपंचरात्रे॥ क्षितिलाभः क्षतजाक्षितरणां वाथिपूजनं॥ होमश्च ४२
ज्वलिते वह्नौ संग्रामविजयस्तथा॥ हंसकोकमयूराणां रथारोहणमेव च॥ महाकपिलपंचरात्रे॥ कन्याछत्ररथं दीपं प्रासा
दं कमलं नदीं॥ कुंजरं वृषभं माल्यं समुद्रं फलितं द्रुमं॥ पर्वतं वहयं मेध्यमामममांसं सुरासवं॥ एवमादीनि सर्वाणि दृष्ट्वा सिद्धि
मवाप्नुयात्॥ यदा कर्मसु काम्येषु स्त्रियं स्वप्ने तु पश्यति॥ समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने॥ नदीसमुद्रतरणमाकाश
गमनं तथा॥ भास्करोदयनं चैव प्रज्वलनं ऊताशनं॥ ग्रहनक्षत्रताराणां चंद्रमंडलदर्शनं॥ हर्म्यस्यारोहणं चैव प्रासादशिरसो ॥ ताम ॥
पि वा॥ नागाश्ववृषभेन्द्राणां तरुशैलाग्ररोहणं॥ विमानगमनं चैव सिद्धमंत्रस्य दर्शनं॥ एवमादीनि संदृष्ट्वा नरः सिद्धिमवा ॥ २३ ॥
प्नुयात्॥ स्वप्ने तु मदिरापानमाममांसस्य भोजनं॥ कृमिविष्ठानुलेपं च रुधिरेणाभिषेचनं॥ भोजनं दधिभक्तस्य श्वेतवस्त्रानुले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पनं ॥ सिंहासनं रथं यानं ध्वजं राज्याभिषेचनं ॥ रत्नान्याभरणादीनि दृष्ट्वा स्वप्ने प्रसीदति ॥ नारदपंचरात्रे ॥ गुरुर्देवो द्विजः कन्या गो
गजाश्वाश्च केसरी ॥ दर्पणं शंखभेर्यौ च नगरी वाद्यं च रोचनं ॥ तांबूलभक्षणं चैव तथा दध्यभिवंदनं ॥ सिद्धान्नं मांसमत्स्यं च मद्यं स्त्री
मदिरा रसाः ॥ छत्रं यानं सितं वस्त्रं तथान्यक्कृतवंदनं ॥ माल्यं मुक्ताफले हारः पूर्णः समुदितः शशी ॥ प्रचंडकिरणः सूर्यो निम्न
गाथ महोदधिः ॥ प्रफुल्लपादपः शालि रोचना कुंकुमं मधु ॥ लाजाः सिद्धार्थका बीजं नवभांडं च पायसं ॥ उपसन्नोपि वाचार्यो गायत्री
वरसंगना ॥ सर्वे स्वप्ने शुभाः प्रोक्ताः सिद्धिमोक्षफलप्रदाः ॥ नारदीये ॥ ग्रहणां नुपरं खीरणा मगम्यागमनं तथा ॥ दर्शनं श्वेतनागेन वंध
नं भूरखलादिभिः ॥ रोदनं नाडनं चैव वधाचनं वांगघातनं ॥ मृत्योर्हदन्नपुकांस्यस्पर्शी सकसाप्यकुत्सितान् ॥ धातोर्लाभस्तथा शुक्लं फल
रत्नं तु भावपि ॥ व्यंजनं स्वयमन्येन धमनं च विभावसोः ॥ एवमादीनि चान्यानि शुभान्याह मनीषिणः ॥ ॥ अथाशुभाः ॥ नारदपंच
रात्रे ॥ अतोन्ये विपरीतास्तु मनसः खेदराश्वये ॥ गर्हिता लोकविद्विष्टाः स्वप्ने स्युरशुभावहाः ॥ महाकपिलपंचरात्रे ॥ चंडालेक
रभं कांकं गर्तभूतममंगलं तैलाभ्यंगं नरं नग्नं शुष्कः वृक्षं सकंटकं ॥ प्रासादमतलं दृष्ट्वा नरो रोगमवाप्नुयात् ॥ कपिल दृष्ट्वा दुःस्व
प्नकं दैव होमान्ति द्धिमवाप्नुयात् ॥ पिंगलामते ॥ शुभेशुभं भवेन्नस्य जुहुयाद् शुभे शतं ॥ अस्त्रे गोतिक्रमाद्विगुणमिति ॥ नारदपंचरा
त्रे ॥ दृष्ट्वा समाचरेद्धोमं दंतकाष्ठादि तंतुने ॥ केवलेनाथवाज्येन नृसिंहमंत्रेण शांतये ॥ नारदपंचरात्रे ॥ दृष्ट्वा समाचरेद्धोमं दंतका
ष्ठादितंतुने ॥ केवलेनाथवाज्येन नृसिंहमंत्रेण शांतये ॥ निबंधे ॥ ॐ वज्रनखदंष्ट्रायुधाय महासिंहाय हुं फट् ॥ नम इति सिंहमंत्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तथाः ॥ शतं तं सहस्रं साष्टं वा यथाशक्त्याथवा द्विजः ॥ अस्वप्नं पुनि तेनैषां नाम्ना स्वाहान्वितेन च ॥ दोषान् संहि जहीत्येवं पदेनाभाव
मानतः ॥ अस्वप्निं हि मंत्रयो विकल्पः ॥ नारदीये ॥ भक्षणं पक्वमांसस्य करणं नासादिकर्तनं ॥ लेपनं रक्तगंधेन कर्दमेनापि लेपनं ॥
वेष्टनं रक्तसर्पेण रक्तमाल्येन वेष्टनं ॥ आलिंगनं च ऊसंस्त्रीणां हसनं नर्तनं तथा ॥ खरोष्ट्रमहिषाणां च दर्शनारोहणक्रिया ॥ पा
तनावेशनाभ्यंगं दक्षिणाशागमनं तथा ॥ वमनं रुधिरादीनां लाभस्तेषां तथैव च ॥ अंगभंगो घननिद्रा च यमकिंकरदर्शनं ॥ दिव्य
भौमांतरीक्षाणामुत्पातानां च दर्शनं ॥ नृपगोगुरुविप्राणां भर्त्सनं विषभक्षणं ॥ दर्शनं भीमसर्पाणां पुंसि मैथुनमेव च ॥ एवमा
दीनि चान्यानि गर्हितानि विदुर्बुधाः ॥ गुरुस्तत्प्रतिकाराय सहस्रं प्रजपेन्मनुं ॥ तिलैः सहस्रं च हुनेद्देवं शांतिमुदीरयेत् ॥ अथ
स्वप्ननिवेदनं ॥ तत्रैव ॥ शिष्यस्तु त्रिरात्रांतः पुष्पहस्तो गुरूत्तमं ॥ प्रणम्य शिरसा हृष्टस्तस्मै स्वप्नं निवेदयेत् ॥ स्वप्ने वाक्षिसम
क्षं वा आश्चर्यमपि हर्षदं ॥ अकस्माद्यदि वा पश्येत्तत्राख्यातव्यं गुरोर्द्विना ॥ महाकपिलपंचरात्रे ॥ गुरुपादार्चनं कृत्वा उपवासी
जितेंद्रियः ॥ दर्भशय्यां गतो रात्रौ दृष्टं स्वप्नं निवेदयेत् ॥ अत्रोपवासविधिः ॥ कालांतरीयस्वप्नपरीक्षापरः ॥ दीक्षायां प्रोक्त
पायसभोजनस्यावश्यकत्वात् ॥ पिंगलामते ॥ सर्वाधिवासमथवा प्रकुर्वीत यथाविधि ॥ मंत्रतंत्रप्रकाशे ॥ दिनद्वयेनैव कुर्याद्दी
क्षाकर्मविचक्षणः ॥ सर्वाधिवासनेवास्मादेकस्मिन् दिवसे यदि ॥ ॥ अथोक्तहोमोपयुक्ताग्निसंस्कारः ॥ तत्र प्रथमं कुंडसंस्कारो
यथा ॥ शारदायां ॥ अष्टादश स्युः संस्काराः कुंडानां तंत्रदेशिताः ॥ वीक्षणं मूलमंत्रेण शरेण प्रोक्षणं मतं ॥ तेनैव ताडनं मैर्वर्मणा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुक्षणं मतं ॥ अस्त्रेणाखननोद्धारौ हुम्मंत्रेणाभ्युक्षणं ॥ समीकरणमस्त्रेण सेचनं वर्मणा मतं ॥ कुट्टनं हेति मंत्रेण वर्ममंत्रेण मार्जनं
विलेपनं कलारूपकल्पनं नन्दनेन तं ॥ त्रिसूत्रीकरणं पश्चाद्धृदयेनार्चनं मतं ॥ अस्त्रेण वज्रीकरणं हुम्मंत्रेण कुशैः शुभैः ॥ चतुःप
थं तनुत्रेणानन्तयाद्क्षयाटनं ॥ यागे कुण्डानि संस्कुर्यात्संस्कारैरेभिरीरितैः ॥ अथवा तानि संस्कुर्याच्चतुर्भिर्वीक्षणादिभिः ॥ कलारू
पकल्पनमिति ः कुण्डमध्ये सोमसूर्याग्निकलानां चिंतनमित्यर्थः ॥ अक्षयाटनं तु नारदपंचरात्रे ॥ अच्छिन्नाग्रैस्ततो दर्भैरस्त्रमंत्राभि
मंत्रितैः ॥ कुण्डभित्तिगतां सर्वां वर्मणा परिभूषयेत् ॥ इत्येवमक्षयाटनं कुण्डसंस्कारमीरितमित्युक्तं ॥ एतेन संस्कारा यदि कुण्डक
रणकाले नक्कृतास्तदा सिद्धेऽपि तस्मिन्न दृष्टार्थमवश्यमाचरणीया ॥ तदुक्तं नारदपंचरात्रे ॥ कुण्डस्यारंभकाले तु संस्कारा नकृता
यदि ॥ नियतं तस्य च ते सर्वे विधेयास्तुः क्रमेण वै इति ॥ शारदायां ॥ तिस्रस्तिस्रो लिखेद्रेखाः प्राक्प्रागुदगग्रगाः ॥ अत्र लिखनक्र
मः ॥ सौत्रामणीतंत्रे ॥ प्राचीमूर्ध्वमुदक्संस्थं दक्षिणारंभमालिखेत् ॥ उदगग्रं भरः सस्थं पश्चिमारंभमालिखेत् ॥ तिस्रस्तिस्रो
लिखेत्त्वेवं प्रोक्षयेद्वाग्भवेन च ॥ शारदायां ॥ प्रागग्राणां स्मृता देवा मुकुन्देशपुरंदराः ॥ रेखाणामुदगग्राणां ब्रह्मवैवस्वतेन्दव
अथवा षट्कोणान्तं त्रिकोणान्तं संलिखेत् ॥ यामलेऽपि ॥ षट्कोणान्तं तदेवि त्रिकोणं वा समालिखेत् ॥ शारदायां ॥ सर्वाणप्य
स्य नारेणा योगपीठमथार्चयेत् ॥ अत्र वाग्भवतारयोर्विकल्पः ॥ योगपीठमिति ॥ आधारशक्तिमारभ्य पीठमंत्रपर्यंतमित्यर्थः
अत्र जयाख्या विजया पश्चादजिता त्वपराजिता ॥ नित्या विलासिनी दोग्ध्री त्वघोरा मंगला नवेति पीठशक्तयः ॥ ह्रीं वागीश्वरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्वरयोर्योगपीठात्मने नमइतिपीठमंत्रः॥ तदुक्तंनंद्यांतरे॥ वागीश्वरयोर्योगपीठात्मने नमः॥ ह्रींमाद्यः पीठमंत्रोयमावाह्यस्मि ॥ ता॰भ॰ ॥
न्नुद्रपूजयेत्॥ शारदायां॥ वागीश्वरीमृतुस्नातांनीलेंदीवरसंनिभां॥ वागीश्वरेणसंयुक्तामुपचारैः प्रपूजयेत्॥ गणेश्वरविम ॥ ३५ ॥
र्षिंगणं॥ शक्तिबीजेनवागीशींवागीशंसाध्यमंत्रतः॥ पूजयेदितिशेषः॥ रुद्रयामलेतु॥ ततःशिवायशक्त्यैवनमोंतेंकथि
तोमनुः॥ आभ्यांत्रिस्त्रिश्चसंपूज्यप्रणवेनमनुनाऽथुना॥ वागीश्वरीमृतुस्नातांसमस्ताभरणान्वितां॥ वागीश्वरेणसंयुक्तां
नमाम्यखिलसिद्धयेइत्युक्तं॥ देवलवेतु वागीश्वरीवागीश्वरयोःस्थानेलक्ष्मीनारायणौपूज्यौ॥ तदुक्तंतत्वसारसंहितां
यां॥ लक्ष्मीमृतुमतींतत्रप्रभोनारायणस्यच॥ ग्राम्यधर्मेणसंजातमग्निंतत्रविचिंतयेत्॥ अत्रचविभूतिरुन्नतिः॥ कां
तिःसृष्टिःकीर्तिश्चसन्नतिः॥ पुष्टिरुत्कृष्टिऋद्धिश्चसंप्रोक्तानवशक्तयः॥ इतिपीठशक्तयः॥ वीजाद्यमानसंदत्त्वेति
वचनात्॥ श्रीलक्ष्मीनारायणायोर्योगपीठात्मने नमः॥ इतिपीठमंत्रः॥ श्रीविद्यायांतुज्ञानार्णवे॥ कामेश्वरींऊंउमध्येस
कामामृतुसंयुतां॥ समावाह्यचसंपूज्यतद्गर्भेवह्निमावहेत्॥ शारदायां॥ सूर्यकांतादिसंभूतंयद्वाश्रोत्रियगेहजं॥ आनी
यवह्निमात्रेयान्क्रव्यादांशंपरित्यजेत्॥ गौतमीये॥ पाषाणमथमग्निंवयदिवारणिसंभवं॥ श्रोत्रियाणांगेहजंवचनस्यमथ ॥ राम ॥
वाहरेत्॥ यदृच्छालाभसंप्राप्तश्चायोग्योयागकर्मणि॥ निरग्निर्ब्राह्मणात्संबोद्यधर्नाभकरोभवेत्॥ श्रेत्राह्मवैवतुर्थांशंफलंद ॥ ३५ ॥
याहुताशनः॥ वैश्यशूद्राश्चविफलंजायतेहोमकर्मतत्॥ उड्डीशे॥ श्रोत्रियागारजंवापिसूर्यकांतोद्भवंतुवा॥ अरणीसंभवंवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिक्षिप्तं स्वर्णादिभाजने ॥ ताम्रपात्रादिनामंत्रीहितं तु समानयेत् ॥ अथवानीतमग्निं तः स्थापयेत्कांस्यभाजने ॥ अग्निरपि ॥ पा
त्रान्तरेण पिहितेन ताम्रपात्रादिके शुभे ॥ अग्निप्रणायनं कुर्याच्छरावे नादृशेपि वा ॥ स्मृतिसारे तु ॥ शरावे भिन्नपात्रे वा कपाले वो
ल्मुकेपि वा ॥ नाग्निप्रणायनं कुर्याद्व्याधिहानिभयावहमिति शरावनिषेधस्ताम्रादिपात्रसज्ञावेवोध्यः ॥ क्रव्यादांशपरित्यागे
विशेषस्तत्रोत्तरे ॥ अस्त्रेणाग्निं समाधाय कवचेन पिधाय तु ॥ क्रव्यादांशं तु वास्त्रेण नैर्ऋत्ये संत्यजेत्प्रिये ॥ मन्त्रमुक्तावल्याम
पि ॥ आनीयास्त्रेण नैर्ऋत्ये क्रव्यादांशं परित्यजेत् ॥ देवांशं मूलमन्त्रेण स्थापयेत्सुरतः सुधीः ॥ उड्डीशे तु ॥ कूर्चास्त्राभ्यां च नैर्ऋ
त्ये क्रव्यादांशं परित्यजेदित्युक्तं ॥ गणेश्वरेपि ॥ हूं फडं तेन मूलेन क्रव्यादांशं परित्यजेत् ॥ क्रियासारे ॥ श्मशानादा वा मा
समवह्निरुच्यते ॥ क्रव्यादस्तस्य नामास्य त्यजेत्किंचित्कुताशनात् ॥ शारदायां ॥ संस्कुर्यात्तं यथान्यायं देशिको वीक्षणादिभि
ॐ दर्यवैन्दवाग्निभ्यां भौमस्यैकां स्मरन्बसो ॥ योजयेद्वह्निबीजेन चैतन्यपावके तदा ॥ शारसंग्रहे ॥ प्रदीपकलिकाकारं ने
त्र आकाशयन्नतः ॥ स्वकं जाठरवैन्दवबह्निभ्यां पार्थिवस्य च ॥ स्मृत्वाग्निबीजकेनास्य चैतन्यं योजयेत्तथा वैन्दवस्तु भ्रूमध्यस्थो
वह्निः ॥ उड्डीशे ॥ दीपाद्दीपान्तरं न्यायात्स्फुरन्तं सर्वतोमुखं ॥ श्वासमार्गेण मनुविन्कवचेन ततो र्वयेत् ॥ शारदायां ॥ तारेणाम
न्त्रितं मंत्री धेनुमुद्रामृतीकृतं ॥ अस्त्रेणारक्षितं पश्चात्तनुत्रेणावगुण्ठितं ॥ अर्चितं त्रिः परिभ्राम्य कुंडस्योपरि देशिकः ॥ प्रदक्षिणान
दातारमन्त्रोच्चारणपूर्वकं ॥ आत्मनोभिमुखं वह्निं जानुस्पृष्टमहीतल ॥ शिवबीजाधिया देव्या योनावेनं विनिक्षिपेत् ॥ उड्डीशे ॥ भू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ता.५॥ मोचनपूजनीं कृत्वा कूर्चबीजं च वह्निजं॥ वैनतेयं ततो देवं तमोतः स्पादनेनोत्थापयेत् कृविं॥ शिवबीजधिया तस्या योनौ वह्निं विनिःक्षि
॥३६॥ पेत्॥ त्रिपुरासारसमुच्चये॥ योनावेनं विन्यसेत्त्वाभिवकं पश्चादग्निं मूलमंत्रेण मंत्री मुक्तं॥ शिवबीजाधियेति शेवशाक्त वि
षयं वै स्मवासे तु विस्यादिबीजधियेति वा ध्येः॥ वायवीयसंहितायां तु॥ वह्निबीजसमुच्चार्यत्वादधीनाग्निमासने॥ योनि
मार्गेण वै तद्वदात्मनः संमुखेन वा॥ योनिमार्गेण मेखलोपरि स्थापितयोनिरन्ध्रेण॥ शारदायां॥ पश्चाद्देवस्य देव्याश्च द
द्यादाचमनीयकं॥ ज्वालयेत्तनुत्राणेन तमग्निमथ देशिकः॥ विनिर्गलहनदहपचयुग्मानुदीर्य च॥ सर्वज्ञाज्ञापयस्वा
हा मंत्रोयं प्रोत्सेरितः॥ रुद्रयामले तु॥ ह्रां ह्रीं ज्वलप्रगं देवि प्रज्वलज्वलितयंततनः॥ ॐ फट् स्वाहेति मंत्रेण ज्वालयेत्वाव
कं सुधी रिमुक्तं॥ ज्वालनं तु मुखेनैव न तु उक्तं॥ न कूपुष्यकृताग्निश्च पाणि सूर्य स्रुवादिभिः॥ न कुर्यादग्निधमनं न कुर्याद्व्य 45
जनादिना॥ मुखेनैव धमेदग्निं मुखाद्येषो ह्यजायत॥ नाग्निं मुखेनेति तु यल्लौकिके योजयंति तद्विति॥ तत्र ज्वालिनीमु
द्रापि प्रदर्शनीया सा च॥ मणिबंधौ समौ कृत्वा करौ तु प्रसृतांगुली॥ मध्यमे मिलिते कृत्वा तन्मध्ये गुष्ठकौ क्षिपेत्॥ इयं
सा परया मुद्रा ज्वालिनी होमकर्मणि मुक्तलक्षणा॥ यामले॥ तत्र उत्थाय विधिवत्कृत्वा पाणिपुटं सुधीः॥ अग्निं प्रज्वलि ॥ता.प॥
तं वंदे जातवेदं हुताशनं॥ सुवर्णवर्णममलं समिद्धं विश्वतो मुखं॥ उपतिष्ठेनेति विधिवन्मंत्रेणानेन पावकं॥ उड्डीशे॥ ॥३६॥
प्रादेशमात्रं समिधं मूलाग्रघृतसंप्लुतं॥ तृष्णीं वह्नौ समुत्क्षिप्य जिह्वा या देवता न्यसेत्॥ शारदायां॥ विन्यसेदात्मनो देहे मंत्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जिह्वा हविर्भुजः ॥ लिंगपायुशिरोवक्त्रघ्राणनेत्रेषु सर्वतः ॥ वह्निरार्घीशसंयुक्ताः सादियांताः सविंदवः ॥ वर्णामंत्रः समुद्दिष्टा
जिह्वानां सप्तदेशिकैः ॥ जिह्वासाप्तविधाः प्रोक्ता गुणभेदेन कर्मसु ॥ हिरण्या गगना रक्ता कृष्णान्या सुप्रभा मता ॥ बहुरूपातिर
क्ता च सात्विको यागकर्मसु ॥ वह्नी रेफ इकारो यकार अर्घीशादीर्घोकारः ॥ अत्र सात्विकरसनायां बहुरूपातिरक्तयो पौर्वापर्य
बीजक्रमानुरोधेनः ननु न्यासक्रमानुरोधेन ॥ बहुरूपायाः सर्वांगव्यापनीयत्वात् ॥ न तूक्तनेत्रान्तरे ॥ सलिंगगुदमूर्धास्यना
सानेत्रेषु वक्त्रमान् ॥ विन्यसेदतिरक्तांतां सर्वांगे बहुरूपिणीमिति राघवभट्टाः ॥ वस्तुतो हिरण्या गगना रक्ता कृष्णा चैव तु सु
प्रभा ॥ बहुरूपा महेशानि अतिरक्ता तथैव च वेन्यनेतरं ॥ एकैकं विन्यसेद्देवि लिंगे पायौ शिरस्यथ ॥ वक्त्रे घ्राणे तथा नेत्रे सर्वां
गे च न्यसेत्ततः ॥ इति वीरचूडामणिवचनात् ॥ ततः प्रविन्यसेज्जिह्वा देहे मंत्री विभावसोः ॥ सलिंगगुदमूर्धास्यनासानेत्रेषु
वक्त्रमान् ॥ सर्वांगेषु च जिह्वा स्याच्चस्यनेत्रिविधात्मिका ॥ हिरण्या गगना रक्ता कृष्णा चैव तु सुप्रभा ॥ बहुरूपातिरक्ता च जि
ह्वाः सप्तेति सात्विका इति मंत्रतंत्रप्रकाशवचनात्त्वातिरक्तायाः सर्वांग एव न्यासः साधीयान् ॥ राघवभट्टलिखित वचनां
तरं च यदि प्रमाणं तदा विकल्प एवेति तत्त्वं ॥ शारदायां ॥ पद्मरागाः सुवर्णान्या तृतीया भद्रलोहिता ॥ लोहितानंतरं श्वेता धू
मिनी च करालिका ॥ राजस्यो रसना वह्ने विहिता काम्यकर्मसु ॥ विश्वमूर्तिस्फुलिंगिन्यौ धूम्रवर्णा मनोजवा ॥ लोहिताख्या करा
लाख्या काली तामस्य ईरिता ॥ एताः सप्तनियुज्यं ते क्रूरकर्मसु मंत्रिभिः ॥ स्वस्वनामसमाभाः स्युर्जिह्वाः कल्पनारेनसः ॥ अम

॥ ता॰ भ॥
॥ ३८ ॥

र्यपितृगंधर्वयक्षनागपिशाचकाः॥ राक्षसाः सप्तजिह्वानामीरिता अधिदेवताः॥ अधिदेवतोक्तिस्तत्तज्जिह्वास्थाने न्यासार्थं
पूजार्थं च॥ जिह्वासु त्रिदशादीनां तत्तत्कार्यसमाप्तये॥ जुहुयाद्वांछितां सिद्धिं दद्युस्ता देवता मता॥ इति प्रपंचसारवचनार्थं
च तत्तज्जिह्वायां तत्तद्द्रव्येणाहोमपक्षे तां मां होमार्थं च॥ क्रियासारे॥ अस्य भृगुरृषिश्छंदो गायत्र्यग्निश्च देवता॥ बीजं शक्ति
श्च रं स्वाहा त्र्यप्यादीन् पूर्ववन्न्यसेत्॥ शारदायां॥ वह्नेरंगमनून्न्यसेत्तनातुक्तेन वर्त्मना॥ सहस्रार्चिः स्वस्तिः पूर्णाउत्तिष्ठ पु
रुषधूतनः॥ धूमव्यापी सप्तजिह्वो धनुर्धर इति क्रमात्॥ षडंगमनवः प्रोक्ता जातिभिः सहसंयुताः॥ मूर्त्तीरष्टौ तनौ न्यसे
द्दिशिको जातवेदसः॥ मूर्द्धांसपार्श्वकट्यंधुकटिपार्श्वांसकेषु च॥ प्रदक्षिणावशान्न्यस्येदुच्यते नाथ यथाक्रमात्॥ जातवेदाः
सप्तजिह्वो हव्यवाहनसंज्ञकः॥ अश्वोदरजसंज्ञोन्यः पुनर्वैश्वानराह्वयः॥ कौमारतेजाः स्याद्विश्वमुखो देवमुखः स्मृतः॥ ताराद्य ५८
ये पदाद्याः स्युर्नत्यंता वह्निमूर्त्तये॥ आसनं कल्पयित्वाग्रे मूर्त्तिं तस्य विचिंतयेत्॥ आसनं पीठं तत्राविशेषः॥ तत्राधार
शक्त्यादि वह्निमंडलांतं विन्यस्य केसरेषु मध्ये च पीठशक्तीः॥ तत्रैव रं वह्नियोगपीठाय नमः॥ इति पीठं च न्यसेत्॥ तदुक्तं तत्रैव
स्वमंडलांतं प्रयजेत्पीठे सनवशक्तिके॥ पीताश्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिंगिनी॥ रुचिरा ज्वालिनी प्रोक्ताः कृशानोर्न ॥ ताम ॥
व शक्तयः॥ स्वबीजेनासनं दत्वा मूर्त्तिं मूलेन कल्पयेदिति॥ तथा॥ इष्टं शक्तिं स्वस्तिकाः भीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयंतं जवा ॥ ३८ ॥
भं॥ हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्वह्निं बद्धमौलिं जटाभिः॥ ध्यानांतरमुक्तं रुद्रयामले॥ वंधूकपुष्पसंकाशं शुनप्रकन

कप्रभं ॥ पद्मस्थं यजमानार्थं वदनद्वयशोभितं ॥ सप्तहस्तं रोमयं देवं विमानोपरिसंस्थितं । त्रिधाग्रीवं त्रिपादाङ्गं हव्यकव्यवि
नाशकं ॥ ब्रह्मास्वर्यज्ञानहोन्नवक्त्र: शृंगीविराजितं । पंचरात्रं पाशुपतं कापिलं च महामतं । बौद्धं वैदिकमित्यतत् षट्पिं
गलविलोचनं ॥ वेदार्थं वचनु: श्रोत्रं श्रोतशास्त्रमयध्वनि ॥ सपाटलजटाबद्धमणिकोटीरभास्वरं । हेमालंकारसंयुक्तं
हेमकुंडलमंडितं ॥ रक्ताम्भोरुहमध्यस्थं स्वाग्निकासनसंस्थितं ॥ स्वस्वे देशे समालंवितार्तीयचरणांबुजं । सदाशब्दायमानं
वराजमानं स्वतेजसा ॥ शक्तिं वज्रं स्रुक्स्रुवौ च चतुर्भिर्दक्षबाहुभि: ॥ तोमरं तालवृन्तं च सोवर्णाद्यन्नपात्रकं ॥ समैस्त्रिभि
र्बाहुभिश्च दधानं रक्तवाससं ॥ हिरण्या कनका रक्ता कृष्णा दक्षान्ने स्थिता: ॥ सुप्रभा चातिरक्ता च बहुरूपा च जिह्विका
स्मारसज्ञास्तथामवदने नित्यमास्थिता: ॥ एताभि: सप्तजिह्वाभिरूपेतपाटितानन ॥ परिषिंचेत तत्तोयैर्विशुद्धे मेखल
लोपरि ॥ दर्भैरगर्भैर्मध्यस्य मेखलाया परिस्तरेत् ॥ कुलोड्डीशे ॥ एवं विन्यस्तदेह: सन्नयरिस्तरणमाचरेत् ॥ अर्घोदकेन संप्रो
क्ष्य मध्यस्य मेखलोपरि ॥ उत्तराग्रं पूर्वदेशे पूर्वाग्रं दक्षिणोत्तत: ॥ उत्तराग्रं पश्चिमे तु प्रागग्रमुत्तरे तथा ॥ मूलमाच्छादितं कृत्वा
त्रिवारं तु परिस्तरेत् ॥ तथा ॥ मेखलासु च सर्वासु दीयमाना प्रकल्पयेत् ॥ गणेश्वर विमर्षिण्यां ॥ पूर्वाग्रैरुत्तराग्रैश्च दर्भैरग्निं
परिस्तरेत् । दक्षिणोत्तरयो: पूर्वाग्रै: पूर्वपश्चिमयोरुत्तराग्रैरित्यर्थ । त्रिपुरासारसमुच्चये ॥ एकमेखलकुंडे निशित मति
मेखलाधस्तात् ॥ परिस्तरेद्द्विमेखले द्वितीयमेखलोपरि । त्रिमेखले तदंतरालमेखलोपरि न्यसेत् ॥ शारदायां ॥ निःक्षिपेद्द

॥ ता॰भ ॥
॥ ३८ ॥

क्षपरिधीन्प्राचीवर्जंशुरुन्नमः॥ कात्यायनः॥ परिधीन्परिदधत्यार्द्रानेकह्वक्षीयान्वाऽऊमात्रान्पालाशवैकंकतकाश्म
र्यवैल्वानिति॥ तंत्रांतरे॥ वाह्येथस्थंडिलंवह्निपरिधिसहितंप्रागुदग्रागदर्भ॥ त्रिपुरासारसमुच्चयेपि॥ स्थंडिलकेसिक
तानांवाह्येथत्रिर्न्यसेत्परिधीन्॥ शारदायां॥ प्रादक्षिण्येनसंपूज्यास्तेपुर्वस्यादिमूर्तयः॥ सोत्रामणीतंत्रे॥ कुंडमध्येविधा
नवित्॥ पद्मासनांतसाधारणशक्त्यादिमनुभिः क्रमात्॥ उपर्युपरिसंपूज्यवह्नेरासनशक्तयः॥ पूर्वादिदलमूलेषुमध्येपू
ज्याः क्रमेणतु॥ आसनशक्तयः पूर्वोक्ताः पीठशक्तयः॥ शारदायां॥ ध्यातंवह्निंयजेन्मध्येगंधाद्यैर्मनुनाऽमुना॥ वैश्वान
रजातवेदयपदेपश्चादिहावह॥ लोहिताक्षपदस्यांतेसर्वकर्माणिसाधये॥ वह्निजायावधिःप्रोक्तोमंत्रः पावकवल्लभ॥
मध्येषट्स्वपिकोणेषुजिह्वाज्वालारुचोयजेत्॥ अत्रषट्सुकोणेषुमध्येचयजेदित्यन्वयः॥ कोणेषुचइशानादिक्रमः
तदुक्तंसोमशंभौ॥ रुद्रेन्द्रवह्निमांसादवरुणानिलगोचरे॥ हिरण्याद्याःस्थितावह्नेरसनाःषडनुक्रमात्॥ मध्यतोवऊ
हुपान्विति॥ वायवीयसंहितायां॥ हिरण्याप्रागुदग्जिह्वाकनकापूर्वतःस्थिता॥ रक्ताग्नेयीनैर्ऋतीचकृष्णान्यासुप्र
भामता॥ अतिरक्तामरुज्जिह्वास्वनामस्वगुणाप्रभाः॥ त्रिशिखामध्यमाजिह्वावऊहूपासमाह्वया॥ तत्स्थिप्यैकादक्षिणा ॥ राम ॥
तोज्वलंतीवामतःपरा॥ स्वबीजानंतरंवायव्याइति॥ गणेश्वरविमर्षिण्यामपि॥ कोणषट्केचमध्येचजिह्वाःसंपूजये ॥ ३८ ॥
त्ततः॥ हिरण्यात्तप्तहेमाभाभूलयाणिदिशिस्थिता॥ वैदूर्य्यवर्णागगनाप्राच्यांदिशिव्यवस्थिता॥ तरुणादित्यसंकाशा

47

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रक्ताजिह्वाग्निदिक्स्थिता॥ कृष्णानीलाब्जसंकाशा नैरृत्यां दिशि संस्थिता॥ सुप्रभा पद्मरागाभा वारुण्यां दिशि संस्थिता॥ अति
रक्ता जवाभासा वायव्यां दिशि संस्थिता॥ वज्ररूपा यथार्थाभा दक्षिणोत्तरसंस्थिता॥ एतास्त्वाला रुवावीता वराभयकरा अपि
त्रिपुरासारसमुच्चये पि॥ सुतप्तचामीकरवाहवर्णा स्थिता हिरण्या दिशि शूलपाणो॥ वैदूर्य्यवर्णा कनकाभिधाना यासा निष
ण्णा दिशि वासवस्य॥ या रक्ता तरुणादिवाकराभवर्णा सा जिह्वा हरिति सुसंस्थिता कृशानो॥ या कृष्णा विकशितनीलनीरजा
भासा रक्षःपरिवृढदिग्विभागलग्ना॥ पद्मरागसदृशप्रभोज्वला सुप्रभा वरुणदिश्यवस्थिता॥ या महारजनपुष्पसन्निभा
गंधवाहदिशि सातिरक्तिका॥ यथार्थसंज्ञा वज्ररूपिका सा जिह्वोत्तरे दक्षिणातः स्थिता सा॥ होमेपि विशेष उक्तो गरोश्वर
विमर्षिणा॥ एधांसि वहिरण्यायां गगनायां च रुंधते। सिद्धार्थ वज्ररूपायां तु यारक्तायां तु यवास्तथा॥ कृष्णायां तु ऊनेस्वा
जा तु सुप्रभायां तु सक्तुभिः॥ तिलांश्चैवातिरक्तायां कनकायां तु सर्वदा॥ सर्वद्रव्याणि तु ऊयात्साधकः सर्वकर्मसु॥ तंत्रा
न्तरे॥ फलं तु काममेदेन क्रमाद्दासामुदीर्यते। वश्याकर्षणयो राज्यागगनास्तंभने मता॥ विद्वेषमोहयो रक्ता कृष्णा मारणा
कर्मणि सुप्रभा शांतिके पुष्टौ सुरक्तोच्चाटने मता॥ एकैव वज्ररूपा तु सर्वकामफलप्रदा॥ शारदायां॥ केसरेषु क्रमाग्नेरापू
जयेदंगदेवताः॥ दलेषु पूजयेन्मूर्तीः शक्तिस्वस्तिकधारिणीः॥ लोकपालांस्ततो दिक्षु पूजयेदुक्तलक्षणान्॥ अत्र लोकपाल
पूजा मेखलास्थदर्भोपरि कार्या। तदुक्तं तंत्रान्तरे। कोणाग्रकेवमध्ये च जिह्वाभिः केसरेष्वपि॥ अंगमंत्रैस्ततो वाह्ये त्वष्टाभिर्म्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना॰भ ॥ त्रिभिः क्रमात् ॥ मेखलाश्रितदर्भेषु दिक्पतीन् पूर्ववत्तोयजेत् ॥ तत्वसारसंहितायां ॥ पात्रासादनस्य विधिर्व्यवहुवशश्चापि मंत्रवि
॥ ३९ ॥ त् ॥ तान्यवोक्ष्य पवित्रेणाधोमुखानि विधायच ॥ पुनः प्रक्षालयेत्पात्रं परिपूर्य शुभांबुना ॥ दत्वाक्षतान् पवित्रंच तदुन्मूय निधा
यतत् ॥ दिक्षु न रस्यात त्यात्रं प्रणीतेत्युच्यते बुधैः ॥ ततः किंचित्प्रणीतांबु प्रोक्षणपात्रयतज्जले ॥ यज्ञसाधनसंभारं प्रोक्षयेन्मूलमं
त्रतः ॥ अन्यत्रापि ॥ वामे चास्तीर्य दर्भान् वलरिपुहरिदग्नांस्तदूर्ध्वे निधाय पात्राणि द्वन्द्वशोधोवदनमथ तथोत्तानवक्त्राणि कृत्वा
हन्मंत्रेणाभिपूज्यात्वतमथ जलैर्मंत्रपूतैरथैभिरभ्युक्ष्यात्वेध्मकूर्चैः सकलमपि हदासव्यजानमिति ॥ तंत्रांतरे ॥ स्ववामभा
गेप्राग्गग्रान् दर्भानास्तीर्य वोपरि ॥ यथाविन्नानुसारेणासौवर्णादीनि कर्मणि ॥ अधोमुखानि पात्राणि द्वन्द्वरूपाणि विन्यसेत्
उत्तानीकृत्य पात्राणि जलाज्यैः संप्रपूरयेत् ॥ त्रिपुरासारसमुच्चये ॥ ततो वामभागे परिस्तीर्य दर्भान् पुलोमात्मजावल्लभाशा 48
गताग्रान् ॥ तदूर्ध्वे न्यसेद्वन्द्वरूपेण पात्राण्यथाधोगतास्यानि सर्वाणि धीमान् ॥ अथोत्तानितेष्टेषु याज्ञेषु पात्रं जलैरेकमापू
र्य तीर्थानि तत्र ॥ सुसंविंत्य तैः प्रोक्षयेत् कूर्चदर्भैर्हृदस्त्र्यभागे स्थितं द्रव्यजातं ॥ पात्रेष्वपि विशेषस्तत्रैव ॥ सौवर्णान्यपि
राजतान्यपि तथा पात्राणि सौल्वानि वा मृत्पात्राण्यपि शांतिकादिषु परं शस्तानि कर्मस्विह ॥ शौल्वक्षद्रुमशिग्रुभूरुहकृतान्ये ॥ राम ॥
तानि विद्वेषणोच्चाटेमादनमारणादिषु भृशं शस्तानि पात्राण्यपि ॥ शौल्वं ताम्रं शैलुर्वकूवारकः ॥ अक्षद्रुमो विभीतकद्रुमः ॥ ३९ ॥
शिग्रुः शोभांजनः ॥ शारदायां ॥ पश्चादादाय पाणिभ्यां स्रुक्स्रुवौ तावधोमुखौ चिन्तः ॥ प्रतापयेद्वन्हौ दर्भान्मार्गयद्देशिकः ॥ त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदग्रमध्यमूलानि शोधयन्नेर्यथाक्रमात्॥ गृहीत्वा वामहस्तेन प्रोक्षयेद्दक्षिणेन तौ॥ पुनः प्रताप्य तौ मंत्री दर्भानग्नौ विनिःक्षि
पेत्॥ आत्मनो दक्षिणे भागे स्थापयन्तौ कुशान्तरे॥ तंत्रांतरे॥ गृहीत्वा स्रुकस्रुवावूर्ध्वमुखौ चाधोमुखौ क्रमात्॥ प्रतप्याग्नौ त्रिधा
दर्भमूलमध्याग्रकोस्पृशेत्॥ पुनस्त्रिशः प्रताप्याधोमुखावग्नौ कुशान्क्षिपेत्॥ मूलमध्याग्रकेन्यस्येच्छक्तीरिछादिकाः क्रमात्
स्रुवि शक्तिं स्रुवे शंभुं विन्यसेद्धृदयाणुना॥ इछादिकादिति॥ इछाज्ञानाक्रियाइत्यर्थः॥ शैवागमे॥ गृहीत्वा स्रुकस्रुवावूर्ध्वव
क्त्रावधोमुखौ क्रमात्॥ प्रताप्याग्नौ त्रिधा दर्भमूलमध्याग्रकैः स्पृशेत्॥ त्रिसूत्रवेष्टितग्रीवौ पूजितौ कुसुमादिभिः॥ कुशाना
मुपरि स्थाप्यतौ स्थापयित्वा स्वदक्षिणे॥ इत्युक्तं॥ शारदायां॥ आज्यस्थालीमथादाय प्रोक्षयेदस्त्रवारिणा॥ तस्यामाज्यं विनिः
क्षिप्य संस्कृतं वीक्षणादिभि॥ तंत्रांतरे॥ गव्यमाज्यं समादाय मूलेनैवाभिमंत्रितं॥ स्वकां ब्रह्ममयीं मूर्तिं सवित्वाग्नौ प्रताप
येत्॥ शैवागमे॥ गव्यमाज्यं समादाय मूलमंत्राभिमंत्रितं॥ स्वकां ब्रह्ममयीं मूर्तिं संविंत्य वेति॥ गव्यमित्युत्तमकल्पमभिप्र
त्योक्तं॥ तदुक्तं पिंगलामते॥ उत्तमं गोघृतं प्रोक्तं मध्यमं महिषीभवं॥ अधमं छागलीजातं तस्मात्कव्यं प्रशस्यत इति॥ वा
यवीयसंहितायां॥ न्यस्य मंत्रं घृते मुद्रां दर्शयेद्धेनुसंज्ञिका॥ शारदायां॥ निरूह्य वायव्ये गारान्हृदा तेषु निवेशयेत्॥ इदं ता
पनमुद्दिष्टं देशिकैस्तंत्रवेदिभिः॥ संदीप्य दर्भयुगलमाज्ये क्षिप्त्वानले क्षिपेत्॥ गरुडहृदयमंत्रेणापवित्रीकरणं त्विदं॥ शेषेन
दर्भयुग्मेन वीराज्यं ज्यं सवर्मणा॥ अग्नौ विसर्जयेद्दर्भमभियोतनमीरितं॥ घृते प्रज्वलितान्दर्भान्प्रदर्श्य पाप्त्वाणुनागरुः॥ ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ता·भ ॥
॥ ५० ॥

तवेदक्षिणात्स्मेउद्योतनं नपिदं मतं ॥ गृहीत्वा घृतमंगारान् प्रयोज्याग्रोजलं स्पृशेत् ॥ अंगुष्ठोपकनिष्ठाभ्यां दर्भौ प्रादेशसंमितौ ॥ धृत्वो
त्पुनीयाद्दक्षेणा घृतमुत्पवनं त्विदं ॥ तद्धृदयमंत्रेणा कुशाभ्यामात्मसंमुखं ॥ घृते संप्लवनं कुर्यात्प्रकाराः षडुदीरिताः ॥ अंगुष्ठोपक
निष्ठाभ्यांमिति हस्तद्वयस्येतिज्ञेयः ॥ उत्पुनीयादिति अग्निसंमुखमितिज्ञेयः ॥ तदुक्तं शैवागमे ॥ प्रादेशमात्र दर्भाभ्यां मंगुष्ठा
ऽनामिकाग्रकैः ॥ धृताभ्यां संमुखं वह्नेरुत्पवनमाचरेदिति ॥ शारदायां ॥ प्रादेशमात्रे संग्रंथि दर्भयुग्मं घृतांतरे ॥ निःक्षि
प्य भागौ द्वौ कृत्वा पक्षौ शुक्लेतरौ स्मरेत् ॥ वामे नाडीमिडां भागे दक्षिणे पिंगलां पुनः ॥ सुषुम्नां मध्यतो ध्यात्वा कुर्याद्धोमं यथा
विधि ॥ तत्र स्रुवधारणप्रकारो नारदीये ॥ हीयते यजमानो वै स्रुवमूलस्य दर्शनात् ॥ तस्मात्संगोपयेन्मूलं होमकाले स्रुव
स्य च ॥ अग्रे व्याधिकरं प्रोक्तं मध्ये शोककरं स्मृतं ॥ मूले हानिकरं प्रोक्तं स्रुवं धारयते कथं ॥ वेदांगुलं परित्यज्य अग्रे वै वह्निर
ष्टकं ॥ वेदांगुलं तु तन्मध्ये धारयेच्छंखमुद्रया ॥ होमसारे ॥ मूलात्षडंगुलं त्यक्त्वा चतुरंगुलमेव वा ॥ प्रकोष्ठे मूलमाछाद्य
धारयेच्छंखमुद्रया ॥ शारदायां ॥ स्रुवेण दक्षिणाद्भागादादायाज्यं हृदणुः ॥ जुहुयादग्नये स्वाहेत्यग्नेर्दक्षिणलोचने ॥ वाम
तस्तद्वदादाय वामे वह्निविलोचने ॥ जुहुयादथ सोमाय स्वाहेति हृदयाणुना ॥ मध्यादाज्यं समादाय वह्नेर्भालविलोचने ॥ जु
हुयादग्नीषोमाभ्यां स्वाहेति हृदयाणुना ॥ हृन्मंत्रेण स्रुवेणाज्यं भागादादाय दक्षिणात् ॥ जुहुयादग्नये स्विष्टकृते स्वाहेति तन्मु
खे ॥ हेति संपातयेद्भागे घाज्यपात्राहुतिक्रमात् ॥ इत्यग्निनेत्रवक्त्राणां कुर्यादुद्घाटनं गुरुः ॥ संपातयेद्भागइति ॥ यस्माद्भाग

49

॥ राम ॥
॥ ५० ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाज्यं गृहीत्वाऽऽन्तं तज्ञागे ऽन शेषं क्षिपेदित्यर्थः ॥ नतूक्तं शैवागमे ॥ स्रुवेणादाय होमयेत् ॥ स्वेत्यग्नौ हेति तज्ञागे शेषमाज्यं क्षि
पेत् ॥ क्रमादिति ॥ शारदीया ॥ सताराभिर्व्याहृतिभिराज्येन जुहुयात्सुतः ॥ अत्र ॐ स्वाहा भूः स्वाहा भुवः स्वाहा स्वः स्वाहा ॥ ॐ
भूर्भुवः स्वः स्वाहेति व्यस्तसमस्ताभिः पंचाहुतयः ॥ पंचभिर्मंत्रभिर्हुनेदिति नारायणीयतंत्रवचनात् ॥ उड्डीशे तु ॥ देवाव्या
हृतिहोमं च पंचताराद्येन चतुर्हुनेत् ॥ भूरग्नये पृथिव्यै च महन् वह्निवल्लभा ॥ भुवः पदाद्वायवे च अंतरीक्षाय शब्दतः ॥ दि
व्याय महते चैव वह्निजाया वधिः स्मृत ॥ स्वरादित्यचन्द्रमसौ हे तो नक्षपदानतः ॥ त्रेभ्यः स्वाहापदांतश्च भूर्भुवः स्वः पदं ततः
अग्न्यादित्यचन्द्रमसाडे तानक्षेत्रेऽस्यपि ॥ मांसनश्चैव दिग्भ्यश्च महते वह्निवल्लभा ॥ शारदाया ॥ जुहुयादग्निमंत्रेणात्रिवारं दे
शिकोत्तमः ॥ गर्भादानादिकाचक्रैः क्रियानिवर्तयेत्क्रमात् ॥ अष्टाभिराज्याहुतिभिः प्रणवेन पृथक्पृथक् ॥ गर्भाधानं पुंस
वनं सीमन्तोन्नयनं पुनः ॥ अनंतरं जातकर्म स्यान्नामकरणं तथा ॥ उपनिःक्रमणं पश्चादन्नप्राशनमीरितं ॥ चौडोपनयनं भू
यो महानाम्यं महाव्रतं ॥ अथोपनिषदं पश्चाद्गोदानोद्वाहकौ स्मृतिः ॥ शुभेशुस्सुविवाहान्ताः क्रियास्ताः कुरुकर्मसु ॥ मरणांताः
समुद्दिष्टा च क्रमागमवेदिभिः ॥ उड्डीशे ॥ इदमग्ने करोम्यत्र गर्भाधानमिति क्रमात् ॥ प्रणवं पूर्वमुच्चार्य शेषे वह्निवधूं वदेत् ॥ ॐ
ल्लासमप्राहुतीरेवं समिधां क्षेपणं तथा ॥ एवं क्रमात्पुंसवनं सीमंतोन्नयनं तथा ॥ जातकर्म समाप्याथ श्रमापनोदनाय च ॥ प्रादेशमात्रं
समिधं मूलाग्रघृतसंप्लुतं ॥ ॐ कामेश्वरकामेशीभ्यां स्वाहेति विनिःक्षिपेत् ॥ वह्निश्च पितरौ मंत्री स्वदेहे विनियोजयेत् ॥ इष्टदेवस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ता. ध ॥
॥ ४१ ॥

नाम्नानुवर्त्तनंसमाचरेत् ॥ कामेश्वरकामेश्वरीभ्यामिति तु श्रीविद्यायां अन्यत्र वागीश्वरवागीश्वरीभ्यामिति ज्ञेयं ॥ दुर्गायागे ॥ आज्याहु
त्यैकैकं हुत्वा नामकर्म समाचरेत् ॥ देशिकस्त्वप्रकोसीति मूलमंत्रेण कल्पयेत् ॥ वायवीयसंहितायां ॥ जातं ध्यात्वैवमाकारं जातकर्म स
माचरेत् ॥ नीलायनयनं कृत्वा ततः संशोध्य सूतकं ॥ शिवाग्निरिति नामास्य कृत्वा हुतिपुरःसरं ॥ पित्रोर्विसर्जनं कृत्वा चौडोपनयना
दिकं ॥ अथोद्वाहावसानं च कृत्वा संस्कारमस्य तु ॥ नालापनयनप्रकारस्तु शैवागमे ॥ वह्नेरिहास्त्वं मंत्रेणानेनो नालापनुत्तये ॥
समिधः पंच जुहुयात्स्वांते मूलेघृताप्लुताः इति ॥ वायवीयसंहितायां ॥ ताः पालाशः पराचापि यज्ञीयाद्वादशांगुलाः ॥ अवक्रान
स्वयंभग्नाः सत्वचो निर्व्रणाः समाः ॥ दशांगुला वा विहिताः कनिष्ठांगुलिसंमिताः ॥ प्रादेशमात्रा वालाभे होतव्याः सकला अपी
ति ॥ एवं च सकलसंस्कारशेषे तन्निवृत्तो विसर्जनं नालायनयनीय पंच समिद्धोमं च वदन् आदाकारो चाग्रमेव ॥ अत्र गोदानानं
तरं समावर्त्तनमपि कर्त्तव्यं ॥ तदुक्तं गणेश्वरविमर्षिण्यां ॥ समावर्त्तनमुद्वाहमाधानं च ततः परमिति ॥ त्रिपुरासारसमुच्च
येपि ॥ तेनैव समावर्त्तनविवाहयोराहुतीर्जुहुयात् ॥ शारदायां ॥ मंत्रैर्जिह्वांगमूर्त्तीनां क्रमाद्द्वहेद्यथाविधि ॥ प्रत्येकं जुहुया
देकामाहुतिं मंत्रवित्तमः ॥ गणेश्वरविमर्षिण्यां ॥ जुहुयादंगमंत्राद्यैस्ताराद्यैश्च सकृत्सकृत् ॥ तत्तत्स्थाने सुशितधीः स्वाहांतै ॥ राम ॥
श्च यथाक्रमं ॥ अत्राद्यपदेन लोकपालानदस्त्रांतानां ग्रहणं ॥ शारदायां ॥ अवदाय स्रुवेणाज्यं चतुः स्रुचि पिधाय तां ॥ स्रुवेणा ॥ ४१ ॥
तिष्ठन्नेवाग्नौ देशिकोयतमानसः ॥ जुहुयाद्वह्निमंत्रेण वौषडंतेन संपदं ॥ शैवागमे तु विशेषः ॥ घृतेन स्रुचि पूर्णायां निधाय

50

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धोमुखस्तुवं ॥ शृंगाग्रे पुष्पमारोप्य पश्चाद्वामेन पाणिना ॥ पुनः सव्येन तोधृत्वा शंखसंनिभमुद्रया ॥ सम्प्रकुंतोर्ध्वकायसव्यसम
पादः समुत्थितः ॥ नाभौ तन्मूलमाधाय शृंगाग्रव्यग्रलोचनः ॥ वामस्तनांतरानीय तयोर्मूलमतंद्रित इति ॥ गणेश्वरविमर्षि
ण्यां ॥ महागणेशमंत्रेण पूर्वं पूर्वयुतेन च ॥ तारादिबीजषट्केन तु करणेषु डिवर्णकैः ॥ भिन्नेषु दशधा कृत्वा समस्तेन तु रेश्वरि
प्रपंचसारेपि ॥ ताराद्यैर्दशभिर्भेदैः पूर्वपूर्वसमन्वितैः ॥ मनुना गणपस्येन जुहुयाच्च दशाहुतीः ॥ जुहुयाच्च चतुर्वारं समस्ते
नैव तेन तु ॥ तन्मंत्रस्तूड्डीशे ॥ प्रणवं श्रीर्महामायास्मरं स्त्रीमात्मकं पुनः ॥ पंचांतकं विंदुयुतं ठेंतं गणपतिं ततः ॥ वरांते
वरदस्वेति सर्वांतेजनमालिखेत् ॥ मेवशमानयस्वाहा विंशत्यर्णो गजांतकः ॥ शारदायां ॥ ततः पीठं समभ्यर्च्य देवताया
ज्ञासने ॥ अर्चयेद्वह्निरूपां तां देवतामिष्टदायिनी ॥ वीरचूडामणौ तु ॥ पश्चात्पीठदेवतानामेकैकाज्याहुतिस्ततः ॥ अर्च
येद्वह्निरूपां तां गंधपुष्पादिभिः क्रमादित्युक्तं ॥ तेनाधारशक्त्यादिपीठमंत्रांतं संपूज्य तेभ्य एकैकामाहुतिं ॥ दत्वा इष्टदेव
तां तत्राचावाह्योपचारैः संपूज्या वरणादेवता अपि पूजयेदिति सिद्धं ॥ उड्डीशे ॥ वह्निमुखे यंत्रराजं रश्मिजालसमन्वितं ॥ वि
भाव्याराधयेन्मंत्री श्रीमंत्रिपुरसुंदरी ॥ तथा ॥ तत आहुतिदेवानां मेकैकामाहुतिं ऊनेन ॥ संकल्पं च ततः कृत्वा काम्यहोमं
समाचरेत् ॥ स्वाहांतं मूलमुच्चार्य देवतायै त्विदं ब्रुवन् ॥ जुहुयान्नवलिते च होमसंख्या च परितश्चरेत् ॥ शारदायां ॥ तन्मुखे जु
हुयान्मंत्री पंचविंशति संख्यया ॥ अनेन मूलमंत्रेण चक्रे कीकरणांत्विदं ॥ शैवागमे ॥ इतीष्टवक्रे वक्कारणामंतर्भावस्तु चैक

॥ता·भ॥
॥४२॥

ता॥ अथवा कुंडमानत्वं यदिष्टं वदने स्मरेत्॥ अन्तर्भाव्यात्मवक्त्राग्निदेकीकरणं मतं॥ शारदायां॥ वह्निदेवतयोरैक्यमा
त्मना सह भावयेत्॥ मूलमंत्रेण जुहुयादाज्येनैकादशाहुतीः॥ नाडीसंधानसिद्ध्यर्थमेतदागमवेदिभिः॥ जुहुयाद्देगमु
ख्यानामाज्जीनामष्टकमात्॥ एकैकामाहुतिं सम्यक् सर्पिषा देशिकोत्तमः॥ अंगेमूलेन दशाहुतयो देयाः॥ तदुक्तं
त्रिपुरासारसमुच्चये॥ परिवारस्यैकैकां देव्यां दशाहुतीर्जुहुयादिति॥ इत्यधिवासनविधिः॥ अथ दीक्षादिनकृत्यं॥
शारदायां॥ प्रातरुत्थाय जुहुयुः पुनराज्यान्वितैस्तिलैः॥ द्रव्यैर्वा कल्पविहितैः सहस्रमष्टकं पृथक्॥ जुहुयुरित्याचार्यो
ऋत्विजश्चेत्यर्थः॥ अत्र तिलादयः स्रुवाकरेणावा होतव्याः॥ तदुक्तं वायवीयसंहितायां॥ स्रुवेणाज्यं समित्पाणिना स्रु
वा शेषं करेण वा॥ तत्र दिव्येन होतव्यं तीर्थेण पैत्रेण वा न तथेति॥ महाकपिलपंचरात्रे॥ अप्रदीप्ते न होतव्यं मध्यमेना
प्यनिंधिते॥ प्रदीप्ते लेलिहाने च होतव्यं कर्मसिद्धये॥ वह्वृचपरिशिष्टेपि अंधो वधः सधूमे तु जुहुयाद्धुताशने॥ यज
मानो भवेदंधः सपुत्र इति वक्ष्यति॥ छंदोगपरिशिष्टेपि॥ योनर्चिषि जुहोत्यग्नौ व्यंगारिणि च मानवः॥ मंदाग्निरामया
वी च दरिद्रश्चोपजायते॥ त्रिपुरासारे॥ अग्नेः कर्णे होमतो व्याधिबाधा नेत्रे ध्वंसं नासिकायामथाधिः॥ द्रव्यच्छेदो मस्तके ॥राम॥
स्यान्मुखांतर्होमं कुर्यात्तेन नित्यं विपश्चित्॥ तंत्रांतरे॥ यत्र काष्ठं ततः श्रोत्रं यत्र धूमोत्र नासिका॥ यत्राल्पज्वलनं नेत्रं ॥४२॥
यत्रांगारस्ततः शिरः॥ यत्र प्रज्वलिता ज्वाला जिह्वा सा जातवेदसः॥ अन्यत्रापि॥ सधूमोग्निः शिरो ज्ञेयो निर्धूमश्चक्षुरेव च॥

51

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्वलनं कृशो भवेत्कर्णः काष्ठलग्नश्च नासिका ॥ अग्निज्वालाय नेयत्र शुद्धस्फटिकसन्निभः ॥ तन्मुखं तत्र विज्ञेयं वर्तुरं ज्वल
मानतः ॥ वनदुर्गाकल्पे ॥ यत्र काष्ठं तत्र श्रोत्रे यत्र धूमस्तु नासिके ॥ यत्राल्पज्वलनं नेत्रे यत्र भस्म तु तच्छिरः ॥ यत्रैव ज्वलितो
वह्निस्तत्र जिह्वा प्रकीर्तिता ॥ शारदायां ॥ वैश्वानरं स्थितं ध्याये त्समिद्धोमेषु दिशि कोः ॥ शयानमाज्यहोमेषु निषण्णं शेष
वस्तुषु ॥ तथा ॥ स्वर्णसिंदूरबालार्ककुंकुमक्षौद्रसन्निभः ॥ सुवर्णरेतसो वर्णः शोभनः परिकीर्तितः ॥ भेरीवारिदहस्ती
न्द्रध्वनिर्वह्निः शुभावहः ॥ नागचंपकपुन्नागपाटलायूथिकानिभः ॥ पद्मेन्दीवरकह्लारसर्पिर्गुग्गुलुसंनिभ ॥ पावकस्य
शुभो गंधः स्मृतः सन्त्रवेदिभिः ॥ प्रदक्षिणास्त्वकंपाश्चित्राभाः शिखिनः शिखाः ॥ शुभदा यजमानस्य राज्यस्यापि विशे
षतः ॥ कुंदेन्दुधवलो धूमो वह्नेः प्रोक्तः शुभावहः ॥ कृष्णः कृष्णगतेर्वर्णो यजमानं विनाशयेत् ॥ श्वेतो राज्यं निहंत्याशु वा
यसत्वरसंनिभ ॥ खरस्वरसमो वह्नेर्ध्वनिः सर्वविनाशकृत् ॥ पूतिगंधो हुतभुजो होतुर्दुःखप्रदो भवेत् ॥ छिन्नवृत्ताशि
खा कुर्यान्मृत्युं धनपरिक्षयं ॥ शुकपक्षनिभो धूमः पारावतसमप्रभः ॥ हन्ति तुरगजातीनां गवां चं कुरुते विराम् ॥ रु
वंविधेषु दोषेषु प्रायश्चित्तं यदेशिकः ॥ मूलेनाज्येन जुहुयात्त्वेवविंशतिमाहुती ॥ त्रिपुरासारसमुच्चये ॥ वस्वधिकं श
तमाज्ये जुहुयाच्छांतिकर्मणीषु दोषेषु ॥ अस्त्रेणासाधकेन्द्रस्तु पादरथं वक्त्रपूजां वेस्तुकं ॥ शारदायां ॥ ततः सुधीस्तद
तायंस्नातं शिष्यं समाहितं ॥ पाययित्वा पंचगव्यं कुंडस्यांतिकमानयेत् ॥ प्रयोगसारे ॥ पंचगव्यं यथाप्रोक्तं पीत्वा वांतेय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ता·भ ॥
॥ ४३ ॥

थाविधि ॥ द्वारेणादक्षिणेनाथ यागस्थानं प्रवेशयेत् ॥ शारदायां ॥ विलोक्यादिव्यदृष्ट्यानु तं तच्चैतन्यं हृदंबुजात् ॥ गुरुरात्म
निसंयोज्य कुर्यादध्वविशोधनं ॥ तंत्रान्तरे ॥ हृन्निष्ठितं तच्चैतन्यं प्रस्फुरत्तारकाकृति ॥ आदायस्थापयेत्स्वीये हृदये कुशाग्र
इया ॥ षडन्वयमहारत्ने ॥ शोधनं नाम तत्वानां कारणैकत्वचिंतनं ॥ वर्णादीनां कलानां च तत्स्थाचिदेकत्वचिंतनं ॥ शारदा
यां ॥ उक्तो कलाध्वा तत्वाध्वा भुवनाध्वेति च त्रयं ॥ वर्णाध्वा च पदाध्वा च मंत्राध्वेत्यपरं त्रयं ॥ वायवीयसंहितायां ॥ तत्र
शब्दाश्रयोध्वानस्त्रयस्त्वर्थाः समीरिताः ॥ तंत्रान्तरे ॥ मंत्राध्वा च पदाध्वा च वर्णाध्वेति च शब्दतः ॥ भुवनाध्वा च तत्वाध्वा
कलाध्वा चार्थतस्तथा ॥ अत्र तु संहारक्रमेणोक्तिः शारदायां तु सृष्टिक्रमेणोक्तिरितीयं ॥ शारदायां ॥ निवृत्याद्याः कलाः पंच
कलाध्वेति प्रकीर्तितः ॥ तत्वाध्वा च ऊधाभिन्नः शैवाद्यागमभेदतः ॥ षट्त्रिंशच्चैव तत्वानि द्वात्रिंशच्चैतवानितु ॥ चतुर्विंश
तितत्वानि मेत्राणि प्रकृतेः पुनः ॥ उक्तानि दशतत्वानि सप्त च त्रिपदात्मनः ॥ तत्वानि शैवान्युच्यन्ते शिवः शक्तिः सदाशि
व ॥ ईश्वरो विद्यया सार्धं पंच शुद्धात्ममूर्त्तिहि ॥ माया कालश्च यतिः कला विद्या पुनः स्मृतिः ॥ रागः पुरुष एतानि शुद्धाशु
द्धानि सप्त च ॥ प्रकृतिर्बुध्यहंकारो मनो ज्ञानेन्द्रियाण्यथ ॥ कर्मेन्द्रियाणि तन्मात्राः पंच भूतानि देशिकाः ॥ एतान्याशुद्ध
द्धानि चतुर्विंशतिमागमे ॥ शैवानां मितितत्वानां विभागोत्र प्रदर्शितः ॥ शुद्धानीति ॥ आणवः कार्मणामायीयमलत्रयरहि
तत्वं शुद्धत्वं · तत्राणवो नाम सदाशिवत्वेनस्वस्यानवमर्ष ॥ कार्मणो नाम पुण्यपापवानहमितिप्रतीति ॥ मायीयो नाम अ

52

॥ ताम ॥
॥ ४३ ॥

हंकारादवात्मयुक्तिः ॥ शुद्धानीति ॥ कारणत्वेन मलत्रयराहित्यं न स्फुटानि कार्यरूपत्वेन तद्युक्तत्वादशुद्धानीत्यर्थः ॥ तथा ॥ जी
वप्राणधियश्चित्तं ज्ञानकर्मेन्द्रियाण्यथ ॥ तन्मात्रापंचभूतानि हृत्पद्मं तेजसां त्रयं ॥ वासुदेवादयश्चेति तत्वान्येतानि शार्ङ्गि
णः ॥ पंचभूतानि तन्मात्राणीन्द्रियाणि मनस्तथा ॥ गर्वो बुद्धिः प्रधानं च मैत्राणीति विदुर्बुधाः ॥ निर्वृत्याद्याः कलाः पंचन
तो विदुः कलाः पुनः ॥ नादः शक्तिः सदापूर्वः शिवस्य प्रकृतेः परः ॥ आत्मा विद्या शिवः पश्चाच्छिवो विद्या स्वयं पुनः ॥ स
र्वतत्वं च तत्वानि प्रोक्तानि त्रिपदात्मनः ॥ तत्वाध्वा कथितो ह्येष तन्त्रागमवेदिभिः ॥ ईरितो भुवनाध्वेति भुवनानि म
नीषिभिः ॥ भुवनानि चतुर्दश ॥ भुवनाध्वेति कथितो भुवनानि चतुर्दशेति गौतमीयतंत्रवचनात् ॥ वायवीयसंहि
तायां तु ॥ आधाराद्युन्मन्यंतं च भुवनाध्वा प्रकीर्तित इत्युक्तं ॥ तथा ॥ वर्णाध्वेति वदंत्यर्णानादिक्षांतान्मनीषिणः ॥ वर्णा
सहः पदाध्वास्यान्मंत्राध्वा मंत्रराशयः ॥ वायवीयसंहितायां तु ॥ अनेकभेदसंभिन्नः पदाध्वा पदसंहतिः ॥ महामंत्रो
यमंत्राणां वर्त्तते च यवात्मनां ॥ प्रधानावयवत्वेन सोध्वा पंचपदात्मकः ॥ गौतमीयेपि ॥ पदाध्वा पदसमूहः स्यादित्यु
क्तं ॥ मंत्रराशय इति वैदिकतांत्रिकमंत्रसमूह ॥ मंत्राध्वा मंत्रराशिः स्यात्ते हि वैदिकतांत्रिका ॥ इति गौतमीयवचनात्
शारदायां ॥ क्रमादेतानध्वनः षड् शोधयेद्गुरुसत्तमः ॥ पदांधुनाभिहृन्नालमूर्धस्वपि शिशोः स्मरेत् ॥ ततः कूर्चेन विधि
वत्तं स्पृशन् जुहुयाद्गुरुः ॥ आचार्यकुंडे संभृतैस्तिलैराज्यपरिप्लुतैः ॥ शोधयाम्यमुमध्वानं स्वाहेति पृथगध्वनां ॥ तारायमा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ता॰ प्र ॥ माहूतीरष्टौ क्रमात्तां विलयं नयेत् ॥ शिवेशिवांतानृमलिनानूजनयेत्सृष्टिमार्गतः ॥ विलोकयन् दिव्यदृष्ट्या ततः शिष्यं देशिको
॥ ४४ ॥ त्तमः ॥ आत्मस्थितं ततश्चैतन्यं पुनः शिष्ये नियोजयेत् ॥ कुलार्णवे ॥ भूतशंकरजातीनां नाध्वशुद्धिर्विधियते ॥ पादोदकप्र
दानाद्यैः कुर्यात्पाशविमोचनं ॥ शारदायां ॥ स्रुवा पूर्णाहुतिं दत्वा मूलमंत्रेण देशिकः ॥ वायवीयसंहितायां ॥ ततो होमा
वशिष्टेन घृतेनापूर्य वै स्रुचं ॥ निधाय पुष्पं तस्याग्रे स्रुवेणाधोमुखेन तां ॥ सदर्भेणासमाच्छाद्य मूलेनांजलिनोत्थितः ॥
वौषडंतेन जुहुयाद्धारायवसमन्वितां ॥ हयशीर्षपंचरात्रे ॥ हुत्वा व्रहिविधादद्यात्स्रुवा पूर्णाहुतित्रयं ॥ वौषडंतेन मंत्रे
णेति ॥ नारदपंचरात्रे ॥ अभावे तु घृतस्यैव होमद्रव्येण पूरयेत् ॥ तस्योपरि घृतं दद्यात्तदूर्ध्वं कुंकुमादिकं ॥ नर्मायोगे ॥ मू
लेन मोनपुत्त्रार्यवामपादपुरःसरं ॥ दद्यात्पूर्णाहुतिं मंत्री परामृतधिया ततः ॥ अत्रेष्टदेवतावरणदेवतापृथक्केकामा 53
हुतिं प्रयच्छंति ॥ गोतमीयतंत्रे ॥ स्रुकस्रुवौ च समादाय घृतेनापूर्य तत्पुनः ॥ होमद्रव्याणि निःक्षिप्य तनाभौ संस्थाप्य तौ पुनः
ब्रह्मार्पणेन मंत्रेण दद्यात्पूर्णाहुतिं पुनः ॥ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा क
र्मणा हस्ताभ्यां पद्भ्यां उदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ॥ ब्रह्मार्पणमंत्रः ॥ सोयं ब्रह्मार्पणविधौ स्मृतः ॥ ॥ राम ॥
एवं होमविधिं कृत्वा कुंडस्थंडिलदेवताः ॥ दिक्पालदेवताश्चापि अंकुरार्पणदेवताः ॥ आनयेत्कलशे वापि कूर्चे वा भावये ॥ ४४ ॥
द्गुरुः ॥ कृत्स्नेति प्रकृताभिप्रायेण ॥ शारदायां ॥ उद्वास्य देवतां कुंभसांगां सावरणां गुरुः ॥ पुनर्व्याहृतिभिर्हुत्वा जिह्वादीनां वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावज्ञो ॥ एकैकामाहुतिं दत्वा परिषिंच्याग्निरात्मनि ॥ पावकं योजयित्वा स्वे परीधीन्स्तपरिस्तरान् ॥ नैमित्तिके देहेस्मंत्रीक्रिये
त्तुनदहेदिमान् ॥ व्याहृतिभिः महाव्याहृतिभिः ॥ पुनः समापयेद्धोमं महाव्याहृतिपूर्वकमिति वचनात् ॥ नमस्कारस्तु गो
त्रमीये ॥ पूर्णाहुतिं ततो दद्यात्षडग्निश्चैव विधानवित् ॥ ॐ भूरग्नये पृथिव्यै च महते स्वाहेत्यानथा ॥ भुवो वायवे चान्तरि
क्षाय महते स्वाहेत्या ततः ॥ स्वश्चन्द्रमसे दिग्भ्यश्च नक्षत्रेभ्यश्च स्वाहा ॥ ॐ भूर्भुवः स्वश्चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यश्च महते स्वा
हा ॥ पावकं योजयित्वेति तत्प्रकारस्तु गणेश्वरविमर्षिणां ॥ भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक ॥ कर्मान्तरेपि संप्रा
प्ते संनिधिं कुरु सादरं ॥ इति मंत्रेण संप्रार्थ्य वह्निमुद्वासयेदपीति ॥ शारदायां ॥ नेत्रे शिष्यवध्नीयान्नेत्रमंत्रेण वाससा ॥
महाकपिलपंचरात्रे ॥ नवेन भुक्तवस्त्रेण नेत्रे वध्नेत्तु कं ॥ पिंगलामते ॥ नेत्रवस्त्रेण तन्नेत्रे नेत्रमंत्रेण वंधयेत् ॥
नारायणीये ॥ नेत्राये नेत्रे नेत्रेण वंधयेदिति ॥ शारदायां ॥ करे गृहीत्वा तं शिष्यं कुंडतो मंडलं नयेत् ॥ तस्यांजलिपु
नः पुष्पैः पूरयित्वा यथाविधि ॥ कलशे देवतापीठे क्षेपयेन्मूलमुच्चरन् ॥ नारायणीये ॥ न्यासं शिष्यतनौ कृत्वा तं प्रद
क्षिणमानयेत् ॥ पश्चिमद्वारमानीय क्षेपयेत्कुसुमांजलिं ॥ पिंगलामते ॥ पुष्पैरंजलिमापूर्य योपीठे प्रदापयेत् ॥ प
श्चिमोत्तररुद्रेन्द्रैः पुष्पपातः शुभाशुभे ॥ आत्मयागक्रमाद्भूयः संहत्यो न्यासयेद्देशिकः ॥ तत्तन्मंत्रोदितान्न्यासान्कुर्याद्देहे
शिष्यस्य तदा ॥ आत्मयागो भूतशुद्धिः ॥ प्रयोगसारे ॥ गुणांशेन पृथिव्यादिभूतानि विलयं नयेत् ॥ यथावत्पिंडसंस्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ता॰ भ ॥
॥ ४५ ॥

निसंहारक्रमयोगतः ॥ ततः सृष्टिक्रमेणैव पिंडं संभावयेत्तदा ॥ मंत्रतंत्रप्रकाशे ॥ उपविश्यासने दिव्ये संहरेत्तस्य विग्रहं ॥
गंधादि घ्राणसंयुक्तां पृथिवीमप्सु च संहरेत् ॥ इत्यादि ॥ शारदायां ॥ पंचोपचारैः कुंभस्थां पूजयित्वेष्टदेवतां ॥ तस्यां तंत्रोक्त
मार्गेणाविदध्यात्सकलीकृतिं ॥ स्वनदनेन रंदेवतासकाशाद्वरप्रार्थनमुक्तमावार्य्यै ॥ कारुण्यनिलये देवि सर्वसंनिधि
संश्रये ॥ शरण्यवत्सले मातकृपामस्मिन् शिशौ कुरु ॥ अज्ञानप्रभवैः पाशैः पीडितस्य सुरेश्वरि ॥ दीनस्यास्य दयाधारे
कुरु कारुण्यमीश्वरि ॥ एहि कामुष्मिकैर्भोगैरपि संवर्द्धतामसौ ॥ सुभक्तिः सकलावास्मै दीयतां निष्कलाश्रय इति ॥ प्र
योगसारे ॥ अथेशान्यां दिशि यथा मंत्रविन्यस्तविग्रहं ॥ पीठस्थवज्ररक्षायां वेद्यां दर्भाग्रपाणिनं ॥ अभिषिंच्येत्स्वकं शि
घ्यमात्मतत्वाद्यवर्त्तिनं ॥ सोमशंभौ ॥ यागालयाद्दिशीशस्य रचितेस्नानमंडपे ॥ कुर्यात्करद्वयायामा वेदिमष्टांगुलो 54
च्छ्रितां ॥ श्रीपर्णाद्यासने तत्र विन्यस्यानंतमासने ॥ शिष्यं निवेश्य पूर्वास्यं सकलीकृत्य पूजयेत् ॥ तत्रैवः स्नाने तु द(
स्मृखप्रयुक्तौ पूर्वं च कुंभं च अकृये ॥ अन्यत्रापि ॥ मंडलं त्वीशदिक्कृत्वा गुरुः शुक्षत्रतत्तराननान् ॥ अकृये पूर्ववक्त्रांश्च शिष्यांस्त
त्रनिवेशयेत् ॥ शारदायां ॥ नदत्सु पंचवाद्येषु सार्द्धं विप्रशिषा गुरुः ॥ विधिवत्कुंडसंभूततत्त्वस्यानुस्मरन्मनून् ॥ शि
शोः शिरसि विन्यस्य मातृकामनसा जपेत् ॥ मूलेन साधिते तोयैरभिषिंच्य ततो न्यसेत् ॥ मातृकां विलोममातृकां ॥ ॥ राम ॥
क्षाद्यैरान्तैर्वर्णैरभिपूर्णां तद्विरुक्तमंत्राद्यैरिति क्रमदीपिकावचनात् ॥ शिष्यशिरसि संयोज्य विलोममातृकां जपेत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूलमंत्रं तथाजप्त्वा कुर्याद्देवाभिषेचनमिति गौतमीयवचनाच्च ॥ तथा ॥ पूजितां तु नरा राज्यवर्धनीमस्त्ररूपिणी ॥ तस्याः
सुसाधितैस्तोयैः सिंचेद्रक्षार्थमंजसा ॥ अवशिष्टेन तोयेन शिष्यमाचमयेद्गुरुः ॥ ततस्तं सकलीकृत्य देवतात्मानमात्म
वित् ॥ उत्थाय शिष्यो विमले वाससी परिधापयेत् ॥ आचम्य वाग्यतो भूत्वा निषीदेत्संनिधौ गुरौ ॥ देवतामात्मनः शिष्ये सं
क्रान्तां देशिकोत्तमः ॥ पूजयेद्गन्धपुष्पाद्यैरैक्यं संभावयंस्तयोः ॥ दद्याद्विद्यां ततस्तस्मै विनीतायां तु पूर्वकं ॥ वसिष्ठसंहिता
यां ॥ ततस्तच्छिरसि स्वस्य हस्तं दत्वा शतं जपेत् ॥ अष्टोत्तरं शतं वापि दद्यादुदकपूर्वकं ॥ गौतमीये ॥ न्यासजालं तस्य दे
हे गुरुः संन्यस्य यत्नतः ॥ दक्षकर्णे वदेन्मन्त्रं त्रिवारं पूर्णमानसः ॥ कुलामृते ॥ विद्यास्त्रिः कथयेत् कर्णे यावज्ज्ञानं च वापु
न ॥ दीपिकायां ॥ सर्व्वादियुक्तमथ मंत्रवरं यथावद्ब्रूयात्त्रिशो गुरुरनर्घमवामकर्णे ॥ अन्यत्रापि ॥ दक्षकर्णे त्रिशो विद्या
मेकोच्चारेण चोच्चरेत् ॥ एष विधिर्द्विजातीनां स्त्रीशूद्राणां च वामतः ॥ तन्त्रान्तरे ॥ आवयोः कल्पफलदो भव त्वेवमुदीरये
त् ॥ प्रसन्नवदनस्तस्मै शिष्याय मुनिपुंगव ॥ स्वतोज्योतिर्मयीं विद्यां गच्छन्तीं भावयेद्गुरुः ॥ आगतां भावयेच्छिष्य इति ॥
गौतमीये ॥ गणेशादिमनूंश्चोक्तान् समयान् कथयेद्गुरुः ॥ गणेशादिमंत्रदानं पंचायतनं दीक्षापक्षे ॥ दक्षिणामूर्त्तिसं
हितायां ॥ समीपे चक्रराजं च समभ्यर्च्य च देशिकः ॥ आद्याक्षरेणासंलग्नं सुंदरं नाम कल्पयेत् ॥ आत्मानं योजयित्वा तु
गुरुभिर्मानवैस्ततः ॥ स्मर्त्तव्या गुरवः सर्वे सम्यक् प्रणतिपूर्वकं ॥ भूमौ लिखित्वा विद्यां च सम्यक् पुष्पादिभिर्यजेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्याय दर्शयेत्क्रियां अज्ञप्राज्ञानथाप्रिये ॥ यदि स्यान्महतीश्रीतिः शिष्यस्य प्राणादस्य च । तदैकोच्चारणमात्रेण दक्षकर्णे ज
पेत्परं ॥ तंत्रराजे ॥ उक्तलक्षणसंपन्नं शिष्यमाचारभूषणं ॥ पंचषट्कूटविद्याभ्यां शोधितं वकुवासरे । कलशैरभिषिं
च्यां श्रीचक्रे संनिवेश्य च ॥ आधारे हृदये मूर्ध्नि चक्रं संचिन्त्य मध्यतः ॥ स्वांतादावाह्य संस्थाप्य संपूज्य न्याससंयुतं ॥ त्रिं
शोविद्यां वदेत् ॥ कर्णे देयात्मपूर्णमानसः ॥ देवतागुरुमंत्रात्मनत्वैक्यं भावयन्मुदा ॥ शतं जपेत्तदग्रस्थो निकटे त्रिदि
नं वसेत् ॥ तवेत्थं चारिणी शक्तिर्गृहमेति न संशयः ॥ मंत्रतंत्रप्रकाशे ॥ आचार्यादनभिप्राप्तः प्राप्तश्चादत्तदक्षिणः ॥ स
ततं जप्यमानोपि मंत्रसिद्धिं न यच्छति ॥ सर्वस्वं वा तदर्धं वा वित्तशाठ्यविवर्जितं । गुरवे दक्षिणां दत्वा ततो मंत्रग्रहो म
तः ॥ तंत्रांतरे ॥ गोभूहिरण्यविपुलं गृहक्षेत्रादिकं वकु ॥ तवेदर्धं तदर्धं वा तद्दशांशमथापि वा । अंकेशादत्तवस्त्रादि दद्या 55
द्वित्तानुसारतः ॥ ब्रह्मसंहितायां ॥ अदक्षिणाकृतं कर्म वृथा नारदनीप्सितं ॥ वीराणां मे दक्षिणां देहि साक्षसूत्रकमण्डलुं
ततो मंत्रं गृहाण त्वं यथाविधि महामुने ॥ विधिहीनकृतं कर्म सिद्धिं नैव प्रयच्छति ॥ गौतमीये ॥ गुरवे दक्षिणां दद्याद्वि
त्तार्धं भक्तितत्परः ॥ तदर्धं वा ततो दद्याद्यथाशक्तिथ भक्तितः ॥ वित्तशाठ्यं न कुर्वीत कृते नर्थः समावहेत् ॥ गोभूहिर ॥ राम ॥
ण्यवस्त्रादि गुरवे थ निवेदयेत् ॥ गुरुपुत्रेपि तत्पत्न्यै तच्छिष्येपि स्वशक्तितः ॥ वस्त्रालंकरणं दद्यात् ज्ञात्वाभिष्टं यथा हवि ॥ ४९ ॥
त्तविभ्यो दक्षिणां दद्यात् वस्त्रालंकारसंयुता ॥ ब्रह्मसंहितायां ॥ प्रणीतामार्जनं कृत्वा दद्याद् ब्रह्मदक्षिणां ॥ स्वस्वविता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उत्सारेण लोभमोहविवर्जितः ॥ ततो ब्राह्मणाञ्छास्त्रज्ञान्गणान् भोजयेदथ ॥ आशिर्वचोभिर्विप्राणां वर्धमानः सुखी भवेत्
कृतशेषं ततः प्राश्य कुक्कुटांडप्रमाणकं ॥ मंत्रितं मंत्रगायत्र्येति ॥ वायवीयसंहितायां ॥ मंडपं गुरुर्वेद्यायागांगोपकर
णैः सह ॥ नारायणीयमहाकपिलपंचरात्रयोः ॥ मंत्रं दत्वा सहस्रं वै स्वसिद्ध्यै देशिको जपेत् ॥ अन्यत्रापि ॥ अष्टोत्तरं
सहस्रं स्वशक्तिहानान्वाग्रयेनप्यान् ॥ कुलामृते ॥ दत्वैवं प्रणतेः शिष्यं सर्वा वाराश्च शिक्षयेत् ॥ तंत्रान्तरे ॥ स्नाने संध्यास
दाचारनित्यं काम्यं तथैव च ॥ मंत्रसिद्धिप्रकारांश्च शिष्यायाभिवदेद्गुरुः ॥ समयाश्चारश्च वक्तव्ये ॥ दीक्षादिवसे उपवासो
निषिद्धः ॥ तदुक्तं योगिनीतंत्रे ॥ मंत्रं दत्वा गुरुश्चैव उपवासं च आचरेत् ॥ महांधकारनरके कृमिर्भवति नान्यथा ॥ दीक्षा
कृत्वा यदा मंत्री चोपवासं समाचरेत् ॥ तस्य देवः सदा रुष्टः शापं दत्वा पुरं व्रजेत् ॥ ॥ अथ वीरदीक्षाया विशेषः ॥ तत्र
भूतशुद्धिमातृकान्यासषोढान्यासादिकं सर्वं गुरुः स्वशरीरे शिष्यशरीरे च विधाय कलशस्थापनं श्रीपात्रादिस्थापनं च कृ
त्वा तृतीयागक्रमेण कुंडगोलोत्थद्रव्यभन्यापसंस्कृतमत्स्यमांसादेरपि संस्कारं विधाय वक्ष्यमाणवीरपूजाक्रमेण देवता
संतर्प्य शिष्याय मंत्रदानसमये ॥ शिष्यहस्ते महेशानि पात्रं दत्वा कुलेश्वरीति वीरवृन्दसमायुक्तवीरपात्रं ॥ इदं पवित्र
ममृतं पीयतां भवभेषजं ॥ पशुपाशसमुच्छेदकारणं भैरवोदितमिति कुलार्णवोक्तमंत्रेण शिष्यहस्ते दद्यात् ॥ शि
ष्योप्यनेनैव मंत्रेण पीयतामित्यत्र पिबामीति पठित्वा वक्ष्यमाण धर्माधर्महविर्दीप्त इत्यादि मंत्रेण पिबेत् ॥ ततो गुरु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ता.प॥ मंत्रं दद्यात्॥ तंत्रयामले॥ अष्टादिसंहितामेतां लिखित्वा भूमिमध्यगां॥ पुष्पादिना समभ्यर्च्य शिष्यायाथ प्रदर्शयेत्॥ यति
॥ ॥ शिष्ये महाप्रीतिस्तदा कर्त्तव्य देवगुरुः॥ ततोप्यतितरां शिष्यो गुरौ श्चेत्प्रीतिभाजनं॥ तदा गेहव्ययपूर्वं हि दद्यादेतां गुरुस्ततः॥
निर्विकल्पोपि शिष्यस्तं शङ्कीयाद्दृष्टमानसः॥ तदभावे न सिद्धिः स्याद्देवताशापमाप्नुयात्॥ दक्षिणामूर्त्तिसंहितायां॥ क
लशे स्थैः पञ्चवैस्तु त्रिवारं प्रोक्षयेच्छुभं॥ भवयदाभिषिक्तस्तदासौ देशिकाग्रणीः॥ गेहव्ययतत्त्वसंयुक्तस्तदा हीयं शिवा
र्पिते॥ अन्यथा नैव सिद्धिः स्यात्सविकल्पस्य पार्वति॥ गेहव्ययदाने शिष्यस्य विकल्पो यदि जायते॥ न सिद्धिस्तस्य कुत्रापि पृथ्वी वि
द्यापि पराम्बिके॥ शेषं यथा समानं॥ ॥अथ तारादीक्षायां विशेषो नीलतंत्रे॥ अष्टोत्तरसहस्रं हि होमं बिल्वपत्रेणाकार
येत्॥ अथवाष्टशतं कुर्यादष्टविंशतिमेव वा॥ पायसं कृशरं दध्यन्नं मोदकं खण्डशर्करां॥ बलिं दत्त्वा छागलं वै गोधामांस
मत्स्यकं॥ रम्भाफलं शालमत्स्यं जुहुयाच्च प्रयत्नतः॥ यवक्षीरं ततो हुत्वा शाल्यन्नं मधुना सह॥ गोभूहिरण्यवस्त्राद्यैस्तोष
येद्गुरुमात्मनः॥ चामुंडातंत्रे॥ उपविद्यासु सर्वासु षट्कर्मादिप्रसाधने॥ नात्र दीक्षाद्यपेक्षास्ति नाङ्गादिप्रपूजनं॥ उपवि
द्यायक्षिण्यादिः षट्कर्मादिप्रसाधनः मन्त्रा यथा कालिकामंत्रप्रयोगे वश्यादौ मंत्रविशेषाः॥ मंत्रपुस्तके लिखितो मंत्रो ये ॥राम॥
न सुंदरि जप्यते॥ ततस्य जायते सिद्धिर्हानिरेव पदे पदे॥ गुरुप्रोक्ताः क्रियाः सर्वा भुक्तिमुक्तिफलप्रदाः॥ गर्वयुक्ताः क्रि ॥४७॥
याः सर्वा निष्फलाः स्युर्यतो ध्रुवं॥ इत्यादिना वचनात्कथमेवमिति चेन्न॥ न कुंडमंडपाचार्यादिवरणहोमादिपूर्वकदी

56

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्षान्तिषेधेष्वुपदेशान्निषेधात् ॥ तंत्रांतरे ॥ चंद्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ॥ मंत्रमात्रप्रकथनमुपदेशः स उच्यते ॥ इत्यादिना उ
पदेशस्यापि विहितत्वात् ॥ न च शास्त्राद्गुरुवक्त्राज्ज्ञात्वा मंत्रं प्रसाधयेदिति वचनात् ॥ पुस्तकादपि मंत्रज्ञानं सिद्धिजनकमिति वा
च्यं ॥ अत्रेतिकर्तव्यतायाः शास्त्रेणाज्ञानविधानात् ॥ मंत्रमित्यस्य साधयेदित्यनेनैवान्वयात् ॥ इति क्रियावती दीक्षाविधिः ॥ ए
तदशक्तो वर्णमय्याद्यन्यतमदीक्षा विधेया ॥ तत्र वर्णमयी यथा शारदायां ॥ अथ वर्णात्मिकां वक्ष्ये दीक्षामागमदेशितां ॥ पं
प्रकृत्यात्मका वर्णाः शरीरमपि तादृशं ॥ यतस्तस्मात्तनौ न्यस्येद्वर्णान् शिष्यस्य देशिकः ॥ तत्तस्थानगतान्वर्णान् प्रतिलोमेन संह
रेत् ॥ स्वाज्ञया देवताभावाद्विधिना देशिकोत्तमः ॥ तदा विलीनतत्त्वोयं शिष्यो दिव्यतनुर्भवेत् ॥ परमात्मनि संयोज्य तचैतन्यं गु
रूत्तमः ॥ तस्मादुत्पाद्य तान्वर्णान्न्यसेच्छिष्यतनौ पुनः ॥ सृष्टिक्रमेण विधिवच्चैतन्यं च नियोजयेत् ॥ जायते देवताभावः परा
नंदमयः शिशुः ॥ एषा वर्णमयी दीक्षा प्रोक्ता ज्ञानप्रदायिनी ॥ इति वर्णमयीदीक्षाविधिः ॥ ॥ अथ कलावतीदीक्षावि
धिः ॥ तत्रैव ॥ ततः कलावतीदीक्षा यथावदभिधीयते ॥ निवृत्याद्याः कलाः पंच भूतानां शक्तयो यतः ॥ तस्माद्भूतमये देहे ध्या
त्वा ता वेधयेच्छिशुं ॥ निवृत्तिर्जानुपर्यन्तं तलादारभ्य संस्थिता ॥ जानुतो नाभिपर्यन्तं प्रतिष्ठा व्याप्य तिष्ठति ॥ नाभेः कंठावधि
व्याप्ता विद्या शांतिस्ततः परं ॥ कंठाल्ललाटपर्यन्तं व्याप्ता तस्माच्छिवावधि ॥ शांत्यतीता कला ज्ञेया कलाव्याप्तिरितीरिता ॥ संहार
क्रमयोगेन स्थानात्स्थानान्तरे गुरुः ॥ संयोज्य वोधयेच्छिवानाज्ञयानाः शिवावधि ॥ इयं प्रोक्ता कलादीक्षा दिव्यभावप्रदायिनी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति कलावतीदीक्षाविधिः ॥ ॥ अथ वेधमयीदीक्षा ॥ तन्त्रैव ॥ ततो वेधमयीं वक्ष्ये दीक्षां संसारमोचनीं ॥ ध्यायेच्छिष्यतनोर्म-
ध्ये मूलाधारे चतुर्दले ॥ त्रिकोणमध्ये विमले तेजस्त्रयविजृंभिते ॥ वलयत्रयसंयुक्तां तडित्कोटिसमप्रभां ॥ शिवशक्तिमयीं दे-
वीं चेतनामात्रविग्रहां ॥ सूक्ष्मात्सूक्ष्मतरां शक्तिं भित्वा षट्चक्रमंजसा ॥ गच्छन्तीं मध्यमार्गेण आदिव्यापशिवावधि ॥ वादिसां-
तदलस्थार्णान् संहरेत्कमलासने ॥ तं षट्पत्रमये पद्मे वादिलान्ताक्षरान्विते ॥ स्वाधिष्ठाने समायोज्य वेधयेदाज्ञया गुरु-
स्तान्वर्णान्संहरेद्विद्वांस्तं पुनर्नाभिपंकजे ॥ दशपत्रे डादिफान्तवर्णाढ्ये योजयेद्गुरुः ॥ तान्वर्णान्संहरेद्देवं ततो हृदयांबुजे
कादिठान्तार्कवर्णाढ्ये योजयित्वेश्वरे गुरुः ॥ तान्वर्णान्संहरेदस्मिंस्तं भूयः कंठपंकजे ॥ स्वराढ्ये षोडशदले योजयित्वा स्व-
रांस्तु तान् ॥ सदाशिवे तान्संहृत्य ततस्तं भ्रूसरोरुहे ॥ द्विपत्रे हलक्षमिते योजयित्वा ततो गुरुः ॥ तद्वर्णौ संहरेद्बिन्दौ कला-
यां तं नियोजयेत् ॥ तान्नादे तं ततस्तं नादं नादान्ते योजयेद्गुरुः ॥ तमुन्मन्यां समायोज्य विष्णुवक्त्रान्तरे स्थितां ॥ ततस्तं गुरुवक्त्रे
तु योजयेद्देशिकोत्तम ॥ स हि वमात्मनाशक्तिं वेधयेत्परमेशिवे ॥ गुर्वाज्ञया छिन्नपाशस्तदा शिष्यः पतेद्भुवि ॥ संजात-
दिव्यबोधोसौ सर्वं वदति तत्क्षणात् ॥ साक्षाच्छिवो भवत्येष नात्र कार्या विचारणा ॥ एषा वेधमयीदीक्षा प्रोक्ता संवित्प्र-
दायिनी ॥ इति वेधमयीदीक्षाविधिः ॥ ॥ षडन्वयमहारत्ने ॥ आणवी बहुधा दीक्षा शाक्तेयी शांभवी पुनः ॥ एकधैवेति
विद्वद्भिः पश्यते शास्त्रकोविदैः ॥ आणवी बहुधेत्युक्ता तद्भेदस्त्वधुनोच्यते ॥ स्मार्त्ती मानसिकी योगी चाक्षुषी स्पार्शनी तथा

57

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाचिकी मान्त्रिकी होत्री शास्त्री वेत्यभिषेचिकी ॥ विदेशस्थं गुरुं स्मृत्वा शिष्यपार्श्वत्रयं क्रमात् ॥ विशिष्य लयभोगस्य विधाने
न परे शिवे ॥ सम्यग्गणाज्जनरूपे यास्मात्तीर्दीक्षेति कथ्यते ॥ स्वसंनिधौ समासीनमालोक्य मनसा गुरुः ॥ मलत्रयाउपायैर्यामो
चकी मानुमानसी ॥ योगोक्तक्रमतो योगी शिष्यदेहं प्रविश्य तु ॥ गृहीत्वा तस्य चात्मानं स्वात्मना योजनात्मिका ॥ योगदीक्षेति
सा प्रोक्ता मलत्रयविनाशिनी ॥ शिवोहमिति निश्चित्य वीक्षणात्करुणार्द्रया ॥ दृशा सा चाक्षुषी दीक्षा सर्वपापप्रणाशिनी ॥
अयं परशिवो भूत्वा निःसंदिग्धमना गुरुः ॥ शिवहस्तेन शिष्यस्य समंत्रं मूर्द्धि संस्पृशेत् ॥ स्पर्शदीक्षेति सा प्रोक्ता शिवाभि
व्यक्तिकारिणी ॥ गुरुवक्त्रं निजवक्त्रं विभाव्य गुरुरादरात् ॥ गुरुवक्त्रप्रयोगेन दिव्यमंत्रादिकं शिशोः ॥ मुद्रान्यासादिभिः
सार्धं दद्यात्सो यं हि वाचिकी ॥ दीक्षापरान्तथा मंत्रन्यासमेयुक्तविग्रहः ॥ स्वयं मंत्रतनुर्भूत्वा सक्रमं मंत्रमादरात् ॥ दद्या
त्तु शिष्याय सा दीक्षा मांत्री मलविघातिनी ॥ कुंडे वा स्थंडिले वापि निःक्षिप्याग्निविधानतः ॥ लयभोगक्रमेणैव प्रत्यध्वानं
यथाक्रमं ॥ मंत्रवर्णकलातत्त्वपदविश्वप्रमेव च ॥ शुद्ध्यर्थहोममन्ये देवा होत्री दीक्षा समीरिता ॥ योग्यशिष्याय भक्ताय सु
श्रूषावर्यपराय च ॥ सार्धं शास्त्रप्रदानं यच्छास्त्री दीक्षेति वोच्यते ॥ शिवं च शिवपत्नीं च कुंभे संपूज्य सादरं ॥ शिवकुंभा
भिषेकात्मा दीक्षा स्याद्भिषेचिकी ॥ लयभोगस्येति वेधदीक्षाक्रमेण मूलाधारादिस्थवर्णदेवतासंहाररूपस्येत्यर्थः ॥
शिवहस्तेनेति· गंधैर्मंडलकं स्वीये विदध्याद्दक्षिणे करे ॥ विधिनार्चयेद्देवमित्थं स्याच्छिवहस्तकमिति सोमशंभुप्रोक्तरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना·भ ॥ पेशान्यर्थे ॥ ॥अथ पूर्णाभिषेक ॥ सारसंग्रहे ॥ पूर्णाभिषेकं वक्ष्यामि साधकानां शुभावहं ॥ विना येनाभिषेकेन साधकः पूर्णबो
॥ ५९ ॥ धतां ॥ आचार्यत्वं न चाप्नोति महतिं च समीहितां ॥ तस्मात्कुरुः प्रियं शिष्यं बोधयित्वाभिषेचयेत् ॥ विरच्य विपुलं चक्रं मं
डपेति मनोहरे ॥ खारीतोयमृतं कुम्भं स्थापयेच्चक्रमध्यतः ॥ अन्येषु कलशांस्तत्र वस्त्रहेमसमन्वितान् ॥ दलेषु विधिव
त्स्थाप्य तत्रावाह्येष्टदेवता ॥ अभ्यर्च्य मध्ये चान्येषु चांगावरणदेवताः ॥ शिष्यस्य जन्मनक्षत्रप्राप्तैरभिषेचयेत् ॥ त्रि
शक्तिरत्ने ॥ नानोपचारैः संपूज्य सहस्रं जुहुयाद्गुरौ ॥ अभिषिच्य गुरुः शिष्यं नामास्मै प्रदिशेत्स्वयं ॥ पूर्णाभिषेकरवा
तोयमाचार्यत्वप्रदायकः ॥ सारसंग्रहे ॥ अयं पूर्णाभिषेकः स्यात्साधकाभीष्टसिद्धिदः ॥ खारीलक्षणां स्कंदपुराणोपल
क्ष्यं तु प्रभृतिः कुडवं द्विगुणां मतं ॥ चतुर्भिः कुडवैः प्रस्थ आढकस्तैश्चतुर्गुणैः ॥ चतुर्गुणो भवेद्द्रोणः कुम्भस्तद्वयतः स्मृतः
कुम्भैस्तैरष्टभिः खारीति ॥ अयं च पूर्णाभिषेकः कौलिकानामावश्यकः ॥ पूर्णाभिषेकहीनस्तु कौलिको म्रियते यदि ॥ पि
शाचत्वमवाप्नोति यावदाहूतसंप्लवमिति कुलार्णववचनात् ॥ कौलिको वीरः ॥ इति पूर्णाभिषेक ॥ ॥ तंत्रशेखरे
छिन्नादिदोषदुष्टा ये मन्त्राः संप्रकीर्तिताः ॥ सततं सेव्यमानास्ते न भवन्ति फलप्रदा ॥ अनन्तदोषनाशाय संस्कारान्दशव ॥ राम ॥
क्ष्महे ॥ त्रिकोणं संप्रधा मंत्री विभज्यात्समभागतः ॥ ईशकोणात्तथा कुर्यात्तथा पावककोणतः ॥ तु नये वाशदेवं स्युयोनय ॥ ५९ ॥
स्तत्र सर्वतः ॥ यथानिर्दिष्टलिखेन्मंत्री वरुणं तं लिपिक्रमात् ॥ अत्र देवीं समभ्यर्च्य अतो मंत्रान्समुद्धरेत् ॥ स्पनज्ञनतमिमाऊर

58

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थोदीपनमुच्यते ॥ पुटितं हंसमंत्रेण सहस्रं संजपेन्मनुं ॥ इदं दीपनमाख्यातं बोधनं तन्निगद्यते ॥ वर्मणारेफयुक्तेन पुटितं
संजपेन्मनुं ॥ सहस्रैः पंचभिर्मंत्री बोधनं संस्मृतं त्विदं ॥ अस्त्रसंपुटितं मंत्रं सहस्रं प्रजपेत्सुधीः ॥ एतत्ताडनमाख्यातमभि
षेक उदीर्यते ॥ वाक्हंसप्रणवैर्मंत्री सहस्रं संजपेज्जलं ॥ इमं मनं च पठन्मंत्रमभिषिच्याज्जले शुभे ॥ तावन्त्योमिति मं
त्रेणावघडं तेन संपुटं ॥ सहस्रं संजपेन्मंत्रं विमलीकरणं त्विदं ॥ सुधाशिखापुटं मंत्रं सहस्रं संजपेत्सुधीः ॥ एतज्जीवन
माख्यातं दुग्धाज्यमिलिते जले ॥ तर्पणं तर्पणाख्यातं मायया संपुटे मनुं ॥ सहस्रैः पंचभिर्जप्रो गोपनं तन्मुच्यते ॥ गो
तमीयेन्तु ॥ मधुनाशक्तिमंत्रेण वैस्मवे चेनुमजले ॥ घृतेन तर्पणं शैवे मंत्रैभिः सम्यगीरितं ॥ तथा ॥ श्वेतवक्त्रानुग्रहे
नु संपुटं प्रजपेन्मनुं ॥ एतत्साप्यायनं प्रोक्तं मंत्रे शास्त्रविशारदैः ॥ संप्रोक्ता दशसंस्कारा मंत्राणां तंत्रचोदिताः ॥ भूतः षक्का
रः मंत्रः सकारः स्यन्नुग्रहडोकारः ॥ शारदातिलकादौ प्रोक्तान्येता दशसंस्काराउक्तास्ते तत्रैवानुसंधेया ॥ ॥ अथानिष्टफ
लदमंत्रपरित्यागविधिरुच्यते ॥ तंत्रे ॥ अथारिमंत्रसंत्यागविधिसम्यक्प्रकाश्यते ॥ अरीन्नुयलक्षणां ॥ अनिष्टफलदेति
बोध्यं ॥ तथा ॥ शुचिः समाहितो भूत्वा प्रारंभे त्रवरेदिने ॥ अशेषदुःखनाशाय देशिकः प्रवरविधिं ॥ तत्रादौ रम्यभवने कुं
भदीक्षाविधिक्रमात् ॥ मंडयेत्स्थापयेद्विद्वान् पूरयेत्तं जले शुभे ॥ विलोममंत्रपाठेन तत्रावाह्य तु देवतां ॥ सकलीकृत्य सं
पूज्यावरणानि प्रपूजयेत् ॥ एवं संसावरणामिष्टां मंत्री मंत्रस्य देवतां ॥ ऊत्वा विलोममंत्रेण सर्पिषा गोरपि द्विजः ॥ ततोय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

थावत्पुष्पान्नैर्देवताभ्यो वलिंहरेत्॥ विदिक्षुदिक्षुवत्तथा वक्ष्यमाणैर्मनूत्तमैः॥ आयाहीन्द्रसुराधीशशक्रनमस्तोशचीपते॥ न
मस्तुभ्यंगृहाणेमंपुष्पधूपादिकंवलिं॥ आयाहित्वंजगन्नाथहव्यवाहवरप्रद॥ गृहाणपुष्पधूपादिवलिमेनंसुपूजित
प्रेतराजसमायाहिभिन्नांजनसमद्युते॥ वलिन्दत्तंगृहीत्वेमंसुप्रीतोवरदोभव॥ नमस्तेरक्षसांनाथनिर्ऋतेत्वमिहागत
गृहाणवलिपूजादिमयाभक्त्यानिवेदितं॥ एहिपश्चिमदिक्पालजलनाथनमोस्तुते॥ भक्त्यानिवेदितांपूजांगृहीत्वाप्री
तिमावह॥ प्रभंजनगणापतेत्वमेहिसपरिच्छदः॥ मयाप्रयुक्तंविधिवद्गृहाणवलिमादरात्॥ कुवेरनारकाधीशवा
गच्छत्वंसुरोत्तम॥ पुष्पधूपादिभिःप्रीतोभवत्वंवरदोमम॥ ईशत्वमेवभगवन्सर्वविद्याश्रयप्रभो॥ पूजितःपुष्पधू
पाद्यैःप्रीतोभवविभूतये॥ आयाहिसर्वलोकानांनाथब्रह्मन्नमर्चनं॥ गृहाणसर्वविघ्नान्मेनिवर्त्तयनमोस्तुते॥ आगच्छ
वरदाव्यक्तविष्णोविश्वस्यनायक॥ पूजितःपरयाभक्त्याभवत्वंसुखदोमम॥ ततःसपरिवारांचपूजयेन्मंत्रदेवतां॥ आ
उकूल्यमनालोक्यमयातरलबुद्धिना॥ यदुयातंपूजितंचप्रभोमंत्रस्वरूपकं॥ तेनमेमनसःक्षोभमशेषंविनिवर्त्तये॥
पापंप्रतिहतंचास्तुपूजाश्रेयःरयोततं॥ ततोतुममकल्याणंपावनीभक्तिरेवते॥ इतिसंप्रार्थ्यदेवेशींमंत्रपत्रेविलोमत
लिखित्वामलकर्पूरचन्दनेनसमर्चयेत्॥ कलशोपरिसंस्थाप्यभक्त्यापरमयाततः॥ तन्मंत्रंमतिमान्पश्चाद्दत्वानिजशिर
स्यथ॥ स्नात्वापूजितकुंभस्थतोयैर्मंत्रमयैःशुभैः॥ भूयश्चामेनतोयेनकुंभमापूर्यसंयतः॥ तन्मध्येमंत्रपत्रंचनिःक्षिप्या

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

थप्रपूजयेत् ॥ तंकुंभंनिम्नगानीरेशुद्धेवान्येजलाशये । निःक्षिपेदथविप्रांश्चयथाशक्त्याथभोजयेत् ॥ इत्थंकृतविधानस्यशिष्यं मं
त्रोद्भवारुजः ॥ नश्यंतेवनसंदेहःक्रमाच्चित्तप्रसन्नता । जायतेजीवसंपन्नोवर्धतेवकुलक्रमादिति ॥ ॥ इतिमहामहोपाध्या
यसद्गुरुश्रीनरसिंहविरचितेनारायभक्तिसुधार्णवेसप्तमीयस्तरंगः ॥ ॥ अथगुरुभक्तिःकुलार्णवे ॥ नारायणोमहादेवे
मातापित्रोश्चराजनि ॥ यथाभक्तिर्भवेद्देवितथाकार्यानिजेगुरौ ॥ तथा ॥ एकग्रामस्थितःशिष्यस्त्रिसंध्यंप्रणामंकुरुं ॥ एवंक्रो
शस्थितश्चापिगुरुंप्रतिदिनंनमेत् ॥ अर्धयोजनगःशिष्यःप्रणमेत्पंचपर्वसु ॥ एकयोजनमारभ्ययोजनद्वादशावधि
तत्तद्योजनसंख्यातैर्मासैर्गत्वानमेद्गुरुं ॥ अतिदूरेस्थितःशिष्योयदेच्छास्यात्तदाव्रजेत् ॥ रिक्तहस्तस्तुनोपेयाद्राजानंदैवतंगु
रुं ॥ फलपुष्पाम्बरादीनियथाशक्त्यासमर्पयेत् ॥ तथा ॥ गुर्वग्रेनतपःकुर्यान्नस्नायाद्यान्नभुंजये ॥ ननियोगंगुरोर्दद्याद्गुरुम्मदा(
नाभिभाषयेत् ॥ तथा ॥ ऋणादानंतथादानंवस्तूनांक्रयविक्रयं ॥ नकुर्याद्गुरुभिःसार्धंशिष्योभूत्वाःकदाचनः ॥ गुरौसंनिहिते
यस्तुपूजयेदन्यमविवेके ॥ संजातिनरकंघोरंपूजासाविफलाभवेत ॥ यस्मिन्द्रव्येगुरोरस्तिस्पृहानानुभवेत्तत् ॥ अवश्यंयदि
वांछास्यात्तद्गुभूयात्तदाज्ञया ॥ अल्पमल्पंहिगुरोर्द्रव्यमदत्तंस्वीकरोतियः ॥ तिरश्चांयोनिमापन्नःकृत्वादैर्भक्ष्यतेप्रिये ॥ गुरुद्रव्या
भिलाषीवगुरुस्त्रीगमनोन्मुकः ॥ पतितःस्यान्नसंदेहःप्रायश्चित्तंनविद्यते ॥ गुरुस्थानंसंप्रदायंतद्धर्मंयोनिवारयेत् ॥ गुरुभि
:सवहिःकार्योदंड्योवेध्यश्चपातकी ॥ पादुकासनवस्त्रवाहनंछत्रचामरे ॥ दृष्ट्वागुरोर्नमस्कुर्यात्तत्भोगायकल्पयेत् ॥ उक्ता

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ता·म॥
॥५१॥

गुरूक्तेषु कार्येषु नोपेक्षां कारयेत्प्रिये ॥ सहसमयकुरुर्वीयान्तन्कार्यमविशंकया ॥ तस्मात्स्वाश्रमं कृत्वा गुर्वाज्ञां परिपालयेत् ॥ नवि
शेदासने देवि देवता गुरुसन्निधौ ॥ जातिविद्याधनाढ्यो वा दूरे दृष्ट्वा गुरुं मुदा ॥ दंडप्रणामं कृत्वैकं त्रिः प्रदक्षिणमाचरेत् ॥ तथा
गुरुं न कुर्यागे तु वंदेत प्रगुरुं प्रिये ॥ नतो नमेत् गुरुं सोऽपि गर्वेणेनं निवारयेत् ॥ प्रगुरोः सन्निधौ शिष्यः स्वगुरुं मनसा नमेत् ॥
श्रीगुरुं न त्यजेत्क्वापि नदादिष्टेतु जेत्प्रिये ॥ अधःस्थिते गुरावूर्ध्वं न तिष्ठेत्तु कदाचन ॥ न गच्छेदग्रतस्तेषां न तिष्ठेत्तु स्थिते गुरौ ॥
तिष्ठेत्तु यदि स्पृष्टेति शेष ॥ यत्र श्रीगुरुनिन्दा स्यान्निधाय श्रवणौ स्वके ॥ सम्यस्तस्मादपक्रामेद्दूरं न शृणुयाद्यथा ॥ गुरुनामजपे
त्पश्चात्सु वरणोत्साप्रतिक्रिया ॥ गुरुमित्रसुहृद्दासीदासाद्यान्नावमानयेत् ॥ गुरुशक्तिश्च तत्पुत्रो ज्येष्ठो भ्राता गुरोः समः ॥ आ
त्मवत्कनीयांसः पुत्रवत् कुलपालिका उपचर्या यमिनिर्देशः ॥ ॥ अथ समयाचारः ॥ भैरवतंत्रे ॥ महाचीनक्र
मे रौवना राशीघ्रफलप्रदा ॥ गंधर्वखक्रमे रौव पंचमीचैव तुर्ध्वभा ॥ महानीलक्रमे रौव कालिकाफलदायिनी ॥
तथा ॥ महानीलक्रमेरौ वह्निन्नमस्ताविधिर्मतः ॥ कालीतंत्रे महाचीनक्रमेरौव ताराशीघ्रफलप्रदा ॥ महाचीनो
वौद्धवज्ञलादेश विशेषः तत्क्रमभ्योक्तः सारसंग्रहे ॥ स्नानादिमानसं शौचं पूजनं चापि तर्पणं ॥ सर्वस्वक्रमः कालो
नाशुभं विघ्नेकश्चित् ॥ नविशेषो दिवारात्रौ न संध्यायां न वा निशि ॥ सर्वदा पूजयेद्देवीमस्नानः कृतभोजनः ॥ महानि
शायां चोदेशे वलिं मंत्रेण दापयेत् ॥ स्त्रीद्वेषो नैव कर्तव्यो विशेषात्पूजनं स्त्रियः ॥ जपस्थाने महाशंखं निवेश्योर्ध्वं चरे(

60

॥राम॥
॥५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञपं॥ स्त्रियंगछन्स्मशानेवापि यत्र कुत्रापि यत्कृते॥ भक्षनन्नं तांबूलमन्यांश्च भक्षद्रव्यान् यथारुचीन्॥ मत्स्यमांसं तथा क्षौडं पयः
शाकाद्यमेक्षवं॥ भक्त्या ग्राह्येषद्रव्याणि दत्वा भुक्त्वाचरेज्जपं॥ दिग्देशानियमो नात्र स्थित्यादिनियमो नहि॥ न जपे कालनियमो
नार्चादिष्वतिथिष्वपि॥ स्वेछानियममुक्तोत्र मस मंत्रस्य साधने॥ नाधर्मो जायते नत्र किंचिः धर्मः प्रजायते॥ स्वेछाचारेव
कथितः प्रचरेदुष्टमानसः॥ कृतार्थमन्यमानं तु संतोषनिजमानसं॥ यस्मिन्मन्त्रे य आचारस्तत्र धर्मस्तु नाद्दशः॥ कृतार्थमे
न जायेत स्वर्गो वा मोक्ष एव वा॥ स्वछन्दभैरवतंत्रे॥ नशौचादिक्रियाः कार्याः स्मृतिशास्त्रप्रचोदिताः॥ एकालिंगे गुदे नित्सद्
न्याशायनस्कीर्त्तिताः॥ न ते कार्याः साधकेन्द्रैर्यदीच्छेच्चिरजीवितं॥ यामले॥ अथाचारं प्रवक्ष्यामि यत्कृते मृतनमश्नुते॥ सर्वे
भूतहिते रक्तः समयाचारपालकः॥ अनित्यकर्मसंन्यागी नित्यानुष्ठानतत्परः॥ परस्यां देवतायां तु सर्वकर्मनिवेदकः॥
स्यादितिशेषः॥ अनित्यकर्मन्यादिमोक्षकामः कामनया किमपि कर्म न कुर्यात्॥ नित्यनैमित्तिककर्म परोमन्त्राराधनेनैव
ममशिवं भवितेतिभावयन् कृतं कर्म देवतायै समर्पयेदित्याखंडलकार्थः॥ अन्यमंत्रार्चनं श्रद्धामन्यमंत्रस्य पूजनं॥
कुलस्त्रीवीरनिन्दा च नद्रव्यस्यापहारणं॥ स्त्रीपुरोषं प्रहारं च वर्जयेन्मतिमान्सदा॥ स्त्रीमयं च जगत्सर्वं स्वयं तावत्तथा
भवेत्॥ पेयं चर्व्यं तथा चोष्यं भक्ष्यं लेह्यं च हंसुखं॥ सर्वं चशुवनीरूपं भावयेद्यतमानसः॥ कुलजां शुवनीं वीक्ष्य नमस्कुर्या
त्समाहितः॥ यदि भाग्यवशेनैव कुलदृष्टिस्तु जायते॥ तदैव मानसीं पूजां तदा तासां प्रकल्पयेत्॥ बालां वा यौवनोन्मत्तां

॥ ता·भ ॥
॥५२॥

कृशाङ्गीं वा सुन्दरीं तथा ॥ कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत् ॥ तासां प्रहारं निन्दां च कौटिल्यमप्रियं तथा ॥ सर्वथा
न च कर्तव्यमन्यथा सिद्धिरोधकृत् ॥ स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणं ॥ स्त्रीसंगिना सदा भाव्यमभावे(
स्वस्त्रियामपि ॥ नमस्तावचितं भुष्यं न मस्तावर्जितं जलं ॥ न मस्तावचितं भोज्यं देवताभ्यो निवेदयेत् ॥ ज्ञानापराधे वनि
तां पुष्पेनापि न ताडयेत् ॥ दोषान्न गणयेत् स्त्रीणां गुणानेव प्रकाशयेत् ॥ रुद्रयामले ॥ स्त्रीसुप्तं गुरुसुप्तं च नग्नसुप्तन
ग्नकान् ॥ देवान्न दर्शने देवि भीचकंकारयेद्बुधः ॥ सुप्तामिसुयतक्षणं अनवधाने न न यानेनान्यपथे दिग्मर्थः ॥ कुला
र्णवे ॥ श्रीगुरोः पादुकां मूलमंत्रं च पादुकां ॥ शिष्याद्न्यत्र देवेशि न वदेत्साधकस्य चित् ॥ पारंपर्यागमाम्नायं मंत्रतंत्रा
दिकप्रिये ॥ सर्वगुरुमुखाल्लब्धं सफलं स्यान्न चान्यथा ॥ सदा रवनिषेवेत कुलशास्त्राणि पार्वति ॥ पशुशास्त्राणि सर्वाणि
वर्जयेत्सर्वदा रवतन् ॥ भ्रष्टधर्मस्थं यथा क्षीरं न पेयं स्याद्द्विजोत्तमैः ॥ तथा पशुमुखाद्धर्मो न श्रोतव्यः शिवकौतिकैः ॥ तथा ॥ आ
समांसमुराकुंभं मत्तेभं सिद्धलिंगिनं ॥ सहकारमशोकं च क्रीडलोलाः कुमारिकाः ॥ एकवृक्षश्मशानं च समुद्रं योषिता
मपि ॥ नारीं च रक्तवसनां दृष्ट्वा वंदेत भक्तिमान् ॥ गुरुशक्तिसुतज्येष्ठकनिष्ठकुलदेशिकान् ॥ कुलदर्शनशास्त्राणि कुल
द्रव्याणि कौलिकान् ॥ प्रेरकान् सूचकांश्चापि वाचकान् याचकांस्तथा ॥ शिक्षकान् बोधकान् योगिनीसिद्धभैरवान् ॥ कं(
न्याः कुमारीका नग्नाउन्मत्ताः प्रकटस्तनीः ॥ न निन्देत जुगुप्सेत न हसेन्नावमानयेत् ॥ नानृतं नाप्रियं ब्रूयात् कस्यापि कुल

61

॥ चाम ॥
॥५२॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगिनः॥ कुरूपे निंदकत्वमिति न वदेत्कुलयोगिनीं ॥ न पश्येन्नग्निनां नग्नां मुन्मत्तां प्रकटस्तनीं ॥ न दिवा सेवयेन्नारीं न नग्नो
निं निरीक्षयेत्ः॥ याकाचिदंगना लोके सा मातृकुलसंभवा ॥ कुप्यंति कुलयोगिन्यो वनितानामतिक्रमात् ॥ रुद्रयामले ॥
असंस्कारंपि वेद्रव्यं बलात्कारेण मैथुनं ॥ स्वहस्तेन पशुं हत्वा रौरवं नरकं व्रजेत् ॥ कुलार्णवे ॥ प्रायश्चित्तं भ्रंगोः पानं स
न्यासं व्रतधारणं ॥ तीर्थयात्राभिगमनं कौलेयं च विवर्जयेत् ॥ वीरहत्यां वधपानं वीरद्रव्यापहरणं ॥ वीरस्त्रीगमनं चै
व नत्वं योगश्च पंचमः ॥ महापातकमित्युक्तं कौलिकानां कुलागमे ॥ प्रायश्चित्तं तं चोक्तं भिन्नं व्रतधारणमपि तथैव तीर्
र्थयात्राभिगमनं तस्मात्प्रकारेण पीठयात्रायास्तं चेष्टुविहितत्वात् ॥ वीरस्त्रीगमनं च तन्त्रामतुमन्यानतिषिद्धं ॥ भगिनीं
वा सुतां भार्यां यो दद्यात्कुलयोगिने ॥ मधुमत्ताय देवेशि न सपुनरापनगरापने ॥ इति कुलार्णववचनात् ॥ तथा ॥ गुरौ मनु
ष्यबुद्धिं च मंत्रे चाक्षरबुद्धिनां ॥ प्रतिमासु शिलाबुद्धिं कुर्वाणो नरकं व्रजेत् ॥ गुरुस्त्यागाज्जवेन्मृत्युर्मंत्रत्यागाद्दरिद्रता ॥ गु
रुमंत्रपरित्यागाद्रौरवं नरकं व्रजेत् ॥ पर्वदोषयोः संनो रेवडभयन्नागे सेषाधिकामिदं ॥ विण्मूत्रोच्छिष्टस्पर्शादिभिर्युक्तः कर्नक
रोतियः ॥ तयोर्वंतादिनक्तं सर्वमपवित्रं भवेत्प्रिये ॥ तथा ॥ विविक्षेर्देविशिकां वा संज्ञां न चित्रोनि भक्तिमान् ॥ व्यजनं पादुकाद्ध
चं वसनं वा हनादिकं ॥ तांबूलमुल्वणं वेषमुच्छ्रयमपविरोच्छदैः ॥ पादप्रक्षालनं स्नानमभ्यंगं दंतधावनं ॥ मूत्रं निष्ठीवनं मौ
दं शयनं स्त्रीनिषेवनं ॥ वीरासनं च तर्वकामति हासांगमोटनं ॥ केशमोचनमुष्णीषं कंचुकं नमिमां तथा ॥ पादप्रसारणं चैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कलहं द्वयशां प्रिये ॥ अंगवाद्यंगभंगादिकरस्पर्शनधनं ॥ स्मनकुक्कुटमत्स्यादिपुरुमित्यादिचाम्बिके ॥ गुरुयोगिमहासि
द्धिपीठक्षेत्राश्रमादिषु ॥ नाचरेदाचरेन्मोहाद्देवताशापमाप्नुयात् ॥ कालीकल्पे ॥ रात्रौ पर्यटनं चैव रात्रौ शक्तिप्रपूजनं ॥
अकृत्वा कथमीशानमकृतः कौलिको भवेत् ॥ कुलामृतदीपिकायां ॥ पूजाकालं विना नैव तत्पे या साहि साधके ॥ अयं
चाचारः सर्वदा गोपनीयः ॥ तथा हि कुलार्णवे ॥ वेदशास्त्रपुराणानि स्पष्टा वेश्यागना इव ॥ इयं तु शांभवी विद्या गुप्ता कुल
वधूरिव ॥ सुगुप्तकौलिकाचारमनुत्तिष्ठन्ति देवताः ॥ वाञ्छासिद्धिप्रद यच्छन्ति नाशयन्ति प्रकाशकान् ॥ कुलचूडामणौ ॥ कुला
चारं दक्षिणाख्यं कथितं तव सुव्रते ॥ न कस्मैचित् प्रवक्तव्यं यदीच्छेन्नियमात्मनः ॥ कुलद्रव्यं कुलद्रव्यं कुलपूजां कुलं जपं
गुरुं कुलपतिं चापि कुलमालां कुलाकुलं ॥ कुलचक्रं कुलध्यानं सर्वं यत्नप्रकाशयेत् ॥ प्रकाशात्सिद्धिहानिः स्यान्नकाशां बंध
नादिकं ॥ प्रकाशाद्बलहानिः स्यान्नकाशाद्देवहिंसनं ॥ प्रकाशान्मृत्युलोभः स्यान्न प्रकाशयेत् कदाचन ॥ पूजाकाले महेशानि य
दि कोप्यत्र गच्छति ॥ दर्शयेद्वैष्णवीं मुद्रां विष्णुन्यासं तथा सवं ॥ कदाचिदंगहानिः स्यान्न च व्यक्तिः कदाचन ॥ परं पूजनक
र्तव्यानवव्यक्तिः कदाचनः ॥ अंतःशाक्ता बहिःशैवा सभायां वैष्णवा मता ॥ नानारूपधरा वीरा विचरन्ति महीतले ॥ फेत्कारि
णीतंत्रे ॥ श्रीनारायकवचो ॥ सर्वदा गोपयेद्देवं मन्त्रं च गुरुमेव च ॥ तेनवीर्यवतीविद्या निर्वीर्या स्यात्प्रकाशनः ॥ तंत्रे ॥ नो
पदेशं महानीत्रेन शय्यानिमिरां नरे ॥ ननिंद्यं योगिनीचक्रं न निंद्ये वामलोचना ॥ भक्ष्यस्त्वानं प कुर्वीत न सदा शक्तवनोक

62

नं ॥ वज्रपुष्पाकिनयंत्रं वज्रपुष्पेण पूजयेत् ॥ पूजाकाले विशेषेणास्मरेद्रविनामवत् ॥ अष्टगंधं यदि न स्याच्चन्दनं रक्तच
न्दनं ॥ रक्तपुष्पैः समभ्यर्च्य बिल्वपत्रेण चार्चयेत् ॥ तुलसीमालती धात्री मरुच्चकेन नार्चयेत् ॥ शक्तिं विनापि देवेशि जप
होमादितर्पणं ॥ ध्यानपूजादिकं सर्वं सिद्धिरोधाय जायते ॥ पैष्टी पौष्ट्यादिकं द्रव्यमन्यद्द्रव्यं यदि त्यजेत् ॥ वीरपूजा महे
शानि यामिमासः ग्रहरेगते ॥ नो यवासंप्रकुर्वीत न तत्र चान्यं द्रुतमाचरेत् ॥ मंडपं विधिवत्कृत्वा पताकानीलतोरणं ॥ ना
गभ्रलांकितं देवि कुर्यात्तत्कुंडं त्रिकोणकं ॥ ॥ अथ भावाः ॥ भावचूडामणौ ॥ श्रीदेव्युवाच ॥ वीरभावो महादेव क
थ्यतेस्म श्रणु भैरव: ॥ निर्द्वन्द्वमानसो भूत्वा हृदा कामकलां नतु: ॥ निशासु पूजा सर्वत्र हेतुयुक्ता सदैव हि ॥ निजं कुलं स
माधाय स्वयं भैरवरूपधृक् ॥ कुलं च भैरवीरूपं न्यासं चैन्यासविस्तरं ॥ विन्यसेत्सकलं न्यासं नवयोन्यात्मकं तथा
नवयोन्यात्मकमिति श्रीविद्यापरं ॥ प्रसूनतूलिकामध्ये पुष्पप्रकरसंयुते ॥ नानागंधसमाकीर्णे कुलद्रव्येण यंत्रकं
लिखित्वा पूजयेच्छक्तौ घटस्थापनपूर्वकं ॥ स्ववामभागे षट्कोणं तन्मध्ये वृत्तं ध्रुवं ॥ लिखित्वा तत्र कुंभं वै सौवर्णं
राजतं तथा ॥ ताम्रं भूमिमयं वापि मणलोहविवर्जितं ॥ स्थापयेत्कलशाधारे कुंभं सुगंधिवासितं ॥ हेतुद्रव्यं ब्राह्म
णादिभेदतः संप्रपूरयेत् ॥ ब्राह्मणादिभेदन इति ॥ क्षीराज्यमध्वासवरूपं ब्राह्मणादिभिः पूरणीयमित्यर्थः
एवं च वीरस्यापि ब्राह्मणस्य हेतुस्थाने क्षीरमेव ॥ अन्यस्सनदपिन इति वोध्यं ॥ तत्र यंत्रं विलिख्याद्दौ यत्कुलसंउ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवं ॥ ध्यात्वेष्टदेवतां तत्र जपेदष्टोत्तरं शतं ॥ धेनुयोनी प्रदर्श्याथ प्रसन्नं तद्विचिंतयेत् ॥ हस्तामृतमनुपानं वैनत्यं नियोगि
नीगणाः ॥ नृत्यंति भैरवाः सर्वे नृत्यंति मातरोपि च ॥ इन्द्रादयः सुराः सर्वे नृत्यंति मधुलोलुपा ॥ ब्रह्मविष्णुमहेशाद्या नृत्यं
ति हर्षितमानसाः ॥ अर्घभाण्डं त्रिधा कृत्वा गुरवे वै कभागकं ॥ एकं कुलाय वै दत्वा एकेन देवतर्पणं ॥ पीत्वा कुलरसं नानाव
स्त्रालंकारभूषितः ॥ साक्षाद्यदि गुरुर्नस्यात्तदा तोये विसर्जयेत् ॥ आनंदरूपवान् भूत्वा पूजयेत्परमेश्वरीं ॥ ततःक
लविधानेन तत्तत्पात्रेन पूजयेत् ॥ विसर्जनं विधायांते मुकुले योजयेत्ततः ॥ तद्विंवरसपानेन अमृतं तज्जप्तेमया ॥ तत्र
कोरसास्वादे संमदोमम जायते ॥ तत्फलग्रहणादेव मे रुधृंगे वरोहणं ॥ ललातिंगतमात्रेण सुधाधौतकलेवरं
भूतयोगे कृते तत्र जपेदष्टसहस्रकं ॥ नित्यजापे चरामेवयत्र संख्यान चोदिता ॥ तत्रेयं गणना प्रोक्ता अष्टोत्तरसहस्र
कं ॥ जलपूतं हविर्द्रव्यं गृहीत्वा तर्पयेत्ततः ॥ विधाय तर्पणं देवं प्रदक्षिणमनुव्रजेत् ॥ स्तुत्वा प्रणम्य कल्पोक्तस्तवेन तोष
येत्ततः ॥ इतिवीरकुलं देव देववर्यं मनोहरं ॥ यद्देशे विद्यते वीरस्तत्कुलं वापि भैरव ॥ नच मारीभयं तत्र न च राजभयादि
कं ॥ सुमंगलं सदा तत्र धनपुत्रविवर्धनं ॥ लक्ष्मीस्तत्र महादेव सुस्थिरा भवति ध्रुवं ॥ मंत्रं स्वप्नप्रबोधिन्या अवश्यं हृक्षम
लके ॥ योजनीयं प्रयत्नेन नच विघ्नः प्रजायते ॥ तान्वीरस्पन्नयोगं ग्रहणे देवतैरपि ॥ योगिनीभिर्न्नलुप्तं च तन्नयायेनग्र
ज्यते ॥ यत्र तत्र कुजे वारे स्मशानगमने कृते ॥ पूजाफलं भवेत्तत्र सप्तवासरसंमितं ॥ चतुर्दश्यां गते तत्र पक्षपूजाक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लंभवेत् ॥ नगच्छेन्नार्यनःस्थाणेपभ्रेवनसंशयः ॥ नास्त्यस्मादधिकंदेवइतिचिंतापरायणं ॥ मदेनद्रव्यभोक्तानुभवेन्नकुल
परायणाः ॥ साधकेक्षोभमायत्रेममक्षोभःप्रजायते ॥ नस्नाप्रलाधीरववरोभवेद्भोगस्तुनःसुखी ॥ भोगेनमोक्षमाप्नोतिभोगे
नकुलसाधनं ॥ विनाहेतुमनास्वाग्रक्षोभयुक्तोमहेश्वरः ॥ नपूजांममसंपर्कंनध्यानमनुचिंतनं ॥ तस्माकुक्ताचयीत्वाच
पूजयेत्परमेश्वर ॥ नात्रमन्त्रनिरोधोस्तिनायरंध्रोयमन्त्रवर्णं ॥ यग्रहदतिनिजाजियत्कर्णेनयदर्चनि ॥ तत्सर्वंकुलरूपंतुध्यात्वा
चविहरेत्सुधीः ॥ एकाकीनिर्जनेदेशेश्मशानेपर्वतेवने ॥ भ्रमगेहनदीतीरेनिःसंगोविहरेत्सुधा ॥ वीराणांजपकालेतुसर्वका
लेप्रशस्यते ॥ सर्वदेशेसर्वपीठेकर्त्तव्यंचनसंशयः ॥ यदिविशेषभवेत्तत्रसःकुलद्रव्यपरायणाः ॥ नदानेनविधानेनकर्त्तव्यंकुल
तोषणं ॥ विप्रोवीरएव ॥ अपराप्रुष्पगर्भेतुकुलस्थानंमनोहरं ॥ सर्वदेवसुखंनत्रमसकामकलात्मकं ॥ हयारिकुसुमेदेव
स्वयमस्तिसदाशिवः ॥ तन्मध्येलपुमादायपुष्पमध्येतुचंदनं ॥ रक्तवाकुसुमन्दत्वाध्यात्वात्मानंशिवात्मकं ॥ योजयेच्छिवशा
त्योस्तुएकांसंभावयन्नधिया ॥ क्षणंविचिंत्यनचैवसंपूजयत्परमेश्वरीं ॥ जप्त्वानदेवकुंडस्थंद्रव्यंपरमदुर्लभं ॥ तथ
यत्रापराजितापुष्पंजवापुष्पंचभैरव ॥ करवीररक्तभुक्तेघेणापुष्पंचनिष्ठति ॥ तत्रदेवीवसेन्नित्यंतत्पुष्पेतुपूजयेत्ममः ॥
दत्तेवैवजपापुष्पेयदवस्त्रफलंलभेत् ॥ बलहत्यादिकंपापंक्षणान्नश्यतिनिश्चितं ॥ अपरायास्तुमाहात्म्यंवक्तुंनहिमहेश्व
र ॥ वीरसाधनकार्यंचकर्त्तव्यंवीरपुरुषैः ॥ दिव्यैरपिचकर्त्तव्यंपश्चभिर्नचपामरैः ॥ वंदंपामरकार्यंचनयशोरितिनिश्चितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यथान्नसमुत्पाशोक्तं संकेतं मंत्रसाधने ॥ अंजनं गुटिकादिं च कुर्याद्वीरो महाबलः ॥ दिव्यवीरेन भेदोस्ति येनेदं नतु कथ्यते
यां ते विनीतो मधुरः कलालावण्यसंयुतः ॥ दिव्यस्तु देववत्स्नायी वीरश्चोद्धतमानसः ॥ विभूतिभूषणो वीरो वापि चंदनेर्वापि ते
पितभाकारगोपनो वापि व्यक्तो वा कुलभैरव ॥ रक्तचंदनदिग्धो वा वेश्मवस्त्रा प्यवेश्मवः ॥ अपमाने च पूजाया हृष्टः पुष्टः स
दा भवेत् ॥ देवनिंदापरो वापि तत्पूजापरोपि वा ॥ पूजारतस्तुहिनः कुलाकुलमतेष्थितः ॥ निजभावसमायुक्तो देववद्वि
हरेक्षितौ ॥ स्वकुलानेषु रव्यर्थ कार्या राज्ञो नवान्यथा ॥ वेदहीने द्विजे देव यथा तत्कृतिसंकथा ॥ विस्तुभक्तिं विना देवीं भक्ति
र्न प्रभवेद्यथा ॥ शाक्तज्ञानं विना मुक्तिर्यथा हास्याय कल्पते ॥ गुरुं विना यथा मंत्रे नाधिकारः कथंचन ॥ पतिहीना यथा नारी स
र्वकर्मविवर्जिता ॥ कुलं विना देववर्षो कश्चापि मम साधने ॥ नाधिकारीति कोलेयतस्माज्ञावयरोभव ॥ अविनीतं कुलं यस्य
स कथं मम पूजकः ॥ तस्माद्यत्नात्तथा कार्यं यथा स्याद्विनयान्वितं ॥ भावाभावात्कुले मास्त्रे नाधिकारः कथंचन ॥ तेन भावविं
भूद्धस्तु साधकः कौलिको भवेत् ॥ देव्युवाच ॥ पशुभावं प्रवक्ष्यामि श्रृणुवत्स समाहितः ॥ यथाविधि यशोर्दिग्रांसृहीत्वा भावन
रः ॥ प्रथमं पूर्वमेवार्थं यत्नतः शुद्धिमाचरेत् ॥ न मत्स्यभोजनं कुर्यान्न स्त्रियं मनसा स्मरेत् ॥ न परद्रव्यलोभी स्यान्न भोगे मा
नसं भजेत् ॥ सिंधुतीरे पर्वते च कानने वा सुरालये ॥ बिल्वमूले विविक्ते च पुण्यक्षेत्रे च शोभनं ॥ न शूद्रदर्शनं कुर्यात्कौटिल्यं
यत्नतस्त्यजेत् ॥ देवताभ्रमवर्णान्तु ध्यानव्यासु समाहितैः ॥ त्रिसंध्यं देवपूजां तु त्रिसंध्यं जपमाचरेत् ॥ रात्रौ मंत्रं च मालां

64

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चनस्पृशेनकदाचन ॥ नमंत्रमुच्चरेत्कुक्का मौनीस्यात्सर्वकर्मसु ॥ पर्वकालेस्त्रियंनैवगच्छेत्साधकसत्तमः ॥ पुष्पंगंधंजलंचैवस्वय
मानीयपूजयेत् ॥ मैथुनंनत्कथालापंनक्रोष्ठीपरिवर्जयेत् ॥ ऋतुकालंविनाचापिगच्छेत्स्त्रियमादरात् ॥ पुराणाभ्रवसोम्र
त्नावेदवेदार्थतत्परः ॥ नरान्त्रैभोजयेद्विप्रान्तांबूलंपरमेश्वर ॥ गुरूणांयद्यदादिष्टंतत्सर्वंयत्नतश्चरेत् ॥ स्वजातकुसुमं
चैवहेतुद्रव्यंभैरव ॥ पश्वानंतथासमाघ्रायपंचगव्येभुञ्जति ॥ रक्तवस्त्रंनगृह्णीयाद्देवीभक्तिपरायणाः ॥ विसृजंत्रपुकल्पा
निनद्युतस्नानमेवच ॥ कार्यंवीरकथालापंनकुर्यात्तीरवदिन ॥ नित्यश्राद्धंगयाश्राद्धंसंध्यावंदनमेवच ॥ तीर्थस्नानंयी
ठदेशगमनंधर्मतत्परः ॥ पशुशुद्धिविधौदेवपर्वणासहभैरव ॥ अस्याधिकारःपूजायांनगुरुत्वेकदाचन ॥ पर्वस्यनाधिका
रोस्तिपूजादेशागतागतौ ॥ पर्वस्यसर्वकोलाहिवीहिःकार्यःस्वदेशतः ॥ पर्वदर्शनमात्रेणकुलदर्शनमाचरेत् ॥ ब्रह्महत्यादिकं
पापंवर्षसत्यंनचक्षुभो ॥ पर्वदर्शनमेवात्रसत्यंसत्यं ---- ॥ ममाज्ञयापिदेवेशिविभुरित्यपिसभ्रमो ॥ नथापितंचमे
शांकाजायतेतत्पदेपदे ॥ वरंकुलंपरित्यज्यवरंस्वकुलहिंसनं ॥ वरंस्वकुलहानिस्तुवरंस्वकुलकृदनं ॥ कायेनमनसावा
चावरंस्वकुलपातनं ॥ नकुर्वीतपशोःसंगंस्वमार्गक्षयकारणात् ॥ कुलशास्त्रेद्वयंयायंगरिष्ठंकुलनाशनं ॥ स्वकुलेमह
तींनिदायरयोगःकुलेश्वर ॥ तस्मादपिमहायापपश्रुसंगात्प्रजायते ॥ सर्वथानन्त्रभावोहिनप्रकाश्योकुलेश्वर ॥ सभा
वश्चविभावश्चयश्चद्वेषात्प्रजायते ॥ देवाद्वज्ञायतेवीरोवीरादेवःप्रजायते ॥ सर्वथामन्त्रभावोहिनप्रकाश्योकुलेश्वरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ना॰भ॥
॥५६॥

देवेवीरनसंदेहः साम्यमित्यभिधीयते ॥ भावस्तु मानसो धर्मः शाक्तः सहिक थं भवेत् ॥ तस्माद्भावो न वक्तव्यो दिव्यात्वं समु
दाहृतं ॥ यथेक्षुगुडमाधुर्यमज्ञानेर्जायतेप्रभो ॥ तथाभावविभावस्तु मनसा परिभाव्यते ॥ ॥ इतिमहामहोपाध्यायसट्ठ
क्कुरश्रीनरसिंहविरचितेताराभक्तिसुधार्णवेचतुर्थस्तरंगः ॥ ४ ॥ अथनित्याविधिः ॥ कुलचूडामणौ ॥ साधकःप्रा
तरुत्थाय कुलवृक्षं प्रणम्य च ॥ मूलादिब्रह्मरंध्रांतं कुलमाचारगुरुं स्मरेत् ॥ कुलवृक्षो रुद्रयामले ॥ श्लेष्मातकं करं
जं च निंबाश्वत्थ कदंबकं ॥ विल्ववटं शालतालं शाखोटं खर्जुरं तथा ॥ कुलवृक्षाः समुद्दिष्टा इति ॥ वक्ष्यतः कुलवृक्षो व
रांगते निरहस्यविदः ॥ वीरचूडामणौ साधकः प्रातरुत्थाय संस्मरेत्कुरुमादरात् ॥ महाचीनगुरुं ध्यात्वा ऽथ वशिष्ठगुरु
क्रमः ॥ पंचोपचारैः संपूज्य वीरद्रव्यक्रमेण तु ॥ नीलांवरं नीलविलेपयुक्तं ग्रंथ्यादिभूषितननं मुदितं त्रिनेत्रं ॥ वामांकु
पीठस्थितनीलशक्तिं वदामि वीरकरुणानिधानं ॥ परां तु देवतां ध्यात्वा हृदये नीलसुन्दरीं ॥ खर्वांनीलां विशालाक्षीं
पंचमुद्रां विभूषितां ॥ कपालकर्त्रिकाहस्तां खड्गेन्दीवरधारिणीं ॥ व्यालमालजटाजूटां पीनोन्नतपयोधरां ॥ नवयौव
नसंपन्नां मदाघूर्णितलोचनां ॥ एवं ध्यात्वा महादेवीं सर्वज्ञः साधको भवेत् ॥ वीरहंसमहाविद्यासकलंकारयेद्बुधः ॥ हं
साख्यासाधनं वक्ष्ये मन्त्रीणां हितकाम्यया ॥ यस्य विज्ञानमात्रेण सर्वज्ञोऽपि विजायते ॥ हंसात्मिकां भगवती जीवोजप
तिसर्वदा ॥ अस्याः स्मरणमात्रेण जीवन्मुक्तो भवेन्नरः ॥ ऋषिर्हंसः समाख्यातः परहंसश्च देवता ॥ अव्यक्तमध्ये

॥राम॥
॥५६॥

65

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गायत्रीविनियोगसिद्धिदः॥ सुरेन्द्रसंहितायां॥ ऋषिर्हंसोऽव्यक्तपूर्वो गायत्रीछन्दउच्यते॥ देवतापरमादिस्तु हं
सो हंबीजउच्यते॥ अः शक्तिः कीलकः सोहंप्रणवस्तत्वमेवहि॥ उदात्तस्वरभ्रमेवं मनोरस्यप्रकीर्तितः॥ मोक्षार्थे विनियोगः
स्यादेवंकुर्यात्प्रयतनरः॥ वीरचूडामणौ॥ सूर्यात्मदेवहृदि विसोमात्मनेऽग्निरस्तथा॥ निरंजनश्चिरवाज्योतिर्निराभा
सानथाश्रये॥ अव्यक्तमन्त्रयोर्नस्य अनन्तोस्त्वफडयजेत्॥ एवंन्यासविधिंकृत्वा गणेशादीन्समर्पयेत्॥ सुरेन्द्रसं
हितायां॥ हंसात्मिका भगवतीजीवोजपति सर्वदा॥ एकारेणवहिर्याति सकारेणाविशेत्पुनः॥ अस्याः संबोधमात्रे
णजीवन्मुक्तो भवेन्नरः॥ प्राणायामप्रभावेन जीवन्मुक्तस्तुजायते॥ एकविंशतिसाहस्रं षट्शताधिकमेव च॥ प्र
जपेन्नत्वहंजीवो ब्रह्मानन्दमयीं परां॥ उत्पत्तिर्जपआरंभो मृतिरस्यनिवेदनं॥ विनाजपेन सततं जपो भवति सर्व
दा॥ एवंजपस्तु विज्ञातो गणेशादौ निवेदयेत्॥ वीरचूडामणौ॥ षट्शतानि गणेशस्य षट्सहस्रं प्रजायते॥ षट्सह
स्रं गदाधराणैः षट्सहस्रं पिनाकिनः॥ सहस्रं आत्मने चैव सहस्रं परमात्मने॥ सहस्रं गुरवे चैव संकल्पायं यथावि
धि॥ रक्तवर्णं गणेशं च मूलाधारे चतुर्दले॥ वादिवेदसमायुक्ते षट्शतं च समर्पयेत्॥ स्वाधिष्ठाने विद्रुमाभं ष
ट्कोणं वापि षट्दलकं॥ सावित्र्या च समायुक्ते ब्रह्मणे च समर्पयेत्॥ विद्युत्पुंजप्रभाभं च दलं डादि दशाक्षरं॥ लक्ष्मीना
रायणौ वंदे षट्सहस्रं निवेदयेत्॥ महानीलप्रभाभे च कादिद्वादशपत्रके॥ उमामहेश्वरौ वंदे षट्सहस्रं निवे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दद्येत् ॥ विष्णुदेधूम्रवर्णोचकलायचेखरान्नसेत् ॥ प्राणादात्मकौ वं देस हस्त्रं च समर्पयेत् ॥ आज्ञायां विष्णुदाभ
यां भुभ्रौहक्षौ नियाजयेत् ॥ परमात्मनि यराप्राक्षौ सहस्त्रं च समर्पयेत् ॥ सप्तुद्रमेषहेदेवि पर्वनस्तनमंडले ॥ विष्णु
पत्नीनमस्तेस्तु पादस्पर्शं क्षमस्व मे ॥ चरणां धारयेद्देवि आत्मश्वासानुसारतः ॥ देहशौचादिकं कुर्याद्गस्त्रस्नानं समा
चरेत् ॥ वीरासनोपविष्टस्तु वीरभस्मानुलेपनं ॥ वीरध्यानात्मपादेवि वीरमालां जपेद्बुधः ॥ अशेनरस हस्त्रं च वामह
स्ते समर्पयेत् ॥ वीरभस्मस्त्रशानभस्मवामहस्त इत्यभिधानात् ॥ मूलमंत्रजयो यमि निष्पतिभानि ॥ विष्णुद्वेश्वरेतु
यथाशक्त्या जपकृत्वा सुनासंतो यथाछिवा ॥ इत्युक्तं ॥ एनमूर्वं मन्त्रगुरुमंत्रजपो युक्तः ॥ नदुक्तं तन्त्रचिंतामणौ
अथवा वाग्भवं मायां लक्ष्मीवीजं समुद्धरेत् ॥ हसखफ्रें नधानं दभेरवाय वं सहखफ्रें ॥ गुरुनाम नथा शक्तिनामश्री
पादुकां स्मरेत् ॥ दशधा सप्तधा वापि त्रिधा वा प्रजपेत्सुधीः ॥ जपं समर्पयेत्पश्चाच्छ्रीगुरोर्दक्षिणे करे ॥ इति ॥ वीरचूडा
मणौ ॥ वज्रपुष्पवरारोहे कारयेद्दंतधावनं ॥ वज्रपुष्पमार्नवं जवाकुसुमं वा ॥ इदंच दंतधावनं देहशौचानंतरमेव कार्य
अन्यत्र तथा दर्शनात् ॥ न्यासं कुर्यात्महेशानि शक्तिरूपां गे स्पृशे बुधः ॥ हावभावादिकं कुर्यात्स्नानकर्म समाचरेत् ॥ वीर
भस्मानुलेपनादिवीरसाधकमात्रपरं ॥ इदंच प्रातःकृत्यमानवश्यकं ॥ नदुक्तं यामले ॥ प्रातःकृत्यमकृत्वा तु यो देवीं भ
क्तितोर्चयेत् ॥ पूजा च विफला तस्य शौचहीना यथा क्रिया ॥ ॥ अथ स्नानं ॥ तत्र त्रिविधं ॥ अंदकमानसमांत्रभेदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त् ॥ तत्वा शेषप्रधानत्वादेदकं निरूप्यते ॥ नारदपंचरात्रे ॥ ह्रांकनास्त्रादिजप्तेन शुचिः स्नायात् मृत्तिकां गृहीत्वास्त्रेण संनद्यपा
याज्जलनिकेतनं ॥ तत्रापि जलकूलं तु क्षारयेदस्त्रवारिणा ॥ मृदं गृहीत्वा विधानज्ञस्त्वेकभागेयगंतम ॥ निधाय गोमयं दर्भांस्ति
लांश्चाप्यभिमंत्रितान् ॥ लौकिकं गौणमाग्रेन भागेनैकेन यत्नतः ॥ मलस्नानं पुरा कृत्वा विधिस्नानं समाचरेत् ॥ नीलतंत्रे ॥ मृ
त्कुशानथ संगृह्य गत्वा जलांतिकं ततः ॥ मलापकर्षणं कृत्वा मंत्रस्नानं समाचरेत् ॥ कुलचूडामणौ ॥ अथ वक्ष्यामि ते वत्स
स्नानं कुलसुखावहं ॥ कृष्णारक्तहरिन्नीला विविधा मम मृन्मयः ॥ न च यत्कुलगः शिष्यः स तद्रूपं परामृशेत् ॥ आचांतः कु
लद्रव्येण सदर्भैः कुलपुष्पकं ॥ कुलपात्रेस दर्भैश्च सलिलं सजलं ततः ॥ गृहीत्वा कुलदेवस्य प्रीतये स्नानमाचरेत् ॥ कृत
संकल्प एवासौ कुलचक्रजले न्यसेत् ॥ कुलसूत्रं समानीय कुलमुद्रांकुशेन च ॥ कुलतीर्थानि तंत्रेव समानीय कुलात्मकं
ततो यंत्र विधापीत्वा त्रिधा च शोक्षणं ततः ॥ यत्कुलगः यन्मंत्रदीक्षितः ॥ कुलदर्भो यथा ॥ रुद्रयामले ॥ त्रयो दर्भाः समुद्दि
ष्टाः सुवर्णरजतैः कुशैः ॥ तत्र शाक्ते च यंत्रादि मंत्रेषां तु त्रयो मताः ॥ सुवर्णं रजतं चैव जपपूजादिकर्मसु ॥ कुशश्चार्यकरं प्रोक्तं
तत्तु वन्यकुशाः कुशाः ॥ अन्यत्रापि ॥ तर्जन्यां रजतं धार्यं स्वर्णं धार्यमनामया ॥ स्वस्वस्वकुशप्रोक्तो न दर्भो वनसंभवः ॥
यामले ॥ विना वै दूर्वया देवी पूजा नास्तीह कर्हिचित् ॥ तस्माद् दूर्वां गृहीत्वा सर्वपुष्पमयीं शुभां हस्ते दूर्वांकुरं दत्वा अ
चामेद्विधिपूर्वकं ॥ कुलपुष्पं जवापुष्पादिकं ॥ कुलपात्रं स्वर्णादिपात्रं ॥ कुलदेवस्य इष्टदेवतायाः कुलचक्रं त्रिकोणं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ना॰ भ ॥
॥ ५८ ॥

कं ॥ नक्षिखनप्रकारस्तु मालिनीतंत्रे ॥ त्रिकोणं मूलवीजेन सावित्रे हंसकं जपेत् ॥ दक्षावर्त्तक्रमेणैव लिखेद्देवि समाहितः
मूलवीजे नेति मंत्रांतरे ॥ सावित्रे सूर्यमंत्रे हंसकं हंस इति मंत्र अंकुशाख्य प्रव ॥ दक्षमुष्टिं विधाय यथा तर्जन्यं कुशरूपिणी
अंकुशाख्या महामुद्रा त्रैलोक्याकर्षणक्षमा ॥ इति मंत्रे ॥ तीर्थावाहनमंत्र श्रीक्रमसंहितायां ॥ गंगे च यमुने चैव
गोदावरि सरस्वति ॥ नर्मदे सिंधु कावेरि जलेस्मिन् संनिधिं कुरु ॥ त्रिधा तोय यानमात्वमनरूपमेवनत्व मूलमंत्रेण
प्रोक्षणमपि नेनैव ॥ नतुक्तं त्रिशक्तिरत्ने ॥ त्रिरावर्त्य मूलेन मुद्रया कुंभसंज्ञया ॥ त्रिवारं मंत्रपूतेन नीरैः प्रोक्षणं
यत्सुधीः ॥ मुद्रावेयमुक्ता तंत्रे ॥ दक्षांगुष्ठेय रांगुष्ठं क्षिप्ता हस्तद्वयेन तु ॥ सावकाशा चैक मुष्टिर्मुद्रेयं कुंभसंज्ञिता ॥ गंधर्वतं
त्रे ॥ मूलं पठन्मूर्द्धितोयं मुद्रया कुंभसंज्ञया ॥ क्षिप्त्वा वारत्रयं पश्चादाचमेत्साधकाग्रणीः ॥ आत्मविद्याशिवैस्तत्वैरिति ॥ आ
त्मतत्वेन स्थूलदेहं शोधयामि स्वाहा ॥ विद्यातत्वेन सूक्ष्मदेहं शोधयामि स्वाहा ॥ शिवतत्वेन परदेहं शोधयामि स्वाहेति ८
मंत्रत्रयेण तु कत्रयं शृंक्रीयादित्यर्थः ॥ नीलतंत्रे ॥ विद्ययावितिर्तिमज्जेव माचमेत्याथ सा तथा ॥ वसिष्ठसंहितायां ॥ कु
त्वापि वैदिकं स्नानं तंत्रसांत्रिकमाचरेत् ॥ विन्यस्यांगे षडंगानि प्राणायामपुरःसरं ॥ श्रीसूर्यमंडलात्तीर्थमा कृष्यांकुश
मुद्रया ॥ वमिन्येनेन चाप्लाव्य कवचेनावगुंठयेत् ॥ संरक्ष्यास्त्रेण मूलेन मंत्रयेत् उ संख्यया ॥ आत्मरक्षां ततः कुर्याद्वार
क्षेपेणास्त्रतः ॥ निमज्जनं च श्रीदेवं ध्यायेद्दक्षामतं जपेत् ॥ उन्मज्य कुंभमुद्रां च वध्वासिंचेत्स्वमूर्धनि ॥ त्रिपंचार्णवे ॥ वि

॥ राम ॥
॥ ५८ ॥

67

धायवैदिकंस्नानं ततस्तान्त्रिकमाचरेत् ॥ मृदमस्त्रेणवादाय तेनतामभिषिच्य च ॥ शिखामंत्रेण संशोध्य मंत्रयेन्मूलमंत्रतः
मूर्धादिपादपर्यन्तं विलिप्य च ततो वपुः ॥ संमुखीकरणीमुद्रां बध्वा घ्राणं निरुध्य च ॥ निमज्जन्मूलमुच्चार्य नाभिमात्रे जले स्थि-
स्थितः ॥ प्राणायामत्रयं कृत्वा मूलमंत्रेण मंत्रवित् ॥ विन्यस्य च षडंगानि कल्पयेत्तीर्थमग्रतः ॥ ततः संप्रार्थयेत्तीर्थं सूर्य-
मंडलगं ततः ॥ घृणिमंत्रेण मंत्रज्ञोभित्वा चांकुशमुद्रया ॥ तीर्थावाहनमंत्रेण तीर्थमावाहयेत्प्रिये ॥ मूलमंत्रेण संयोज्य
कल्पिते तीर्थमंडले ॥ तीर्थशक्तिं च तत्रैव समावाह्यार्कमंडलात् ॥ ध्यात्वानन्तरमर्घ्यं गंगामंत्रेण मंत्रयेत् ॥ सप्तकृ-
त्वः शिवे चास्मिन्नर्घ्यं मन्त्रद्वयं प्रिये ॥ जलस्थं व्योमषष्ठदीर्घस्वरभिन्नं सबिन्दुकं ॥ सर्वानन्दमये तीर्थशक्ते चैहि सु-
गंधितः ॥ एकविंशाक्षरः प्रोक्तस्तीर्थशक्तिमनुः प्रिये ॥ तारं नमो भगवति ब्रूयाद्देवतनोम्बिके ॥ अंबालिके महामा-
लिन्येह्येहि भगवन्यथः ॥ अशेषतीर्थालवाले मायाश्रीबीजं येरथ ॥ शिवजटाधिरूढे च गंगे गंगाम्बिके द्विठः ॥ गं-
गाविष्टये मायाश्चान्ते पंचाशाद्विरक्षरैः ॥ भुवनेश्याः समालोड्यामृतीकृत्य सुधांशुना ॥ कवचेनावगुंठ्याथ संरक्षास्त्रे-
णमंत्रयेत् ॥ मूलेन देवतां तत्र सांगां सावरणां प्रिये ॥ समावाह्य जले ध्यात्वा तत्पादहृदयनिर्गतं ॥ ध्यात्वा तीर्थं स्मरन्मू-
लमंत्रं स्नायाज्जले त्रिधाः ॥ उन्मज्य मूलमंत्रेणाभिषिंचेत्कुंभमुद्रया ॥ आचम्य विधिना पश्चान्मूलमंत्रेण तर्पयेत् ॥
त्रिधा देवीं समुत्तीर्य जलाद्धौते शुभांबरे ॥ परिधायाथ तिलकं कृत्वा संध्यां समाचरेत् ॥ संप्रार्थयेद्दिनि ॥ ब्रह्मांडोदर

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ना·भ॥
॥५९॥

तीर्थानि करैः स्पृष्ट्वा नितेरवे॥ तेन सम्यगनदेवेश तीर्थं देहि दिवाकर॥ इत्यनेनेत्यर्थः॥ तीर्थावाहनमंत्रेण गंगे चेत्यनेन·ध्यात्वे
ति॥ सर्वानन्दमयीं शुभ्रां त्रिनेत्रां मृगांकशुभ्रां अक्षां चोर्ध्वकरद्वयेन दधतीं पाशांकुशौ च क्रमात्॥ दोर्भ्यां चामृतपूर्ण
हेमकलशं मुक्ताक्षमालां वरां गंगां सिंधुसरिद्वरादिसहितां श्रीतीर्थशक्तिं भजे॥ इति प्रकारेण॥ एतेषां प्रकाराणाम
विरोधेन समुच्चयः विरोधे विकल्पः॥ त्रिपुरार्णवोक्तप्रकारस्तु स्त्रेपरस्त्वेत्यपि वदंति॥ ॥अथ मांत्रस्नानं॥ नारद
पंचरात्रे॥ अथ मात्रं प्रभंभ्रगु·इत्युपक्रम्य·तोयाभावे तु यत्कार्यं दुर्गाकाले वशीननः॥ गमने क्षिप्रसिद्ध्यर्थं गुरु
कार्येष्वनन्विते॥ प्राप्तापद्यथ विप्रेन्द्र निशाभागे तथा तु ने॥ प्रक्षाल्य पादावाचम्य प्रोक्षणे न तु वारिणा॥ स्नानं द्वादि
शः प्राग्वत् संशोध्य परिपेनननः॥ अस्त्रं हस्तनले न्यस्य क्रमान्न्यासं सत्तनस्तु वै॥ मूलमंत्रोदितः कुर्यान्त्सर्वमंत्रनवै॥ केव
लोदकस्नानात् संस्कारपरिवर्जितात्॥ प्रभासादिषु तीर्थेषु यत्फलं स्नानकस्य तत्॥ तेयेन्द्राणां स्यान्मंत्रस्नान
सनारद॥ तोयाभावे उदकस्नानक्षमतोयाभावे॥ अस्त्रमित्यादि॥ स्वविद्याया अस्त्रमंत्रं करयोर्विन्यस्य मंत्रन्यास
पूर्वकं स्वतंत्रोक्तन्यासजातं कुर्यादित्यर्थः॥ केवलादिति॥ स्नानमिहत्यासरूपमेव॥ ॥अथ मानसस्नानं॥ शैवाग
मे॥ मनसा मूलमंत्रेण प्राणायाम पुरस्सरं॥ कुर्वीत मानसं स्नानं सर्वत्र विहितं च तत्॥ सर्वेच सर्वविद्यासु॥ नारद पंच
रात्रे॥ ध्यानस्नानमथो वक्ष्ये द्वाभ्यामपि परं च तत्॥ भक्तिनं पुण्डरीकाक्षं मंत्रमूर्तिं प्रभुं स्मरेत्॥ तत्पादोदकजां धारां नि

॥राम॥
॥५९॥

68

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्नीं स्वमूर्द्धनि ॥ विनयेत्सूक्ष्मरंध्रे गार्ग्रीयपत्नीं स्वकान्ततं ॥ नयासंक्षालयेत्सर्वं मन्त्रदेहगतं मलं ॥ ततः क्षणाद्विरजा मे
बीजा यतेस्फटिकोपमः ॥ इदं स्नानवरं मात्रं तत्स्नानाद्दशगुणं स्मृतं ॥ पुण्डरीकाक्षमित्युपलक्षणं यायस्य देवतास्नानं स्म
रेदितिनाम्न्यर्थं ध्यात्मामिति ॥ अल्पायासेन तत्फलकत्वाद्दुष्प्रांश्रेष्ठमित्युक्तं ॥ ननन्वनस्तन्त्रधानमिति बोध्यं ॥ अस्यास्तु
विद्यायाम स्नाची नक्रमो पास्यत्वाद्वमानस ॥ स्नाननेवप्रधानं न तत उत्थाय वाससी विभृयात् ॥ तत उक्तं कुलचूडामणौ ॥
उत्थाय कुलवस्त्रे द्वे परिधाय कुलेनतु ॥ तिलकं कुलरूपन्तु कृत्वा वन्दनसमाचर ॥ कुलवस्त्रमित्यत्र कुलपदन्तु रक्तपरक
वाचि कुलेन मूलमन्त्रेण ॥ कुलरूपन्तिलकं स्मशानमृद्भिस्मनं त्रिपुण्ड्रं कारयेत् ॥ सुधीरिति मत्स्यसूक्ते वीरतिल
कं ॥ नारदपञ्चरात्रे ॥ सुधौतं परिधायाथ वस्त्रयुग्मं मरवेद्वदं ॥ न दग्धावादधःक्ष्माणि योगपट्टकसंयुता ॥ न चैकवाससमयस्मा
र्त्त्विनवं कदाचन ॥ स्वनंवे नवे ॥ मोक्षार्थी रक्तवस्त्रे द्वे भोगार्थी श्वेतवाससी ॥ परिधाय ततो विद्वान्यागभूमिं मध्याविशे
त् ॥ यामले ॥ विभृयाद्वाससी शुभ्रे तिलकं वर्णभेदतः ॥ वर्णभेदत इति ब्राह्मणस्योर्द्ध्वपुण्ड्रं स्यात्क्षत्रियस्य त्रिपुण्ड्र
कं ॥ वैश्यानामर्द्धचन्द्रं स्यात्शूद्रस्य वर्तुलाकृतीनिति नारदपञ्चरात्रोक्तक्रमेणान्यसमर्पः ॥ समयातन्त्रे ॥ भस्मना तिलकं
कुर्याद्वन्मृद्भिर्वा पुण्ड्रजावः ॥ ॥ अथ सन्ध्या ॥ भैरवीतन्त्रे ॥ आचम्य प्राक्मुखो भूत्वा उपविश्य च मन्त्रवित् ॥ वैदिकीं तां
त्रिकीं च कुर्यात्ततः सन्ध्यां समाहितः ॥ शैवागमे ॥ प्राणायामत्रयं कृत्वा मूलमन्त्रेण मन्त्रवित् ॥ अङ्गानि विन्यसेद्देहे कर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ना॰भ॥
॥६०॥

न्यासपुरस्सरं ॥ अमृतीकृत्यपुरतोजलंवंधेनुमुद्रया ॥ अभिमन्त्र्यचमूलेनसप्तधाचसाधकः ॥ अकारादिक्षकारान्तै(
र्मातृकार्णैस्सविन्दुभिः ॥ प्रत्यंगीप्रोक्षयेन्मूर्ध्निकुशैर्मूलेनवात्रिधा ॥ कुमारीकल्पे ॥ प्रणवंपूर्वमुच्चार्यमणिधारिणिव
ज्रिणि ॥ रक्षद्वयन्तथाहूंफट्स्वाहेतिनदनन्तरं ॥ अनेनैववह्निमंत्रेणरक्षांकुर्याद्विचक्षणः ॥ पुनराचम्यविन्यस्यषड
ङ्गमपिमन्त्रवित् ॥ वामहस्तेजलंगृह्यगलितोदकविन्दुभिः ॥ सप्तधाप्रोक्षणंकृत्वामूर्ध्निमंत्रंसमुच्चरन् ॥ अवशि
ष्टोदकंदक्षेहस्तेसंगृह्यमन्त्रवित् ॥ इडयाकृष्यदेहान्तःक्षालितंपापसंचयं ॥ कृष्णवर्णन्तदुदकंदक्षनासाभिरेचितं
दक्षहस्तेनतन्मन्त्रीपापरूपंविचिन्त्यच ॥ पुरतोवज्रपाषाणेप्रक्षिपेदस्त्रमन्त्रतः ॥ रक्षाशिखावंधनकृथैवेतिनत्वावि
दः ॥ यामले ॥ षडङ्गन्यासमाचर्यवामहस्तेजलन्ततः ॥ गृहीत्वादक्षिणेनैवसंपुटंकारयेत्ततः ॥ शिववायुजलपृथ्वीव(
ह्निवीजैस्त्रिधापुनः ॥ अभिमन्त्र्यचमूलेनसप्तधानन्तमुद्रया ॥ निःक्षिपेत्तज्जलंमूर्ध्निशेषन्दक्षेनिधापच ॥ शरीरान्तस्थि
तंपापंक्षालयेत्साधकाग्रणीः ॥ मूलेनतिलकंकुर्यात्तत्संध्येयेवह्निकोलिकी ॥ उड्डीशकुलगर्भिण्यकपिनाकुलसुन्दरि॰
शिववीजहकारःवायुवीजंयकारः जलवीजंवकारःपृथ्वीवीजंलकारःवह्निवीजंरेफः ॥ एषामन्त्रसानुस्वाराणांवीजत्वं(
सजलंवामहस्तंदक्षहस्तेनसंपुटीकृत्यस्फभिर्वीजैस्त्रिधाजलमभिमन्त्र्येत् ॥ तत्त्वमुद्राअनामाङ्गुष्ठेनभवतितथाचहस्त
स्थमेवजलंमूलमन्त्रेणसप्तधामूर्ध्निक्षिपेदित्यर्थः ॥ नदनुकुमारीकल्पामयोर्विकल्पोगुरुक्रमपरिच्छेद्यः ॥ वीरतन्त्रे(

॥राम॥
॥६०॥

69

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मरीचा ॥ वियद्वह्निसमुच्चार्य्य नारायणांशविन्दुकं ॥ मायाबीजं समुच्चार्य्य गगनवह्निसंयुतं ॥ अर्द्धकर्णासमायुक्तं वामकर्ण
विभूषितं ॥ हंसमन्त्रमुच्चरेत् पश्चात् सूर्य्यमण्डलदण्डकं ॥ नारायेपदमुच्चार्य्य हृदयान्ते ज्वलिं क्षिपेत् ॥ ततो गायत्रीञ्जपेत्
तुरुक्तं शैवागमे ॥ गायत्र्यावाथमन्त्रेण दद्यादर्घत्रयं ततः ॥ शिवाय मण्डलस्थाय सुरवेमूलेन तर्प्पयेत् ॥ त्रिधा जप्त्वाथ गाय
त्रीमघविच्छित्तिवारकं ॥ गायत्री स्वेष्टदेवतागायत्रीं तारा गायत्री चोक्ता कालिकायां वै ॥ ऐं भगवत्येकजटे विद्महे चयद्गनः
विकटदंष्ट्रे धीमहि तन्नस्तारे प्रचोदयात् ॥ मालिनीतन्त्रे ॥ महोग्रायै च विद्महे तारायै धीमहि श्रियै ॥ तन्नो देवी वशाद्याने धि
यो यो नः प्रचोदयात् ॥ वीरचूडामणौ ॥ अष्टधा दशधा वापि गायत्रीं च जपेद्बुधः ॥ वाग्भवञ्च समुच्चार्य ऐं एकजटायै विद्म
हे ॥ देवि स्वाहा च समुच्चार्य्य नीलसरस्वत्यै धीमहि ॥ हस्ते वाञ्च समुच्चार्य्य तन्नस्तारे प्रचोदयात् ॥ जप्त्वा समर्पयेत् तां कुर्यादेव
तावामहस्तके ॥ गायत्रीध्यानं तन्त्रे ॥ उद्यदादित्यसंकाशां पुस्तकाक्षकरां स्मरेत् ॥ कृष्णाञ्जिनधरां ब्राह्मीं ध्यायेत्तारकिते
लम्बितं ॥ तथा ॥ उष्णीषी कञ्चुकी नग्नो मुक्तकेशो गणावृतः ॥ अपवित्रकरो ऽशुद्धः प्रलपन्न जपेन्मनुं ॥ अवाहनो करौ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्वा शिरसा प्रणतोपि वा ॥ चिन्ताव्याकुलचित्तो वा क्रुद्धो भ्रान्तस्तृषान्वितः ॥ निरशनः श्रमानो वा गच्छंस्तिष्ठन्स्वपन्वा ॥ रथ्याप-
मपि शिवस्थाने न जपेत्तिमिरागृहे ॥ उपानद्गूढपादो वा यानशय्यागतोपि वा ॥ न जपेदित्यनुषंगः ॥ पतितानामन्त्यजानां द-
र्शने भाषणोश्रुते ॥ क्षुते धोवायुगमने जृंभायां जपमुत्सृजेत् ॥ उत्थायाचमनं स्नाने प्राणायामषडंगकं ॥ कृत्वाचम्य चरेच्छेषं
यद्वा सूर्यादिदर्शनं ॥ चरेदित्यनुषंगः कालीतन्त्रे ॥ तेजोमयं जपफलं देव्या हस्तेन समर्पयेत् ॥ गुह्यातिगुह्यगोप्त्री त्वमिति मं-
त्रेण मंत्रवित् ॥ मंत्रस्तु ॥ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे मातस्त्वत्प्रसादान्महेश्वरि ॥ इति मन्त्रान्
रसिद्धः ॥ इमं मंत्रमुक्त्वा श्रीमद्याम्नुः ॥ भोगश्लोकं पठित्वा च दक्षहस्तेन संभवे ॥ मूलमन्त्रार्घतोयेन वरहस्ते समर्पयेत् ॥ शंभवे
द्रस्तु यल्लक्षणं ॥ या यत्र देवता सा मन्त्रो वा ध्यावरहस्ते ॥ प्रधानहस्तेनेतत्पुंदेवताया दक्षिणाहस्ते स्त्रीदेवताया वामहस्ते सम-
र्पयेत् ॥ देवीनां वामहस्ते तु देवानां दक्षिणेर्पयेदिति यामलवचनात् ॥ शैवागमे ॥ इत्थं जपं समर्प्याथ घण्टावादनपूर्वकं ॥ स्तु-
वीत स्तुतिभिः सम्यक्साधको भक्तिसंयुतः ॥ स्तवश्च ब्रह्मसंहितोक्तो ध्यानप्रकरणे प्रोक्तः ॥ कवचं त्रैलोक्यविजयाख्यमथैव स्म-
नेसहस्रनामस्तोत्रं तु रुद्रयामले ॥ कैलासशिखरे देवं महादेवं महेश्वरः ॥ भवानी रहसी शीत्या पप्रच्छ वरदायकं ॥ देव्युवाच ॥
कथं श्रीशान सर्वज्ञ लभन्ते शक्तिमुत्तमां ॥ साधकास्सर्वदा येन तन्मे कथय सुप्रभो ॥ ईश्वर उवाच ॥ विना पूजां विना ध्यानं वि-
ना जाप्यं विना बलिं ॥ लभन्ते येन कल्याणि तन्मे निगदतः शृणु ॥ नाम्नां सहस्रं नारायाः कथयिष्याम्यशेषतः ॥ शृणु देवि सदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भक्त्याभक्तानांपरमंहितं॥ विनापूजोपचारेणविनाजाप्येनयत्फलं॥ तत्फलंसकलंदेविकथयिष्यामितच्छृणु॥ ॐअस्याःश्रीनार
देव्याभक्तिकुलसर्वस्वनामस्तोत्रस्यअक्षोभ्यऋषिर्बृहतीछन्दःश्रीनारदेवतासर्वकामार्थेजपेविनियोगः॥ ॐनारदाचित्रमलदा
त्रिःकालरात्रिःकपालिनी॥ कालिकाकामदामायामहामायामहोत्सवा॥ महाघनरत्नायज्ञायज्ञोत्सवविभूषिता॥ चन्द्रवक्त्राच
कोराक्षीचारुनेत्रासुलोचना॥ त्रिनेत्रायमपत्राक्षीकुरंगाक्षीमनोहरा॥ ब्राह्मीनारायणीज्योत्स्नाचारुकेशीसुलोचना॥ वाराही
वारुणीविद्यामहाविद्यामहेश्वरी॥ पिंगाकुञ्चितकेशीचमहायज्ञस्वरूपिणी॥ गौरीचम्पकवर्णाचकृशांगीकलकूजिता॥
सर्वानन्दस्वरूपाचसर्वसंकटतारिणी॥ नित्यानित्यमयीनन्दाभवानीलसरस्वती॥ गायत्रीसुचरित्राचकौलव्रतपराय
णा॥ हिरण्यगर्भाभूगर्भाविश्वगर्भायशस्विनी॥ हिमवत्तनयादिव्यादिव्याम्बरविभूषणा॥ जगन्माताजगद्धात्रीजगत
मुपकारिणी॥ ऐन्द्रीसौम्यातथायाम्यावारुणीवायवीतथा॥ आग्नेयीनैरृतीचैवईशानीचण्डिकाम्बिका॥ सुमेरुतन
यावन्द्यासर्वेषांमुपकारिणी॥ ललज्जिह्वासरोजाक्षीमुण्डस्रजविभूषणा॥ सर्वानन्दमयीसर्वानन्दस्वरूपिणी॥ धृति
र्मेधातथालक्ष्मीश्रद्धापन्नगशायिनी॥ रुक्मिणीजानकीदुर्गासत्यासत्यवती॥ कामाख्यामोक्षदानन्तानारसिंहीसरस्वती
महादेवनताचण्डीचण्डदोर्दण्डखण्डिनी॥ दीर्घकेशासुकेशाचपिंगकेशामहत्कचा॥ भवानीभवपत्नीचभवभीतिह
राशची॥ पौरन्दरीतथाविष्णोर्जायामाहेश्वरीपरा॥ सर्वेषांजननीनित्याचार्वंगीदैत्यनाशिनी॥ घोररूपामहेशानीका

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ना·भ॥
॥११२॥

मिनी वरवर्णिनी ॥ महाविद्या महामाया महाविद्या महोत्सवा ॥ विरूपा विश्वरूपा च मृडानी मृडवल्लभा ॥ महापुण्यप्र
दा भीमा मधुकैटभनाशिनी ॥ कोटिचन्द्रप्रतीकाशा शतसूर्यसमप्रभा ॥ जह्नुकन्या मनोज्ञा च पार्वती हरवल्लभा ॥ कामरू
पा महेशानी नित्योत्साहा मनस्विनी ॥ वैकुण्ठनाथपत्नी च तथा शंकरवल्लभा ॥ काश्यपी कमला कृष्णा कंजपत्रायते
क्षणा ॥ महेश्वरी हृष्टरूपा पूर्णचन्द्रनिभानना ॥ मान्या मानवती धन्या कन्या हिमगिरेस्तथा ॥ अपर्णा यमपत्नी नाग
यज्ञोपवीतिनी ॥ महाशंखधरा कान्ता कमनीया नगात्मजा ॥ त्रिसारी वै स्ववीशं भोज्ञ्या गंगा जलेश्वरी ॥ भागीरथी मनोबु
द्धिर्नित्यानन्दमयी सदा ॥ हरप्रिया गिरिसुता हरपत्नी तपस्विनी ॥ महाव्याधिहरा देवी शुम्भासुरविनाशिनी ॥ महापुण्य
प्रदा भीमा मधुकैटभनाशिनी ॥ शंखिनी चक्रिणी धात्री हस्तेपुस्तकधारिणी ॥ चामुण्डा च यला नुगभद्रा दैत्यनिकृन्तनी ॥
शान्तिर्निद्रा महानिद्रा शत्रुनिद्रा च रेणुका ॥ कौमारी कुलजा कुन्ती कौलव्रतपरायणा ॥ नवदुर्गा सदाचाराजेयदीर्घप
दात्मजा ॥ सृष्टिस्सर्गाद्यकालीना निशुम्भप्राणनाशिनी ॥ पद्मिनी वसुधा पृथ्वी रोहिणी विन्ध्यवासिनी ॥ शिवा शक्तिर्महा
शक्तिः शंकरी शक्तिदुर्लभा ॥ दैत्यप्राणहरा दात्री दया दामोदरप्रिया ॥ शान्तिः क्षेमंकरी बुद्धिर्वीणाचाररपरायणा ॥ श्री
विद्या भैरवी विद्या भारती भयनाशिनी ॥ नायकी नारिणी नी क्षमानी क्षा दैत्यविनाशिनी ॥ दात्री दानपरा कालीदुर्गा दैत्य
विनाशिनी ॥ पद्मा पद्मावती हव्या नृत्यप्रिया नपोर्वशी ॥ वज्रिणी वज्रहस्ता च न धानारायणी शिवा ॥ खड्गिनी खड्गहस्ता

॥राम॥
॥११२॥

120

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वकर्न्नकर्प्पूरधारिणी॥ देवागना देवमान्या देवकन्या पुरोमजा॥ सुखिनी सुखदात्री च सर्वसौख्यविवर्द्धिनी॥ श्रीताम्बीलवनी सू
क्ष्मा स्तू क्ष्माकारा वरप्रदा॥ वरेण्या वरदा वाणी ज्ञानिनी ज्ञानदा मता॥ उग्रकाली महाकाली भद्रकाली च दक्षिणा॥ भृगुवंशस
मुद्भूता भार्गवी भृगुवल्लभा॥ शूलिनी शूलहस्ता च मयूरवरवाहना॥ मणिमांसरता रक्ता रक्तकर्प्परधारिणी॥ रक्ताम्बरधरा राम
रमणी सुरनायिका॥ परमानन्ददा ज्येष्ठा योगिनीगणसेविता॥ अम्बा जाम्बवती सत्यभामा चैव नगात्मजा॥ रौद्री रौद्रस्वना रौद्र
रौद्रदैत्यविनाशिनी॥ कुमारी कौशिकी विद्या कालदैत्यविनाशिनी॥ शंभुपत्नी शंभुरता शंभुजाया महोदरी॥ शिवपत्नी शिवरता शि
वजायाम्बिका तथा॥ हरपत्नी हररता हरजाया च शूलिनी॥ मदनी मदनकान्ता च मदनान्तकवल्लभा॥ गिरिजा गिरिकन्या च गिरी
शस्य च वल्लभा॥ भूता भव्या भवा पुष्टा पावना परिपालिनी॥ अहल्या व्यक्तरूपा च इष्टा स्वेष्टप्रवर्द्धिनी॥ अच्युता प्रच्युता प्राणा प्राणा
पावा सरेश्वरी॥ भयान्निधिसमुद्भूता धारिणी च प्रतिष्ठिता॥ उद्भवा क्षोभना क्षेमा श्रीगर्भा परमेश्वरी॥ कारणा पुष्टदेहा च कारिणी
कञ्जलोचना॥ शरणा कमलाधीना विमलानन्दवर्द्धिनी॥ कपर्द्दिनी कल्परूढा सुमनानन्दवर्द्धिनी॥ उदीर्णा भूषणा भव्या सुरसेना
सुरेश्वरी॥ श्रीमती शिशिरानन्ता शिशिरा चलकन्यका॥ सुरमाना सुरश्रेष्ठा ज्येष्ठा पाशेश्वरी स्थिता॥ नमोघ्नी ध्यानसंहन्त्री प्रयत
त्ना पतिव्रता॥ प्रद्योतिनी रथारूढा सर्वलोकप्रकाशिनी॥ मेधाविनी महावीर्या हंसी संसारतारिणी॥ प्रणता प्राणिनामार्त्तिहारि
णी दैत्यनाशिनी॥ डाकिनी शाकिनी लीलावरखड्गधारिणी॥ कौमुदी कुमुदा कुन्दा कौलिका कुलजात्मजा॥ गर्विता गुणसंप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्नानगजाश्वगवाहिनी ॥ चन्द्राननमहेशांच चारुमूर्द्धजशोभिना ॥ मनोज्ञा माधवी मान्या माननीया महक्रुणा ॥ ज्येष्ठा श्रेष्ठा
मघापुष्या धनेष्टा पूर्वफल्गुनी ॥ रक्तविजारिहंत्री च रक्तवीजविनाशिनी ॥ चंडमुण्डारिहंत्री च चण्डमुण्डविनाशिनी ॥ कर्त्रीं
हर्त्रीं मुत्रीं च विमलामलवाहिनी ॥ निर्म्मला भास्करी भीमा महिषासुरघातिनी ॥ कालिन्दी यमुना हृशपुवनी वालिकी नथा
कौशल्या कौमुदी माश्रीमाश्री रुन्धती चाप्यरुन्धती ॥ पुरारिगृहिणी पूर्णा पूर्णारूपा यशस्विनी ॥ संपूर्णा चन्द्रवदना बालच
न्द्रसमप्रभा ॥ रेवती रमणी चित्रा चित्राम्बरविभूषणा ॥ वीणा वीणावती विद्या यशोदा च यशस्विनी ॥ नवपुष्पसमुद्भूता नव
पुष्पोत्सवोत्सवा ॥ नवपुष्पस्रजामालामाल्यभूषणशोभिना ॥ नवपुष्पसमझारा नवपुष्पसमुन्नुका ॥ नवपुष्पात्मका पुष्पा
पुष्पस्रजविभूषणा ॥ नवपुष्पगुणोपेता नवपुष्पोपशोभिना ॥ नवपुष्पप्रियाप्रीता प्रेतमण्डलमध्यगा ॥ कुलशास्त्रप्रदीपा
च कुलमार्ग्गप्रवर्द्धिनी ॥ श्मशानभैरवी कालभैरवी भैरवप्रिया ॥ आनन्दभैरवी ध्यानभैरवी उरभैरवी ॥ मायाभैरवी सौ
म्यभैरवी लोकभैरवी ॥ विद्याभैरवी नीतिभैरवी गुणभैरवी ॥ संमोहभैरवी पुष्टिभैरवी तुष्टिभैरवी ॥ सृष्टिस्थितिभैरवी
च भैरवी स्थितिभैरवी ॥ पुण्डरीकाक्षगृहिणी पुण्डरीकाक्षवल्लभा ॥ आनन्दसुन्दरी वीरसुन्दरी वीरसुन्दरी स्थितिसुदरीः
आनन्दसुन्दरी कालसुंदरी पुरसुन्दरी ॥ मायासुन्दरी सौम्यसुन्दरी लोकसुन्दरी ॥ श्रीविद्यासुन्दरी नीतिसुन्दरी गुणसुन्दरी
मल्लिकाहाररसिका मल्लिकाहारशोभिना ॥ नवचंपकवर्णाभा नागकेसरशोभिना ॥ जवाकुसुमसंकाशा जवाकुसुमशो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिता ॥ प्रियाप्रियंकरी विघ्नौघनवेन्द्रविनाशिनी ॥ ज्ञानेश्वरी ज्ञानदात्री ज्ञानानन्दप्रदायिनी ॥ गुणागौरवसम्पन्ना गुणशील
समन्विता ॥ रूपयौवनसंपन्ना रूपयौवनशोभिता ॥ गुणाश्रया गुणावती गुणागौरवसुन्दरी ॥ तसनारापनिश्रखनाटक
द्वयशोभिता ॥ वृक्षमूलस्थिता देवी वृक्षशाखोपरिस्थिता ॥ वृक्षमध्याग्रनिलया वृक्षमध्यनिवासिनी ॥ कुमुदनी कुमुदिनी कु
मुदा कुमुदाकरा ॥ कौसुंभरूपरुचिरा कौसुंभारुणमसका ॥ स्वयंभूपुष्पसंकाशा स्वयंभूपुष्पधारिणी ॥ स्वयंभूपुष्पसरसि
प्रज्ञाध्यानवती सदा ॥ शुक्रप्रिया शुक्ररता शुक्रमज्जननन्दिता ॥ पर्णाऽपर्णा सुपर्णा च निःपर्णा पापनाशिनी ॥ मदिरामोदस
म्पन्ना मदिरामोदधारिणी ॥ सर्वाश्रया सर्वगुणानन्दकन्दलकारिणी ॥ नारीपुष्पसमप्राणा नारीपुष्पसमुत्सुका ॥ नारीपुष्पो
त्सवा नारी नारीपुष्परता मृगी ॥ चतुर्भुजा दशभुजा अष्टादशभुजा तथा ॥ द्विभुजा षड्भुजा अष्टारपंकजोपरिसंस्थिता ॥ को
वेरी कोरवी कोद्वी कुरुकुल्ला कपालिनी ॥ विदीनकदलीजंघा रंभोरु रामवल्लभा ॥ निशाचरी निशामूर्त्तिर्निशाचन्द्रमसः प्रि
या ॥ चान्द्री चन्द्रकला चन्द्रा चारुचन्द्रसमानना ॥ स्रोतःस्वती श्रोत्रवती सर्वदुर्गतिनाशिनी ॥ सर्वाधारा सर्वमयी सर्वान
न्दप्रवर्द्धिनी ॥ सर्वचक्रेश्वरी सर्वा सर्वमंत्रमयी सदा ॥ सहस्रनयनप्राणा सहस्रनयनप्रिया ॥ सहस्रशीर्षा सुषमा सद
भा सर्वभक्तिका ॥ षष्ठिका षष्ठचक्रस्था षड्वर्गफलदायिनी ॥ षड्विंशत्पममध्यस्था षड्विंशद्दलमध्यगा ॥ हकारवर्णनिल
या हकाराक्षरभूषिता ॥ हारिणी हारवलिता हारहीरकभूषिता ॥ क्रींकारबीजसहिता क्रींकारैरूपशोभिता ॥ कन्दर्पस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कलाकुल्या कौलिनी कुलनर्त्तिता ॥ केतकीकुसुमप्राणा केतकीकृतभूषणा ॥ केतकीकुसुमासक्ता केतकीपरिभूषिता ॥ क
र्पूरपूर्णवदना कलानाथसमप्रभा ॥ कलाकेलिप्रिया कीर्णा कदम्बकुसुमोत्सुका ॥ कादम्बिनी करिगतिः कुंजरेश्वरगामि
नी ॥ खर्वा च खञ्जनद्वन्द्वलोचना खङ्गभूषिता ॥ खद्योत इव दुर्लक्षा खद्योत इव चञ्चला ॥ गयागदा गुणश्री नागीनवाद्यप्रिय
गतिः ॥ गणेश्वरी गणेज्या च गणपूज्या गणप्रदा ॥ गुणाढ्या गुणसम्पत्तिर्गुणदात्री गुणात्मिका ॥ गुर्व्वी गुरुतनया गौरी गायापव
फलप्रदा ॥ घर्म्मांशुगृहिणी घर्म्मा घर्म्मसिन्धुविनाशिनी ॥ घर्घरा घोरवदना घोरदैत्यविनाशिनी ॥ घोषा घोषवती घोषा
घोषपुत्री घनालया ॥ चर्च्चरी चारुनयना चारुवक्त्रा चतुर्गुणा ॥ चतुर्वेदमयी चूर्णा चन्द्रास्या चतुरानना ॥ चलच्चकोरन
यना चलत्खञ्जनलोचना ॥ चलदम्भोजनयना चलदम्भोजलोचना ॥ चलदम्भोजवदना चलदम्भोजशोभिता ॥ छायी छ
त्रप्रिया छत्रा छत्रचामरशोभिता ॥ छिन्ना छर्द्दिश्छिन्नशिराश्छिन्ननासा छलान्विता ॥ छलाढ्या छलसंचरा छलरूपा छ
लच्छिवा ॥ छकारवर्णनिलया छकाराद्या छलप्रिया ॥ छद्मिनी छद्मनिरता छद्मा छद्मनिवासिनी ॥ जगन्नाथप्रियाजीवा
जगन्नाथरताजरा ॥ जीर्णा जीमूतवाना जीमूतैरूपशोभिता ॥ जामान्तवरदा जृम्भा जम्भलार्जुनधारिणी ॥ जराजरान्वि
ता जम्भा जम्भाराजिनवरप्रदा ॥ जिता जयित्री जयदा जयदात्री जयप्रदा ॥ झञ्झरी झीत्कृतिर्झिल्ली झर्झरी झर्झरिका तथा
टङ्कारकारिणी टीत्कारकारिणी टङ्कधारिणी ॥ ठक्कुरज्ञी डमरुकरा डाकिनी डमरुप्रिया ॥ टङ्कारवा च टङ्कारीतुल

122

२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सीनालभक्षिका ॥ तुलातीनिलिकानीरागीनाया नारिरिणिका नथा ॥ नच्च विज्ञानच्च रता नच्च विश्रावनच्च दा ॥ नाश्चिका नच्च गोप्या
च नच्च सारच्च पा ॥ नच्च धात्री नच्च करी नच्च नारी नरातुरा ॥ नयःप्रभावा नच्च ज्ञा नच्च सारफलप्रदा ॥ नपस्ता नौलिनी नीरर्णा
तानीयानुलसीतुषा ॥ तुषारकरपूर्णास्या तुषारकरमण्डिता ॥ तुहिनांशुसमावास्या तुहिनांशुसमप्रभा ॥ तुषारकरतुल्याङ्गी
तुषारकरसुन्दरी ॥ तुषारधामतुल्यास्या तुषारांशुसमानना ॥ तुहिनाद्रिसुता नाथा तालाचीनालवर्जिता ॥ नारस्वरेणसहि
ता नारस्वरविभूषिता ॥ थकारकूटनिलया थकाराक्षरमालिनी ॥ दयावती दीनरता दुःखदारिद्र्यनाशिनी ॥ देग्र्यस्पदुःखद
लिनी दैत्यगणपदनाशिनी ॥ दुहितानी नवन्धुश्च दानवेन्द्रविमर्द्दिनी ॥ दानदात्री दानपरा दानसम्मानतोषिता ॥ दारुण्यादि
सेविता दनजादमोदरयय परा ॥ दधीचिवरदा दुष्टदानवेन्द्रविनाशिनी ॥ दीर्घनेत्रा दीर्घकचा दीर्घनासा च दीर्घिका ॥ दारि
द्र्यदुःखशमनी दुष्टासुरनिसूदिनी ॥ दम्भिका दम्भहरणा दनुजेन्द्रविनाशिनी ॥ धनधान्यप्रदा धन्या धनेश्वरवरप्रदा ॥ धर्
म्मिणी धार्म्मिका धर्म्मा धर्म्मा धर्म्मप्रवर्द्धिनी ॥ धनेश्वरी धर्म्मदात्री धर्म्मानन्दप्रवर्द्धिनी ॥ धनाध्यक्षा धनप्रीता धनाढ्या धन
तोषिता ॥ धीरा धैर्य्यवती धिष्ण्या धवलांभोजसन्निभा ॥ धरित्री धारिणी धात्री धुरीणा धवलास्पदा ॥ धार्म्मिका धर्म्मसहि
ता धर्म्मनिन्दकवर्ज्जिता ॥ नवीना नीरजा निम्ना निम्ननाभिर्न्नगेश्वरी ॥ नूतनांभोजनयना नवीनांभोजसुन्दरी ॥ नागरीना
गराजेज्या नगराजसुता नगा ॥ नागराजगतिर्न्नागराजमाल्यविभूषिता ॥ नगेश्वरी नगारूढा नगराजकुलेश्वरी ॥ नवी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ना॰ भ ॥
॥११४॥

नेनुकलानान्दीनन्दिकेश्वरवल्लभा ॥ नीरजानीरजाक्षी च नीरजद्वन्द्वलोचना ॥ नीरप्रसूता नीरभवा नीरनिर्म्मीणदेहनी ॥ ना
गयज्ञोपवीना ख्याना गयज्ञोपवीतिका ॥ नागकेशरसन्तुष्टा नागकेसरमालिनी ॥ नवीनकेतकीकुन्दमन्दारस्रजभूषिता ॥ नायि
कानायकप्रीता नायकप्रेमतोषिता ॥ नायकप्रेमसहिता नायकप्रीतितोषिता ॥ नायिकानन्दिनत्या नायकानन्दकारिणी ॥
नर्म्मकर्म्मरता नित्या नर्म्मकर्म्मपरायणा ॥ नर्म्मकर्म्मप्रिया नर्म्मा नर्म्मधर्म्मपरायणा ॥ नर्म्मप्रीता नर्म्मरता नर्म्मध्यानपरायणा ॥ न
र्म्मकर्कसहिता नर्म्मकर्म्मैकपालिका ॥ नरनारीगणप्रीता नरनारीवरप्रदा ॥ नारायणप्रिया निष्का निष्कवर्णा नकारदा ॥ पुष्प
प्रिया पुष्परता पीयूषपानपरायणा ॥ पीयूषप्रिया च पुष्पेज्या पुष्पदामविभूषणा ॥ पुण्यदा पूर्णिमा पुण्या पुण्यकोटिफलप्रद
पुराणागमवेद्या च पुराणागमगोपिता ॥ पुराणागमगोप्या च पुराणागमतोषिता ॥ पुराणगोचरा पर्वा पर्वप्रोक्तविनाशिनी
प्रह्लादहृदयाह्लादगेहिनी पुण्यचारिणी ॥ फाल्गुनी फाल्गुनप्रीता फाल्गुनप्रेमधारिणी ॥ फलपूफलप्रदा चैव फणिराजवि
भूषणा ॥ फणाकारा फणिप्रीता फणिहारविभूषणा ॥ फणीशकृतसर्वाङ्गभूषणा फणिवाहिनी ॥ फणिप्रीता फणिर
ता फणिकङ्कणधारिणी ॥ फलदात्री फलासक्ता फलाभरणभूषिता ॥ फकारकूटसर्वाङ्गी फाल्गुनानन्दवर्द्धिनी ॥ वासु
देवरता विज्ञा विज्ञविज्ञानकारिणी ॥ वीणावती वलाकीर्णा वाराही यूपरोचिषा ॥ वालावसुमती विघ्ना विघ्नाहारविभू
षिता ॥ विघ्नवनी वैध्यपदर्षिता वैवस्वती वलिः ॥ वालिविनाशकारिणी वरमास्थावरानना ॥ विष्णोर्वक्षस्थलस्था च वा

123
॥ राम ॥
॥११५॥

स्वती विंध्यगेहिनी ॥ वानीरवनहंसस्थाच वानीरकुञ्जमोक्तुका ॥ भीनिहाभयदा भानोरंशुजालसमप्रभा ॥ भार्गवेज्या भृगोः
पूज्या भारद्वाजनमस्कृता ॥ भीनिहाभयसमन्नाभीमाकाराभ्रसुन्दरी ॥ मायाधरी मानरता मानसम्माननप्रदा ॥ माधवान
न्ददा माध्वीमदिरामदिरेक्षणा ॥ महोन्नाहगुणा येना महनीमहदुद्भवा ॥ मदिरामोदरमिता मदिरामज्जनेरता ॥ यशो
धरी यशोविद्या यशोदानन्दवर्द्धिनी ॥ यशःकर्पूरधवला यशोदामविभूषिता ॥ यमराजस्वसा योगमार्गानन्दप्रवर्द्धिनी
यादवानन्दकरिणी यादवानन्दवर्द्धिनी ॥ यज्ञपीना यज्ञमयी यज्ञकर्मविभूषणा ॥ रामप्रिया रामरता रामतोषणतत्परा
राज्ञी राजकुलेज्या च राजराजेश्वरी रमा ॥ रमणी रामणी रम्या रामानन्दप्रदायिनी ॥ रजनीकरपूर्णास्या रक्तोत्पलविलोचना
लाञ्जलिप्रेमसन्तुष्टा लाञ्जलिप्रणयप्रिये ॥ लाक्षारुणा च ललना लीलालीलावतीलया ॥ लङ्केश्वरगुणप्रीता लङ्केशवरदा
यिनी ॥ लवङ्गीकुसुमप्रीता लवङ्गीकुसुमस्रजा ॥ वानाविवस्वद्गृहिणी विवस्वत्प्रेमधारिणी ॥ शावलाशावलाशालाघर
श्रीश्वशरद्भुणा ॥ षट्कोणचक्रमध्यस्था संपदाक्रीविशोभिता ॥ क्षेमा अम्बा तथा ज्ञा च इला ईश्वरवत्प्रभा ॥ उग्रारवा चत
था चोर्णा ऋकारान्तस्वरोद्भवा ॥ लृकारवर्णकूटस्था लृकारस्वरभूषिता ॥ एष्या चैव तथा चौ या औकाराक्षरधारिणी ॥ अं
साअकारवलिता सर्वाङ्गमसुगोपिता ॥ ॐ ॥ य इदं पठते नित्यं प्रत्यहं भक्तिसंयुतः ॥ दिवारात्रौ तथा संध्यासमये समहेश्व
र ॥ स्तवमात्रस्य पाठेन राजा किङ्करतामियात् ॥ सर्वाङ्गमेस पूज्यः स्यात्सर्वतन्त्रे स्वयं हरः ॥ शिवस्थाने च शय्यायां भ्रम

॥ ना·भ ॥
॥ ११६ ॥

गारेवनुष्यथे ॥ यः पठेच्छृणुयाद्वापि स योगी नात्र संशयः ॥ यानि नामानि सन्त्यस्मिन्नृप्रसन्नान्मुरवैरिणः ॥ ग्राह्या
नि नानि कल्याणि नाम्यानि नु कदाचन ॥ हरेर्नाम न नष्टक्रीयान स्वद्रोनुलसीदलं ॥ नान्यचिन्ताय कर्त्तव्या नान्यनिन्दा कदा
चन ॥ सिन्दूरकरवीराद्यैः पुष्पैर्ब्रीहिनकैः शिवां ॥ योर्चयेद्भक्तिभावेन तस्यासाध्यं न किञ्चन ॥ वानरस्तम्भं जलस्तम्भं गति
स्तम्भं विवस्वतः ॥ वह्नेः शैत्यं करोत्येव स्तवस्यास्य च कीर्तनात् ॥ स्त्रियमाकर्षयेत्तूर्णं मरीन्सजयते हठात् ॥ मोहयेद्राज
दाराश्च देवानपि वशं नयेत् ॥ यः पठेच्छृणुयाद्वापि एककृत्वे न सर्वदा ॥ स दीर्घायुः सुखी वाग्मी वाणीनस्य वशंकरी ॥
सर्वतीर्थाभिषेकेन गयाश्राद्धेन यत्फलं ॥ तत्फलं तस्य सकलं यः पठेदेकनस्तवनः ॥ येषामाराधने भक्त्या ये च साधितनुमुख्य
ताः ॥ तेषां कृतार्थं सर्वत्र गतिर्दैवीपदालये ॥ अनुमुक्तं लतानां च ध्येस्थितं वादरेऽेन नालयेत् ॥ जप्त्वा स्तुत्वा च भक्त्या च गन्ध
नैनारिकायदं ॥ अष्टम्यां च चतुर्दश्यां नवम्यां शनिवासरे ॥ संक्रान्तौ मन्नालेरात्राव मावास्यां च योऽर्चयेत् ॥ वर्षवात्यनु
देवेशि न साधीनाश्व सिद्धये ॥ मृतपुत्रा च या नारी मृतगर्भा च याङ्गना ॥ मृता पत्या च या नारी दौर्भाग्यापदपीडिता ॥ वं
ध्या वाकाकवध्यावा मृतपुत्रा च या गता ॥ धनधान्यविहीना च रोगशोकाकुला च या ॥ ताभिरेतत्सदा देवि भूर्जपत्रे लिखाप्ययेत्
त् ॥ सव्यभुजे च वध्नीयात्सर्वसौख्यवती भवेत् ॥ एवं पुमानपि प्रायो दुःखेन परिपीडितः ॥ सभायां व्यसने घोरे विवादे श
त्रुसङ्कटे ॥ चातुरङ्गे तथा युद्धे सर्वत्रापदि पीडिते ॥ स्मरणादस्य कल्याणि संक्षयं यान्ति दूरतः ॥ पूजनीया च यत्नेन

124

॥ राम ॥
॥ ११६ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शून्यागारे शिवालये ॥ विल्वहृक्षतटे देवि सर्वदा कुलमण्डले ॥ शूकरास्रवसंयुक्ते दुग्धैर्ब्रह्मकैस्स्नानपणुले: ॥ अप्यपिष्टसं
युक्तैर्नैवेद्यैश्च यथोचितैः ॥ निवेदितन्त्वया तद्वा भोक्तव्यं च विधानतः ॥ अनेनैव विधानेन योऽर्चयेत् परमेश्वरि ॥ स
भूर्मीं वलये देवी साक्षाच्छिवो न संशयः ॥ मण्डान्ते न कलापि सर्वकार्यं जपादिकं ॥ कुलसर्वस्वकस्यैव प्रभावो वर्णितो मया
न शक्यते सदा स्वान्तुं वर्षकोटिशतैरपि ॥ किंचिन्मयापि चापल्यात्कथितं परमेश्वरि ॥ जन्मान्तरसहस्रेण वर्णितुं न च
शक्यते ॥ कुलीनाय प्रदातव्यं नाराभक्तिपराय च ॥ अन्यभक्ताय नो देयं वैष्णवाय विशेषतः ॥ कुलीनाय महेशाय भक्ति(
श्रद्धापराय च ॥ महात्मने सदा देयं परीक्षितगुणाय च ॥ नाभक्ताय प्रदातव्यं ध्यानरपराय च ॥ न देयं देवदेवेशि गो
प्यं सर्वांगमे सदा ॥ पठनीयं सदा देवी सर्वावस्थासु सर्वदा ॥ यस्तोत्रं कुलनामकं प्रतिदिनं भक्त्या पठेन्मानवस्तस्याधि
न्नवयैर्धनैश्वर्यसमो विद्याभवे ब्रह्मकपतिः ॥ सौन्दर्येण च मूर्तिमान्मनसिजः कीर्त्या च शीतद्युतिः शक्त्या शङ्करस्य वीर्य
विभवै भूमीपतिर्नान्यथा ॥ ॥ इति श्रीहरगौरीसंवादे श्रीनाथाख्या: कुलसर्वस्वनाम सहस्रनामस्तोत्रं संपूर्णं ॥ ॥
अथ नित्यहोमं कुर्यात् ॥ तदुक्तं ज्ञानार्णवे ॥ संकल्पपरमेशानि नित्यहोमविधिश्च देत् ॥ सकलसु ॥ अमुकदेवताप्री
त्यैस्तनदा कुनीवहं सेष्य इत्येवं रूपं: ॥ नीलतन्त्रे ॥ नित्यहोमं प्रवक्ष्यामि सर्वार्थं येन विन्दति ॥ विधिवद्वह्निमानीय क्र
व्यादांशं परित्यजेत् ॥ ततश्च मंत्रमुच्चार्य कुण्डे वा स्थण्डिले तथा ॥ भूमौ वा संस्मरेद्वह्निं व्याहृतित्रितयेन तु ॥ आहुति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ता॰भ ॥
॥११८॥

चयमुत्क्षिप्य षडङ्गं हृवनन्तनः॥ ततो देवीं समावाह्य मूलेनैव यथाक्रमं॥ कृत्वा स्नात्वा नमस्कृत्य विसर्ज्जयेदिद्दुमण्ड
ले॥ कथापंशमग्ने रेकमग्गारं नैत्तत्वां कथा देव्योरिन्दुव्याप्यक्षिये दिनि संव्रदाय:॥ सारसंग्रहे॥ इत्थं नु सस्कृत्य नेव क्रो
देवमावाह्य मंत्रवित्॥ संपूज्य मूलमंत्रेणाय पञ्चविंशानि माकृतिं॥ कृनेदाज्येन हविषा निलैर्वा पायसैः शुभैः॥ नवतैस्तित
संमिश्रैः केवलैर्वाथ उष्णकैः॥ भद्यावरण देवानां मेकैकामाकृतिं कृनेन्॥ उद्यास्य देव वह्निश्च पूज्यस्थानं व्रजेन्नन॥ उप
विश्यासने मन्त्री दद्यात्पूर्नवतिन्ननः॥ एवं पञ्चविंशानि षोडशाकृत्यो विकल्पः॥ अग्नेस्तु संस्कारो नोलनञ्चोक्त एव कर्नव्ये
नाधिकः॥ अग्न्याधानादिकं कर्म नित्यहोमेन विद्यते इति विशेषवचनात्॥ ज्ञानार्णवे न न आरात्रिकं कुर्यात्सर्वकामा
र्थसिद्धये॥ सौवर्णी राजनेकांस्ये लौकेनेन्नमनोहरं॥ कुंकुमेन लिखेत्पद्मं वसुपत्रं वरानने॥ कर्णिकायां दीपमेकं वसु
पत्रेषु दीपकान्॥ यवगोधूमरचितान् शर्करातुष्यसंयुतान्॥ वलयाश्विनजातोभाभिः शोभितान् घृनपूरितान्॥ अभि
मंत्र्य तन्नेमंत्री रत्नेश्वर्या ततः परं॥ मूलमंत्रेण वाग्भवं च नववारान् त्रिकथ्य देत्॥ नन्ताचं तु समु हृद्यमस्तकान्तं पुनः
पुनः॥ नववारं महादेव्या सेनन नीराजनं त्वरेत्॥ नीराजनेमहादेव्याश्चक्रमुद्रां प्रदर्शयेत्॥ रत्नेश्वरी विद्यापि तन्त्रे वोक्ता
श्रीवीजं च परावीजं संलिखेन्मनुवित्तमः॥ गसौ चयमनानूपश्चादिन्द्रस्थानकं मनोलिखेत्॥ वामकर्णसमयुक्तान्
विन्दुनादसमन्विनान्॥ पूर्ववीजेविलोमेन रत्नेश्वरीयं नवाक्षरी॥ परा माया वीजं इन्द्रो लकारः वामकर्णो उकारः पूर्ववी

125

॥ राम ॥
॥११८॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जेश्रीवीजयरावीजे एवं श्रीं क्रीं ग्लूं स्लूं म्लूं स्त्रूं न्लूं क्रीं श्रीं इति रत्नेश्वरी सिद्धानि ॥ चक्रमुद्राउक्ता लक्षणा संग्रहे ॥ विपर्ययेन लेकु
न्वावामदक्षिणहस्तयोः ॥ अन्यथास्तोयथ येन्द्वे वक्रनिधानामिकान्तरे ॥ चक्रमुद्रेयमुद्दिष्टा सर्वसिद्धिकरी शुभा ॥ ॥ उ
क्तं तन्त्रे ॥ पोरराणि केहे दिकैश्च मूलमंत्रेणचैवहि ॥ प्रदक्षिणं प्रणामश्च कुर्यात् कर्मार्थसाधकं ॥ यामले ॥ त्रिकोणाका
रा सर्वत्र ननतिः शाक्ते समीरिता ॥ ननिः प्रदक्षिणं ॥ तथार्द्धचन्द्रा महेशस्य पृष्ठनश्च समीरिता ॥ शिवप्रदक्षिणे मंत्रैरर्द्ध
चन्द्रक्रमेणतु ॥ सव्यासव्यक्रमेणैव सोमसूत्रं न लंघयेत् ॥ त्रिधा च वेष्टयेत्तस्मात् देवतायाः प्रदक्षिणे ॥ एकहस्तप्र
णामश्च एकश्चापि प्रदक्षिणं ॥ अकाले दर्शनं विष्णोः हन्ति पुण्यं पुरातनं ॥ एकश्चण्ड्यां रवौ सप्त त्रीणि दद्याद्विनायके ॥
चत्वारि केशवे दद्याद्द्विवे चार्द्धप्रदक्षिणं ॥ ॥ अथ नतिः साष्टाङ्गा पञ्चाङ्गा वा ॥ तथाहि तंत्रे ॥ सा-ष्टाङ्गाश्च यथाङ्गाः
पूजाकर्मसु सम्मतः ॥ हस्ताभ्यां चरणाभ्यां च जानुभ्यां चक्षुषां तथा ॥ मूर्द्ध्ना दृष्ट्या तथा वाचा चित्तेनाष्टाङ्ग ईरितः ॥ हस्तजा
नुशिरोवाक्यधीभिः पञ्चाङ्ग ईरितः ॥ अत्र च नतेः प्रकारान्तरमप्युक्तं तन्त्रे ॥ संपुटं चतुरस्रश्च हृन्तं गोमुखमेव च ॥ यो
निमुद्रेति कथिता मुद्राः पञ्चनमस्कृताविति ॥ तत्र भूमिसंलग्नाञ्जलिः शिरःसंयुक्ता संपुटमुद्रा ॥ भूमिसंलग्नोत्तानवा
मकरतलोपरि निर्म्यकस्यापि न वामाग्राधोमुखदक्षिणकरपृष्ठसंयुक्ते शिरसि चतुरस्रमुद्रा भूमिसंलग्नोत्तानाङ्गु
ष्ठमुष्टिद्वयसंलग्ने शिरसि हृन्तमुद्रा केचित्तु ॥ हस्तद्वयाङ्गुलीर्ग्रथित्वा ॥ उत्तानाङ्गुष्ठद्वयनिवेशनेन हृन्तमुद्रेत्याहुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ना·भ॥
॥११८॥

भूमिसंलग्नविस्तारितानामुत्तानकसंपुटाकारकरद्वयोपरिस्थितः संयोगे गोमुखमुद्रा ॥ योनिमुद्राप्रसिद्धेति सांप्रदायिका ॥ कु
लार्णवे ॥ कृत्वार्च्चनादिकं सर्वं समन्त्रोदपुरस्सरं ॥ इतः पूर्वादिमन्त्रेण देवतायै समर्पयेत् ॥ मन्त्रोद्धारः सारसंग्रहे ॥ व
देदिति पदं पूर्वं प्राणबुद्धिं ततो वदेत् ॥ देहधर्म्माधिकारतो जाग्रत्स्वप्नसुषुप्तिषु ॥ वदेत्सर्वावस्थासु वाचेति पदमु
च्चरेत् ॥ कर्म्मणा चैव हस्ताभ्यां पद्भ्यामुदरेण च ॥ वदेच्छिश्ना च पश्चाद्वै स्मृतं यत्तदमुच्चरेत् ॥ उक्तं च यत्कृतं तन्मे सर्वं ब्र
ह्मार्पणं भवतु ॥ स्वाहान्तश्चापि संप्रोक्तं ब्रह्मार्पणमनुत्तमं ॥ समर्पणप्रकारस्तु प्रोक्तो वागमे ॥ इत्यर्घोदकमुत्सृज्य कि
ञ्चिद्देवस्य दक्षिणे ॥ करे समर्पयेद्विद्वान् कृत्वाराधनं प्रिये ॥ अत्र देवीनां वामहस्ते समर्पणं वामहस्ते समर्पये
दिति ॥ वीरचूडामणिवचनात् ॥ ततो देवतां विसर्ज्जयेत् ॥ तदुक्तं हंसपारमेश्वरे तन्त्रे ॥ संहारमुद्रयाध्याथ तेजो भूयं महे
श्वरीं ॥ विभाव्य पुष्पेणोद्धृत्य वहन्नासाध्वना शिवे ॥ प्रवेश्य द्वादशान्तस्य सहस्रारसरोरुहे ॥ विश्रम्य मध्यनाड्या तामा
नीय हृदयाम्बुजे ॥ संस्थाप्य सम्यक् संपूज्य स्वात्मानं तन्मयं स्मरेत् ॥ संहारमुद्रा यथा ॥ पृष्ठलग्नौ करौ कृत्वाधश्चाङ्गुल्योन्यो
न्यमध्यतः ॥ परिवर्त्तनतः कुर्यात्तर्ज्जन्यौ सरला कृती ॥ विसर्ज्जने निगदिता मुद्रा संहारसंज्ञिकेति तन्त्रोक्ता ॥ ततो निर्म्मा
ल्यवासिनीं पूजयेत् ॥ तदुक्तं कुलमूलावतारे ॥ ऐशान्यां मण्डलं कृत्वा चारयम्य विवर्ज्जितं ॥ विसर्ज्जनार्थं निर्म्माल्यधारि
णीः पूजनाय वै ॥ निःक्षिप्य तस्मिन्निर्म्माल्यं मन्त्रेणानुसमर्च्चयेत् ॥ चण्डेश्वरि महादेवि निर्म्माल्ये चन्दनादिभिः ॥ तेप

126

॥राम॥
॥११८॥

२५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चोष्यान्नपानादि निर्माल्यं प्रक्षिलेपनं ॥ निर्माल्यभोजनं तुभ्यं ददामि श्रीशिवाज्ञया ॥ इति निवेद्य शेषमनुदत्वा नत्वा विस
र्ज्जयेत् ॥ निर्माल्यं मस्तके धार्य्यं मूलमन्त्रेणमन्त्रिणा ॥ प्राक्षपादोदकं देवीनैवेद्यं विभजेत् प्रिये ॥ तदङ्गेभ्यः स्वयं भुक्त्वा
तन्मयो विहरेत्स्वयं ॥ ॥ इति मत्स्योपाध्यायठकुरश्रीनरसिंहविरचिते नारायणक्रिसुधार्णवे नारायणनित्यार्चनविधिः पञ्च
मस्तरङ्गः ॥ ५ ॥ अथ ब्राह्मणानिरिक्तवीरश्चेत्तु पादविसर्ज्जनानन्तरं नाद्यादिवच्छेजु पात्रस्थार्पणात् ॥ शाकपथ मंगुर
वे गुरुपात्रं समभ्यर्च्य यित्वा देयं ॥ तथा हि तन्त्रे ॥ ततः श्रीगुरुरूपाय साक्षात्परशिवात्मने ॥ करभ्यां वा चतुर्द्रूत्य सद्विनी
यं निवेदयेत् ॥ भावचूडामणावपि ॥ चियात्रयक्षे ॥ अर्द्धभागं द्विधाकृत्वा गुरवे वै कभागकं ॥ एकं कुलाय दत्वा वै स्वकेन
देवतर्पणं ॥ कुलायशक्तये ॥ तथा कुलार्णवेपि ॥ अनिवेश्य तु यः शक्तौ कृतद्रव्यं निषेवते ॥ निःफलात्तस्य सा पूजा देवतान
प्रसीदति ॥ देवतर्पणं पानद्रव्यमेव ॥ तथा हि कुलार्णवे ॥ आत्ममूलत्रिकोणाग्रात् सूर्य्यकोटिसमप्रभे ॥ कुण्डल्याकृति
विन्दूयेऽनेद्द्रव्यं समन्त्रकं ॥ समयाचारेपि ॥ कुण्डलीतर्पणार्थञ्च भोगपात्रं समाचरेत् ॥ अतः शक्तिमनुस्मृत्य तर्पयेत्
इष्टदेवतां ॥ कौलिके भौवीरपात्राद्यपरशक्तिभ्यो योगिनीपात्रादमृतं समुद्धिद दत्वा स्वयं स्वीकुर्य्यादित्यधिकया त्वतापरे
कुलार्णवे ॥ निर्मन्त्र्यन्नपि वेद्रव्यं पायश्चित्तं विधीयते ॥ तत्रुसन्ने वोक्तः ॥ इदं पवित्रममृतं पिबामि भवभेषजं ॥ पशु
पाशसमुच्छेदकारणं भैरवोदितं ॥ चित्तस्थानन्दसारत्वान्तस्यानन्दमयत्वतः ॥ तन्मयत्वाभ्यभावनाभावभ्रान्तिर्हिताऽस्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ त्रा॰भ ॥
॥११९॥

स्वस्थानस्त्रविकाशाय गुरासंस्थेन धीयते ॥ तस्मादिमां गुरान्देवीं पूर्सी हन्तांज हेम्य हं ॥ मन्त्रेणानेन देवेशि मूलमन्त्रेण मन्त्र
वित् ॥ अनाकुलमनाः कुर्यादलिपानं शनैः शनैः ॥ पानभेदफलोल्लासस्य मारास्थितिलक्षणं ॥ अविज्ञाय चरेद्यस्तु सम
वेण पदं पदं ॥ पानभेदस्तत्रैव ॥ पानन्तु त्रिविधं प्रोक्तं दिव्यवीरपशुक्रमात् ॥ दिव्यं देवाग्रतः पानं वीरमुद्रासने कृतं ॥ से
च्छया पशुवत् पीतं पशुपानं तदुच्यते ॥ फलन्तु ॥ मन्त्रसंस्कारसंशुद्धाऽमृतपानेन याहृतिः ॥ जायते देवताभावो भवब
न्धविमोचकः ॥ इत्यादि तत्रैवोक्तं ॥ प्रमाणमपि तत्रैव ॥ आनन्दं ब्रह्मणो रूपं तच्च मोक्षव्यवस्थितं ॥ तस्याभिव्यञ्जक
मन्त्वा योगिभिस्तेन धीयते ॥ इत्यादि ॥ उल्लासभेदस्तत्रैव ॥ आरंभस्तरुणश्चैव यौवनः प्रौढ एव च ॥ तदन्तश्चोन्मना
श्चानवस्थारव्यश्चैव सप्तमः ॥ ॥ अथैषां लक्षणं ॥ तत्रयंस्यादारंभः कथितः कुलनायिके ॥ कथितस्तरुणश्चैव त
रुणां सुखमम्बिके ॥ यौवनं मनसः सम्यगुल्लासः कथितः प्रिये ॥ स्खलनं दृष्टनोवाचां प्रौढमित्यभिधीयते ॥ स्वाभी
ष्टचेष्टाचरणां प्रौढान्तः परिकीर्तितः ॥ उन्मनाः यन्मनोन्थानमूर्छनाद्यसमुद्भवः ॥ देहेन्द्रियाणामवशाश्चानवस्था निग
द्यते ॥ तत्त्वत्रयस्य मन्त्रपूर्वकमधिया ऽमृतत्तुकत्त्रयपानस्यारंभवत्स्मृतिमायएव ॥ अत्र च तत्त्वभुद्रैः प्रकारान्तर
स्योक्तत्वात् ॥ एवं चाम्नायान्तरेवारत्रयग्रहणमारंभ इति प्रतिभाति ॥ स्थितिर्मर्यादा सा यथा ॥ निशङ्को निर्मलो धी
रो निर्द्वन्द्वो निःकुतूहलः ॥ निर्लीनवेदशास्त्रार्थो वरदस्वारुणीम्पिबेत् ॥ देवान्पितॄन्समभ्यर्च्य देवीशास्त्रोक्तवर्त्म

127

॥ राम ॥
॥११९॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ना॥ गुरुं स्मरन्नपिबन्मद्यं खादन्मांसं न दोषभाक्॥ पितरोत्र गुरुमरमगुर्व्वीद्व्यस्य च॥ तथा॥ सव्येनोद्धृत्य यात्रं नु गुडाक्रुत्वाः
पसव्यतः॥ यथाविधि द्वितीयेन गृह्णीयान्मन्त्रमुच्चरन्॥ मुद्रां मुद्रिं द्वितीयेनेतिसहयोगेन नीयात्॥ चर्व्वणेन विनायानं के
वलं विषभक्षणं॥ चर्व्वणां मुद्रिं न चणकादीनां श्रीचक्रस्य कुलद्रव्यं यः पशुभ्यः प्रयच्छति॥ स्नेहलोभाद्भयाद्वापि स भवेद्यो
गिनी पशुः॥ यथाधिकारं न त्वापि कर्त्तव्यं यात्र मेलनं॥ अदीक्षितैरनाचारैरतन्त्रज्ञैरदेवतैः॥ दूषितैः समयभ्रष्टैर्न्न कुर्य्या
द्द्रव्यसङ्गतिं॥ अभिज्ञमन्यमानेभ्यः प्रयच्छत्र नधारिभिः॥ पशुभिः शूद्रकर्मस्यैर्न्न कुर्य्याद्द्रव्यसङ्गतिं॥ अपात्रस्थितं हे
तुत्वं न दद्याद्भैरवाय च॥ यदि दद्यान्महेशानि देवताशापमाप्नुयात्॥ भैरवाय साधकाय॥ तथा॥ स्त्रोतोभेदेन वा कुर्य्यात्
कौलिकः पात्रमेलनं॥ कदाचिदपि विश्रम्भे घोडसश्चाम्नायस्येकोव समकरं कुर्य्यादित्यर्थः॥ तथा॥ पूर्व्वदक्षिणयोरेकाम्नुदक्प
श्चिमयोरपि॥ तस्मिन्नूक्रमार्च्चनपरे वीरैः सह सङ्घेरपि॥ कामिनीभिश्च तन्न कुर्य्यात्स्त्रोतसां चतुष्टयं दर्शनेन ऊर्द्ध्वाम्नायस्य
तकेनापनेने चतुर्न्वडयच्चारद्वतिध्वनितं॥ तथा॥ जानुच्छिष्टं पिवेद्द्रव्यं वीरोच्छिष्टं च चर्व्वणं॥ आत्मोच्छिष्टं नदानव्यं परकीयं
न भक्षयेत्॥ परकीयं परगुरुणोच्छिष्टं न चापि विशेषतश्चैव॥ गुरुशक्तिसुतानाम्न गुरुज्येष्ठकनिष्ठयोः॥ स्वज्येष्ठस्यापि
चोच्छिष्टं स्वादेन्नान्यस्यापि तु इति॥ उच्छिष्टं भक्षयेत्स्त्रीणां ताभ्यो नैव प्रदापयेत्॥ कनिष्ठानां स्वशिष्याणां दद्यात्स्वोच्छिष्ट
मम्बिके॥ दद्यात्स्नेहेन योन्येभ्यः सो भवेद्दायदायदं॥ असमोच्छिष्टपात्रं नु यो गृह्णाति विमूढधीः॥ स्नेहलोभाद्भयाद्वापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ना·भ ॥
॥ १२० ॥

देवताशापमाप्नुयात् ॥ अन्त्यजेष्ठकनिष्ठतासन्तीर्थानामुपदेशक्रमेणैव ॥ तथाहि तन्त्रयामले ॥ वालोपि दीक्षितः पूर्वं ज्येष्ठस्स
तु कुलागमे ॥ द्विजोपि दीक्षितः पश्चादन्त्यजः पूर्वदीक्षितः ॥ द्विजः कनिष्ठः सज्येष्ठ इति शास्त्रविनिश्चयः ॥ यावन्न चलते दृष्टिर्या
वन्न चलते मनः ॥ तावत्पानं प्रकुर्वीत पशुपानमतः परं ॥ तथा च यौवनोल्लासपर्यन्तमेव पानं न कर्त्तव्यमिति भावः ॥ इद
न्तु पूर्णाभिषेकरहितानामभिषिक्तानान्तु सप्तापुल्लासा विहिताः ॥ तथाहि तन्त्रैव ॥ पूर्णाभिषेकमुक्तानां पानन्देवि निग
द्यते ॥ कराभ्यां पानतुष्ट्यन्तः स्मरन्मूलञ्च पादुकां ॥ आगतानन्तं पिबेन्मद्यं समुक्तेनात्र संशयः ॥ पीत्वा पीत्वा पुनः पीत्वा याव
त्पतति भूतले ॥ उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ॥ आनन्दात्तृप्यते देवी मूर्छया भैरवः स्वयं ॥ वमनात्सर्वदेवा
स्तु तस्मात्त्रितयमाचरेत् ॥ कुलामृतेन संस्तानि कुलाचारेषु यं पीत्वा सतलन्मुडः ॥ भूमौ पतन्ति तस्याङ्गोलग्नानि यदि रेण
वः ॥ तावत्कालं रेणुसंख्य ब्रह्मलोके समोदते ॥ तथा ॥ पीत्वा पीत्वा जपित्वा च मुक्तः कोटिकुलैस्सह ॥ ब्रह्मलोके वसेद्विस
त्यसत्यं न संशयः ॥ न चैव वाप्तिमाप्नोति न पुनः प्रपतेदिह ॥ पीत्वा च पुजयित्वेशामीशान्त्वं लभते ध्रुवं ॥ न चैव लयमाप्नोति
पुनर्नैव निवर्त्तत इति ॥ इदन्तु कौलिकानामावश्यकं ॥ तदुक्तं हरगौरीसम्वादे ॥ निवेदितं त्वयं हृद्यं भोक्तव्यं चावधानतः
तन्नैवेद्यं त्यजन्ते मोहाद् भोक्तुं नृत्यन्ति देवताः ॥ ॥ अथ पञ्चमयागः ॥ कुमारीतन्त्रे ॥ नमस्तुत्वा नमस्कृत्य कुर्यात्सम्भोगमे
लनं ॥ देवतायेनु सम्भोगे देवताप्रीणनं भवेत् ॥ तथा ॥ नटीकापालिनी वेश्या रजकी नापिताङ्गना ॥ ब्राह्मणी शूद्रकन्या

128

॥ राम ॥
॥ १२० ॥

२८

चनथागोपालकन्यका ॥ मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः ॥ एतासु काश्चिदानीय ततस्त्र्योनिमण्डले ॥ पूजयि-
त्वा महादेवीं ततो मैथुनमाचरेत् ॥ देवीयामले ॥ अथ पूजाफलं वक्ष्ये उत्तरोत्तरतो वरं ॥ स्वशक्त्याश्चयुतं पुण्यं परशक्ति-
प्रपूजने ॥ ततो वेश्याधिका ज्ञेया रजकी च ततोधिका ॥ रजकाः क्षुरकी श्रेष्ठा क्षुरक्याश्चर्म्मकारिणी ॥ ततोधिकतरा
प्रोक्ता हेतुनारीवरानने ॥ ततो ग्यन्त्रजसंभूता चाण्डाली च ततोधिका ॥ ततो मातङ्गिनी श्रेष्ठा मातङ्ग्याः पुष्कसी तथा
पुष्कस्याः श्वपचा श्रेष्ठा ततो ऽतिसुन्दरी स्मृता ॥ सुन्दर्याश्च ततः प्रोक्ता प्रीतिमत्यनुरागिणी ॥ ततः परापरमेशानि उत्तमा शु-
भलक्षणा ॥ समयाचारसंपन्ना मत्तशाभयवर्ज्जिता ॥ विश्वासाच प्रसन्ना च धैर्यस्थानच्च संयुता ॥ एवंगुणासमायुक्ताः
पूजयेत्सर्व्वयोषितः ॥ आत्मीयाश्च पराश्चैव शक्तिमात्रं महेश्वरि ॥ मन्त्राधिदेवतां बुध्या पूजा सर्व्वोपचारकैः ॥ विविधैः
फलताम्बूलैर्वस्त्रालंकारहेमभिः ॥ संपूज्य विधिवद्भक्त्या वज्र हेतुं प्रदापयेत् ॥ संभोगवासनां धृत्वा यः कुर्याच्छक्तिपू-
जनं ॥ सर्वविघ्नमवाप्नोति नारकी च भवेद्ध्रुवं ॥ वीरचूडामणावपि ॥ शान्तीयपुवतीं रम्यां कुलकर्म्मविशालिनीं ॥ यो-
डशाब्देनयुवतीं पीनोन्नतपयोधरां ॥ उन्मत्तां जन्ममानन्तां मदाघूर्णितलोचनां ॥ सैणशावकनेत्राभा शारङ्गीं मृदुहा-
सिनीं ॥ क्रोधलोभदयादंभमोहमायाविवर्ज्जितां ॥ स्वामिधर्म्मरतां सत्यवादिनीं च सदा शुचिं ॥ गणिकां नटीं चाण्डा-
लीं जीवनीं ज्ञारजां तथवा ॥ योगमुद्राधरांगायीं चर्म्मरीं च विचित्रिणीं ॥ चतुर्वर्णसमायुक्ता उत्तमा यत्नतो ऽर्चवा ॥ वामभागे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समालिखत्त्रिकोणं पद्मवर्तुलं ॥ श्वेतरक्तसमायुक्तं नीलं सिन्दूरचर्चितं ॥ साधकः प्राङ्मुखो भूत्वा देवीं सम्मुखां यजे
त् ॥ पीठशक्तिविधानेन नवशक्तिं प्रपूजयेत् ॥ रतिः प्रीतिः प्रिया कान्तिः कामिनी काममालिनी ॥ कन्दर्पदलिनी उन्मा
भाविनी नवशक्तयः ॥ वियद्भृगुं समुच्चार्य मनुबिन्दुकलान्वितं ॥ मनुनानेन पदं पश्चाद्धृदयान्तमिदं मनुः ॥ मूलमन्त्रं
समुच्चार्य स-ध्यानाविर्णीय दं ॥ एह्येहि च पदं पश्चात्पादुकाभ्यां पुनः पुनः ॥ गृहीत्वा वामहस्तेन आसने चोपवेशये
त् ॥ रक्तचन्दनलिप्ताङ्गीं रक्तपुष्पविभूषितां ॥ सर्वालङ्कारसंयुक्तां विवस्त्रां पूजयेत्प्रिये ॥ वारुणीमदमत्तां च स
वभावसमाहतां ॥ यावदाकण्ठपर्यन्तं तावत्पानं प्रदापयेत् ॥ ध्यानं कुर्यान्महेशानि गजकर्णमकराननं ॥ नासाचूड
शिखाकारं गजवक्त्रसमप्रभं ॥ तत्रस्थां चिन्तयेद्देवीं त्रिपुरां भुवनमोहिनीं ॥ तारमेव हृदयाग्रे च यन्त्रान्मदनमन्दिरं ॥ च
तुर्थं नेत्रयजे देवि भगे पुष्पं विनिक्षिपेत् ॥ प्रक्षाल्य कुलद्रव्येण गन्धपुष्पैः समर्चयेत् ॥ धूपदीपादिकं कृत्वा पश्चादाव
रणां यजेत् ॥ इच्छाज्ञानाक्रिया पश्चाद्वामा ज्येष्ठा च रौद्रिका ॥ रतिः प्रीतिस्तथा कामं पुष्पबाणधनुर्धरं ॥ वसन्तं पूजये
त्पश्चात्पद्माङ्कुरसमन्वितं ॥ विकरं पूजयेद्देवि अञ्जलिस्पन्दसमन्वितं ॥ विदग्धं पूजयेन्नाभौ हृदये च हरं हरिं ॥ स
नेवक्त्रे महेशानि त्रिमूर्तिं पूजयेत्ततः ॥ कामेश्वरी च वज्रेश्वरी पराभगमालिनी ॥ ऊर्ध्वे मूले महेशानि पञ्चबाणान् प्र
पूजयेत् ॥ जमाद्यां जादिरणीं मूर्ध्नि श्रीमायां क्षोभिणीं पदे ॥ ह्लीं वशीकरिणीं वक्त्रे गुह्ये ब्लूं बीजपूर्विकां ॥ आकर्षिणीं हृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिपुनःसर्गान्नभृगसंस्तुतां ॥ संमोहिनीं क्रमादेवं वाणं पूजेयमीरितां ॥ कर्मयोः पूजयेच्चक्रे भातुं चन्द्रं क्रमेण च ॥ रसना
याम्वह्निसंपूज्य मेत्रे नक्षत्रमालिनीं ॥ प्राणसंपूजयेद् घ्राणेभ्राजायां त्रिपथगामिनीं ॥ त्वक्षोभ्यं पूजयेन्मूर्द्ध्नि गन्धपुष्पो
पचारकैः ॥ पुष्पमालां गले दद्याद् धूपं समाजयेद्बुधः ॥ ज्ञानार्णवेन ॥ मन्त्रकं गजदन्तस्य ईमरुप्यादिनिर्मितं ॥ विभुष
क्षोमरविनं तन्त्रलिकानत्रयोजयेत् ॥ पुष्पांश्चाकीर्यामध्ये तु कर्पूरं रसरजस्तथा ॥ मणुकादीस्तत्र देवी उपर्युपरि शेतजे ॥
मरादुकं पूजयेत् पादौ रुद्रकालाग्निसन्निभं ॥ आधारशक्तिं कूर्मञ्च तथानन्तं वराहकं ॥ पृथिवीञ्च तथा कन्दं नालं पद्मं
लं तथा ॥ केसरालीञ्च संपूज्य कर्णिकां पूजयेत्ततः ॥ मन्त्रकञ्च समभ्यर्च्य तत्र पादचतुष्टये ॥ धर्मं ज्ञानञ्च वैराग्यमैश्व
र्यञ्च क्रमाद्यजेत् ॥ अपूर्वादून् पूजयेद्देतान् समन्यानां समीपके ॥ आत्मानं त्वन्तरात्मानं परमज्ञानात्मानः प्रपूजयेत् ॥ मन्त्रकाग्रे
पुमपूज्य गुणत्रयं तथाश्चयेत् ॥ इतीं सुलक्षणारम्यां सर्वलक्षणलक्षितां ॥ नानालङ्का रसुभगां सुवर्णाभरणामव
पूजयेत्स्मरमेशानि यन्त्रकाममारैस्तथा ॥ वटुकादींश्च तु दिक्षु पूजयेत् सिद्धिहेतवे ॥ मातृकाश्चि न्यसेत्तस्या देहेकामश
राण्वितां ॥ त्रिकोणां विन्यसेन्मूर्द्ध्नि तत्र पूजां यजेत् क्रमात् ॥ त्रिकोणमध्ये बालाख्या कामेशीं परि पूजयेत् ॥ गणेशाश्च कुला
ध्यक्षं तथा लक्ष्मीं सरस्वतीं ॥ त्रिकोणेषु च संपूज्य वसन्तं मदनं प्रिये ॥ स्तनयोः पूजयेत्साश्चानन्दपुरवेन स्याः कलाधर ॥ वा
ग्भवं कामराजञ्च स्त्रीबीजं कामराजकं ॥ हसद्वै मातृकन्दत्वाआधारशक्तिमुच्चरेत् ॥ श्रीपादुकांन्नतो दत्वा पूजयामि वदेत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ता॰भ
१२२

नः॥ अनेन मनुना तस्या ललाटे तु मनोहरं॥ त्रिकोणं तत्र संलिख्य सिन्दूरेणैव शोभनं॥ वटुकं योगिनीश्चैव क्षेत्रपालं ग-
णेश्वरं॥ लक्ष्मीं सरस्वतीश्चैव पूजयेत्तत्र सुन्दरि॥ कामबीजं समुच्चार्य कामराजं ततः परं॥ श्रीपादुकां ततो दत्वा पूजया-
मि वदेत्ततः॥ दक्षपादतले देवि पूजयेन्मनुनामुना॥ वं वसन्तं समुच्चार्य्य नादहीमारमानतः॥ पादुकां पूजयामीति तस्या
वामकरे न्यसेत्॥ शक्तिबीजं समुच्चार्य सोमपादयदन्ततः॥ श्रीपादुकां ततो दत्वा पूजयामि स्तनद्वये॥ आरोहक्रमतः काम-
कला न्यासं चरेत्सुधीः॥ अश्वाशीति रतिश्चैव धृतिः शान्तिर्मनोहरा॥ मनोरमा मनोरामा मदनोन्मादिनीति च॥ मोहि-
नी दीपिनी चैव शोषिणी च वशङ्करी॥ रञ्जनी सुभगा देवि षोडशी प्रियदर्शना॥ अकारादिस्वरैर्व्याः कला। कुसुमधन्व-
नः॥ पूषार्य्यमा सुमनसा रतिः प्रीतिस्तथा धृतिः॥ ऋद्धिः सोम्या मरीचिश्च दशमी चांशुमालिनी॥ अङ्गिरा वशिनी चैव छा-
या संपूर्णमण्डला॥ पुष्टिश्चैवामृता चेति कला सोमस्य षोडश॥ अकारादिस्वरयुताः पूजनीया मनीषिभिः॥ दक्षपादादि मू-
र्द्धान्तं वामे मूर्द्धादि सुन्दरि॥ पदान्तं पूजयेत्सर्वाः कला वै कामसोमयोः॥ [illegible]॥ पूषवंशात्समारभ्य शिरोन्तं कामचाप-
कं॥ विन्यस्य विधिवन्मन्त्री पूजयेत्तत्तु मूर्द्धनि॥ धमात्मकं समुच्चार्य्य कामचापपदन्ततः॥ पादश्रीपादुकां दत्वा पूजयामी-
ति पूजयेत्॥ बूमात्मकं समुच्चार्य सन्धायनपदन्ततः॥ वाणपादपदन्दत्वा श्रीपादुकान्ततो वदेत्॥ पूजयामीति संपूज्य
शेषवाणं समुच्चरेत्॥ शोषणं च समालिख्य वाणपादपदन्ततः॥ श्रीपादुकां ततो दत्वा पूजयामीति पूजयेत्॥ ललाटत-

130

राम
१२२

२६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राड्ले पश्चात्त्रिकोणां पूजयेन्नमः॥ वाग्भवं मध्यादस्त्रश्रीपादुकान्नमो वदेत्॥ पूजयामि नमो दत्वा दक्षरेखासु पूजयेत्॥
डीमात्मकं मन्त्र ब्राह्म्यां भगपाद पदन्नमः॥ श्रीपादुकान्नमो दत्वा पूजयामीति पश्चिमे॥ कामबीजं समुच्चार्य भगसर्पिःपदन्नमः॥ श्री
पादश्री पदन्दत्वा पादुकाञ्च नमो वदेत्॥ पूजयामीति चोच्चार्य पूजये वाम यार्श्वके॥ ह्रौं रात्मक मालिख्य भगावह्य पदन्नमः॥ पादश्री
पादुकान्दत्वा पूजयेन्मध्यदेशतः॥ श्रीउड्डीयाय पदन्दत्वा देवीमुड्डीश्वरीन्नम॥ श्रीपदञ्च समालिख्य जालन्धराय पदन्नमः॥ महापी
ठे समालिख्य नादहीनार मानमः॥ जालेश्वरीय दत्वा देवी जालीं यमालिखेत्॥ नाथदेवय दन्दत्वाश्री जालामय पदं नमः॥ श्रीपूर्णी
ज्ञाय पदन्दत्वा नाथदेवय दन्नमः॥ पादश्री पादुकान्दत्वा पूजयामीति पूजयेत्॥ अनेन मनुना देवी पूजयेच्चाभिमण्डले॥ श्रीय दञ्च
नमो दत्वा पूर्णेश्वरीञ्च देन्नमः॥ देवी श्री पादश्री पूर्णनाथ देव पदन्न था॥ श्री चामुण्डा पदमाभाष्य देवी श्री यद मालिखेत्॥ उड्डी
शनाथ मालिख्य देव पाद पदन्नमः॥ श्री पादुकान्नमो दत्वा कामेश्वरीय दन्नमः॥ देवी श्री यदमाभाष्य कामेश्वरानन्दनाथ च॥ श्री
महायदमाभाष्य तुष्टाम्बा श्रीय दन्नमः॥ मित्रीश नाथमाभाष्य पादश्री पादुकान्नमः॥ पूजयामि नमो दत्वा पूजयेत्काममासमा
ने॥ गुह्यपीठस्य वामे तु गुरुपंक्तिं यजेत्सुधीः॥ अनन्ता कुसुमघे न हत्स रोजे यजेत्सुनः॥ वाग्भवं ब्लौं समुच्चार्य ब्लीमात्मकम्बदे
न्नमः॥ ब्लां ब्लूं ब्लूंः समुच्चार्य मन्त्रेणानेन साधक॥ योनिमुद्रां प्रदर्शाथ योनो क्षोभं विचिन्तयेत्॥ वाग्भवं कामराजञ्च स्त्रीबी
जं तदनन्तरं॥ क्षोभणीनाम विख्येयं स्तनयोः क्षोभमाचरेत्॥ योनिमुद्रां प्रदर्शाथ शाने देवहि साधकः॥ वाग्भवं स्फूं समु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ता॰भ ॥
॥१२२॥

त्वार्यं ह्रैं ह्रीं ह्रूंः ततो वदेत् ॥ क्लीं मात्मकं समुच्चार्य क्रीमात्मकं समुच्चरेत् ॥ ⁻मात्मकं ततो दत्वा तस्याः क्षोभं विचिन्तयेत् ॥ ग्र
थिनी नाम विधेयं चिन्तयेद्योनिमध्यगः ॥ ततः परानन्दमयो भूत्वा निर्भरमानसः ॥ चिन्तयेन्निजविद्याया बीजं मूर्द्धि सरोजके
ततस्तस्या योनिमध्ये मूलमन्त्रेश्च साधकः ॥ पुष्पाञ्जलित्रयं दत्वा ततः क्षोभं विचिन्तयेत् ॥ त्वानार्णवे ॥ इती देहकृतान्या सा
तु स्वदेहेपि चिन्तयेत् ॥ वीरचूडामणौ ॥ अथ न्यासं प्रवक्ष्यामि शिवात्मानं विभावयेत् ॥ शिवात्मानमिति शिवात्मानमित्य
र्थः ॥ तथा ॥ यद्भवक्रे महादेवं कलापुञ्जं न्यसेत्क्रमात् ॥ ईशानस्सर्वविद्यानां शशिनी प्रथमा कला ॥ ईश्वरस्सर्वभूतानां
मङ्गदा तदनन्तरं ॥ ब्रह्माधिपतिब्रह्मणो ब्रह्मणोधिपतिः पुनः ॥ ब्रह्मेष्टदशिवो मेस्तु मरीचिसंपुटं न्यसेत् ॥ सद्याशिवो
सत्तुच्चार्य अंशुमालिन्यथापरा ॥ तत्पुरुषाय विद्महे कला शान्तिविनीरिता ॥ महादेवाय धीमहि कला विद्यातपेव च ॥ तन्नो
रुद्रः पदं पश्चान्निवृत्ता कथिता कला ॥ प्रचोदयान्तमुच्चार्य निवृत्तिः स्यात्ततः परं ॥ पूर्वपश्चिमयाम्येषु उत्तरेषु यथाक्र
मात् ॥ हृदये विन्यसेद्देवि अघोरेभ्यस्तमः कलां ॥ अथ घोरेभ्यो मोहं ग्रीवायां विन्यसेत्ततः ॥ घोरान्ते स्यात् क्रिया पश्चा द
क्षिणांशे प्रविन्यसेत् ॥ नमस्ते स्तु क्षुधां पश्चात् कलां पृष्ठे न्यसेत्क्रमात् ॥ रुद्ररूपेभ्य इत्यन्ते त्वथान्त्यात्तनमोन्तकाः ॥ वामदे
वाय नमोन्ते रजा स्याद्गुह्य⁻के ॥ गुह्ये सव्ये प्रविन्यस्य रक्षां ज्येष्ठाय वै नमः ॥ रुद्राय नमो रतिं पश्चाद्वाममुष्के कला मिमां
कलायनमइत्यन्ते पालिनी ऊरुदक्षिणे ॥ कलकामाचदेवे शिवा मे विकरणाय च ॥ नमः पदं समुच्चार्य संयमनी त्वक्ष

॥ राम ॥
॥१२३॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जानुनि॥ वलक्रियासमादिष्टा वामे विकरणाय च॥ नमोन्ते हृदि मन्त्रार्थं दक्षिणे स्फिचि विन्यसेत्॥ वलप्रमथनाय नाम्ने
रात्रिं वामे प्र विन्यसेत्॥ सर्वभूतदमनाय नमोऽन्ते बालणी कला॥ कटिदेशे प्रविन्यसन् नाम्ने मोहिनीऽकला॥ दक्षिणे पा(
र्श्वके न्यस्य उन्मनाय नमो ज्वरा॥ पादयोः स्तननासा तु मूर्द्धि वाऽयुगे न्यसेत्॥ सद्योजातो भवास्य गस्थो मन्त्री कलाः क्रमात्॥ स
द्योजातं प्रपद्यामि सिद्धिः स्यान् प्रथमा कला॥ सद्योजाताय न्वै भूयो नमः स्यादृद्धिरीरिना॥ भवे युति स्मृतीयास्याद् भवे नदनन्त
रं॥ लक्ष्मीश्चतुर्थी कथिता नानो नानि भवे पदं॥ मेधाख्या पञ्चमी प्रोक्ता कला भूयो भवस्व मां॥ प्रज्ञासमीरिता यष्ठी भवान्ते
स्यान् प्रभा कला॥ उद्भवाय नमः पश्चान् सुधा स्याद् यष्ठमी कला॥ प्रणावाद्याश्चतुर्थ्यन्तान मोन्ताश्च प्रविन्यसेत्॥ एवं न्यासविधिं
कृत्वा स्वयं शैवं विभावयेत्॥ पञ्चाक्षरं पुरस्कृत्य रुद्र ध्यानपरायणः॥ सामरस्यमयं कृत्वा रक्षार्थं कवचं पठेत्॥ वध्वा
तु क्षोभिनीं मुद्रां यन्त्रमध्ये विनिःक्षिपेत्॥ भगं कुण्डं ध्रुवो लिङ्गमात्म्यं ध्येव तु वीर्यकं॥ सर्वतत्त्वमयं चार्यं सरस्वं जप
मात्वरेत्॥ ज्ञानार्णवे तु॥ धूपादिकं समर्प्याथ स्वलिङ्गे तदनन्तरं॥ नारं च भुवनेशानीमथ त्रिपुरसुन्दरी॥ नमः शिवा
य विद्येयं दशार्णा परिकीर्त्तिता॥ अनया विद्यया देवि स्वलिङ्गं पूजयेच्छिवे॥ मथ त्रिपुरसुन्दरीं त्रिकूटां मिमका विद्या॥
यजेत तत्पुरुषाघोर सद्योवामेय संज्ञकान्॥ निवृत्तिश्च प्रतिष्ठाश्च विद्याशान्तिन्तथैव च॥ शान्त्यतीताश्च संपूज्य षडङ्गा
वरणां यजेत्॥ समस्तविद्या तत्त्वार्थं नन्दिकेशं प्रपूजयेत्॥ मेधे वृषगणायोर्द्ध विगन्धपुष्पासनादिभिः॥ निवेद्य पुष्पधूपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिशिजितेन्द्रियमानसः॥ सर्वसंक्षोभणां मुद्रां वध्वा योनिं प्रचालयेत्॥ क्षोभिणाप च थवा देविजगत्त्रयं खयाथवा॥ उच्च
रन् भगमालाख्यां ज्ञा दिशी वीजमुच्चरन्॥ अधुच्च स्मन्वयरो हेयावडेनः प्रवर्त्तने॥ भगमालामन्त्रसुत्तवैव॥ वाग्भवं भ
गशब्दान्ते भगे भगिनि चालिखेत्॥ भगोदरि भगान्ते तु भगमाले भगावहे॥ भगगुह्ये भगशब्दान्ते योनि शब्दान्ते भगान्तके॥ नि
पातिनि च सर्वान्ते न ते भगवशंकरि॥ भगरूपे नतो लेख्यं नीरजायतलोचने॥ नित्यक्लिन्ने भगशब्दान्ते स्वरूपे सर्वचालिखे
त्॥ भगानि मे ह्यानय मे न्ते वरदे च समालिखेत्॥ रेते स्वरेते भगवत्क्लिन्ने क्लिन्नद्रवे ततः॥ क्लेदय द्रावय चाथ सर्वसत्वान् भ
गेश्वरि॥ अमोघे भगविच्चे च क्षुभः क्षोभय सर्वच॥ सत्वान् भगेश्वरि ऐं वाग्भवं ब्लूं जमादिकं॥ भें ब्लूं मों ब्लूं च हें क्लिन्ने च त
तः परं॥ सर्वाणि च भगान्यन्ते मे वशमानयेति च॥ स्त्रीवीजञ्च हरशब्दान्ते वले मान्मकमक्षरं॥ भुवनेशीं समालिख्य विद्येयं
भगमालिनी॥ वीरतन्त्रे॥ धर्माधर्म हविर्दीप्ते आत्माग्नौ मनसा स्रुचा॥ सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं॥ स्वाहान्तो
यं महामन्त्र आर्य्यपारकीर्त्तितः॥ न तो जपेत्॥ प्रियाश्चाद्यन् स्वियं त्रिभुवनेश्वरीं॥ कुलार्णवे॥ स्वाहान्तो होममन्त्रोयं प्र
तिषानारुतिं प्रिये॥ पूर्णाहुतिं दनान्ते च जुहुयान्मनुनामुना॥ प्रकाशाकाशहस्ताभ्याम वलंव्योन्मनीस्रुचा॥ धर्माधर्म
कलास्नेहं पूर्णवह्नौ जुहोम्यहं॥ स्वाहान्तोयं भवेन्मन्त्रो यो रयानकमुक्तिदः॥ वीरतन्त्रे॥ स्वाहान्तोयं महामन्त्रमुक्त मागेष
कीर्त्तितः॥ यदि वा दीक्षिता शक्तिर्वृवतिन दाशक न तुष्टिमपि कुर्यात्॥ नन्दकं कुलतन्त्रे॥ अभिषेकाज्जवेत्तु स्विमन्त्रस्यो

132

च्चारणाद्गुरौ ॥ रतिकालेन देवेशि निर्दीक्षाकालेव कन्यका ॥ भ्रष्टाचीनिशेषः ॥ स्वदारेतस्या वा पि जलेन मनुनामुना ॥ पामहेपि
अदीक्षितानु याशक्तिस्सैव भ्रष्टा भवेत्सदा ॥ अदीक्षितानु याशक्तिर्म्माया नस्यै निवेदयेत् ॥ मानसी न च्चे भुक्तं ॥ दीक्षामात्रेण(
भुवन्निस्त्रियस्सर्वेत्र कर्म्मणि ॥ कुलामृतदीपिकायां ॥ अदीक्षितकुलास्यज्ञात् सिद्धिहानिः प्रजायते ॥ तथा ॥ आपैवातांसमुच्चा
र्य्य त्रिपुरायै समुच्चरेत् ॥ नमःशब्दं समुच्चार्य्य इमां शक्तिन्नलोवदेत् ॥ पवित्रीकुरुष्वाद्य ने मम शक्तिं कुरु प्रिये ॥ वह्निजायां समुच्चा
र्य्य शुद्धिमन्त्रः प्रकीर्त्तितः ॥ अनेन विधिना देवि अभिषिक्ताः स्त्रियः सदा ॥ रममाणो न्त्रसन्नित्यं सर्व्वसिद्धिमवाप्नुयात् ॥ तथा ॥ वी
त्वालिङ्गपकुलाचारेष्वमदंयौवनान्वितां ॥ कोटिजन्मार्ज्जितं पापं नन्लक्षणाद्देवनाशयेत् ॥ एनेन च इति संस्कारश्च धंस्यायनास्त्र
कुण्डगोलोद्भवार्थमनाच्चरणायक्षे ॥ तदर्थं नत्राचरणायक्षेतु धर्म्माधर्म्म हविर्द्दीप्त इत्यादिमन्त्राभ्यां निधुवनमात्रं ॥ इयांसु(
विशेषः यदत्र निधूवनात्नमेव कर्म्म तत्रतु ॥ अर्घपक्षेप्यर्थं देवादितर्प्पणार्थं च निधुवनान्तेद्रव्यग्रहणमपि ॥ तदुक्तं ज्ञाना
र्णवे ॥ संस्कारो मन्त्ररूपस्तु वचनं स्रवणं भवेत् ॥ आलिङ्गनन्तु कस्तूरीकर्पूरघुसृणादिकं ॥ मथनं तर्प्पणं विद्धि वीर्य्यपानं वि
सर्ज्जनं ॥ दशाङ्गश्रेणसंशोध्य शिवशक्तिमयं प्रिये ॥ वीजामृतं परं ब्रह्मस्वरूपं विसिय सुन्दरि ॥ अर्घपात्रामृते युक्तो निर्दिष्टकल्पः
सदानघः ॥ श्रीविद्याक्रममभ्यर्च्यापरं ब्रह्मसमो भवेत् ॥ कौले ॥ आलिङ्गनं तु मनश्चलनयोर्म्मर्दनं शनैः ॥ दर्शनं स्पर्शनं यो
निर्द्धिकारोति ज्ञाघर्षणं ॥ प्रवेशश्चालनं शक्तेर्निवपुर्येश्च पूजनं ॥ ब्रह्मयामले ॥ नदमात्रं तु मननं यस्तु दारिद्रो जायते ध्रुवं ॥ अ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिङ्गानम्विना देवि कुर्वन्भवति पार्व्वति ॥ विना दन्तक्षतै र्देवि लोके भवति निन्दितः ॥ तथा ॥ आलिङ्गाने हरेद्रोगान् धनधान्यादि वर्द्ध
ते ॥ नखदन्तक्षताद्येश्च नरा मोक्षः प्रजायते ॥ सायुज्यं सन्नामेन तस्मात्तन्यमेव न संशयः ॥ गौडे ॥ नदन्ता स्पर्शनात्सौख्यं संयोगाम्ब
नलक्षणं ॥ महाकाम कलां ध्यायेत्सं योगामृत रूपिणी ॥ संयोगाज्जायते सौख्यं परमानन्द लक्षणं ॥ कुलद्रव्यामृतं यत्ना मृद्धी
या दुर्ल्लभन्नरः ॥ कुण्डगोलग्रहणाद्युकारस्तु कुलामृते ॥ भावयेत्कामभावेन आत्मनस्तं न चोत्सृजेत् ॥ श्रुरुमन्त्रौषधे नैवये
ते सु मथनञ्चरेत् ॥ मथ्यमाने च तस्या हि जायते तत्व मुत्तमं ॥ मृडीयाताल्वतुत्तमं ॥ मृडीयात्तन्मयत्नेन दृष्टं कुण्डोद्भवं शुभं ॥ बु
लपामले ॥ तेनामृतेन दिव्येन त्रिपुरात्तर्पयेत्सदा ॥ सान्निध्यात्तत्क्षणाद्यापि श्रीतासिद्धिं प्रयच्छति ॥ समस्तदेवतानाञ्चतर्प
णाञ्च सदामृतैः ॥ गुरूणां साधकानाञ्च सर्व्वेषां तर्पणं चरेत् ॥ तेनामृतेन दिव्येन सर्व्वे तुष्टा भवन्ति च ॥ यत्कामं कुरुते मन्त्री
तत्क्षणादेव सिध्यति ॥ कुलामृतं समादाय नचार्घं निःक्षिपेत् बुधः ॥ ततः सोमकलाः पूज्याः साधकैर्न्निर्म्मलाशनैः ॥ कौले ॥ मधु
भाण्डसहस्रैस्तु मांसभारशतैरपि ॥ नैव तुष्टा भवेद्देवि भगलिङ्गामृतादृते ॥ देवीयामले ॥ इतीयागविधिम्वक्ष्ये कौलधर्म्मो
त्तमोत्तमं ॥ तस्यानुष्ठानमात्रेण साधकस्तत्वमाप्नुयात् ॥ तथा ॥ तृतीयागे कृते मन्त्री सर्व्वज्ञो जायते ध्रुवं ॥ न तस्य पुनरावृत्तिक
ल्पकोटिशतैरपि ॥ यैः कृतं यजनं दुष्टमासे रिसाः कनवाउखिला ॥ सर्व्वतीर्थमयः श्रेष्ठः सर्व्वदेवमयो भवेत् ॥ पुरश्चर्यादि
सकलं कृतं तेन न संशयः ॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ आसमुद्रा च धरणी दत्ता तेन सदक्षिणा ॥ मेरुम

133

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्दरतुल्या निःशुवर्ण्णा स्पर्द्धिनानिवै ॥ गोकोटिदानाद्यत्पुण्यं तत्पुण्यं जायते प्रिये ॥ तस्मात्सर्व्वप्रयत्नेन इत्रीयागं समाचरेत्
पूजासंपूर्णदं भद्रे सर्वारिष्टप्रणाशकं ॥ योनिपूजां विना पूजाकृतं न मण्यक्षं न भवेत् ॥ आयुरारोग्यविभवानमितान् लभेन्न-
रः ॥ अनेनैव विधानेन विद्यार्थी निर्विघ्नो भवेत् ॥ पुत्रार्थी लभते पुत्रं धनार्थी लभते धनं ॥ मातङ्गी वा कृतमभ्यर्च्य तपासाकं
समर्च्चयेत् ॥ मातङ्गी मन्मथो येन संसर्वकामार्थसिद्धये ॥ शक्त्यासाकं सदा पूज्या मातङ्गी मम च देवता ॥ सा देवी शक्तिहीनानु
न ददाति मनोरथं ॥ ब्रह्मयामले ॥ नारद उवाच ॥ सर्वज्ञ जगन्नाथ शाक्तश्चेत् प्रश्न निवेदितं ॥ मातङ्गीपूजनं तत्र कथं मु
क्तिप्रदायकं ॥ सर्वेनेषधिना वेमणा वेश्यासां तु रजस्वला ॥ रजस्वला च मातङ्गीं सा इत्री सर्वमङ्गला ॥ इति श्रेक्रमत्वया पृष्टं मि
सनीत्तद्विपर्य्ययः ॥ तव वाक्यमभूद्ब्रह्मन्सत्वेन वदपितामह ॥ ब्रह्मोवाच ॥ माकुरुष्वात्रसन्देहं वेदोक्तं शास्त्रकं तु तं ॥ अभिसर्वज्ञ
कल्पो सौ मातङ्गो मुनिसत्तमः ॥ वर्षाणामयुतं वत्स तपउग्रं चचार ह ॥ तेन तस्य नाम सा देवी देवानां हितकारिणी ॥ वरं हृणीष्व भग
वन् दास्यामि तव वाञ्छितं ॥ न ब्रुवन्द्विजवर्यस्त्वां यया चेद्धर्मसाधनं ॥ हे देवि जगतां मातः प्रीता चेद्यदि सांप्रतं ॥ अपत्यतां
समासाद्य मत्कुलालम्बनं कुरु ॥ इत्यभ्यर्थ्य मुनिश्रेष्ठो जनयामास तां सुतां ॥ श्यामलांचारुवदनां वीणापुस्तकसमन्वितां ॥
सारिकां ज्ञानसमन्नां जपमालां कराम्बुजे ॥ धारयन्तीं विशालाक्षीं शञ्जनाङ्घ्रिशोभिनीं ॥ सावभूव महादेवी मतङ्गाकुल
नन्दिनी ॥ मातङ्गी नित्यदा देवि विश्वानावख्यायिनी ॥ नाम्नि लोक्यतया शंभुर्ईनी श्वकेस्वलक्षणां ॥ त्रिपुरं जेतुकामेनयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निपूजा तदा कृता ॥ प्रत्यालीढस्तथा देवि पूजां स्वीकृत्य निश्चला ॥ तदा हृष्टरजो भूत्वा तां नाम्ना वै शंकरः प्रियां ॥ तदा प्रभृति संजाते
तृतीयागो मनोहरः ॥ प्रणयेन तदा शास्तुस्तया सार्द्धं रतं भजेत् ॥ प्रणवान्तर्गतं मन्त्रं मानन्त्या स्वं विनिर्गतं ॥ सर्व्वसौभाग्य
जननं मालामन्त्रं भन्तदा ॥ एवं वापि पदं दिव्यं ज्ञानं नृपं लोकरंजनं ॥ मातङ्गीमन्त्रमन्त्रार्थं मन्मथप्रतिपादकं ॥ आय
त्तश्चतास्य देवी तस्मात्त्वया नन्दनन्दजा ॥ मातङ्गी अत्र वर्णस्थानतया साक्षान्त्यजा भवेत् ॥ अन्त्यजानां द्विजानां च चक्रे एकं
प्रशस्यते ॥ सा देवी सर्व्ववर्णानां वरदत्वा निरुत्तरं ॥ कृत्वा सङ्केतसमयं वकं मातङ्गागुत्तमं ॥ तदोषः सर्व्ववर्णानामि
दन्दत्वा वरं तदा ॥ तदोषतत्त्वविज्ञेयं सर्व्वतेश्रुतिनोदितं ॥ देवी उच्छिष्टमोक्षार्थं कृतं यद्दोषवर्ज्जितं ॥ एतच्छास्त्रमिद
न्दिव्यं न वाक्यं श्रुतिचोदितं ॥ अन्तर्यागमिदं ज्ञेयं बहिर्यागश्च वैदिकं ॥ मन्त्रतन्त्रसमायुक्तं तद्यं ब्रह्मबोधकं ॥ च
कसङ्केतसमयं सर्व्वतुभ्यं प्रकाशितं ॥ गोपनीयं प्रयत्नेन तव वाच्यं प्रभुसन्निधौ ॥ तत्र शङ्का महाभाग सम्यते त
न्त्रयोदितं ॥ मातङ्गीपूजनं श्रेष्ठं तृतीयागे मनोहरं ॥ तृतीयागादेतुविशाणान्नाधिकारः ॥ तदुक्तं बृहत्कौलकमसंहिता
यां ॥ वामागमोघ्रिविप्रस्तु मद्यमांसेन भक्षयेत् ॥ स्वकीयां परकीयां वा नाकृष्य ब्रा समाणो यजेत् ॥ इति ॥ अगस्त्यसंहि
तायामपि गौरीं प्रतिशिववाक्यं ॥ आवाभ्यां पिशितं रक्तं सुरापश्च पितु रेश्वरि ॥ वर्णाश्रमोचितं धर्ममविचार्यार्पय
न्तिये ॥ भूतप्रेतपिशाचास्ते भवन्ति ब्रह्मराक्षसाः ॥ रक्तमार्त्तवं ॥ इदमपि ब्राह्मणायरमेव ॥ अन्यथा तद्विधायकवचन

134

33

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नां निर्विषयत्वापत्तेः ब्राह्मणोत्तराणामपि योगिनामेव तृतीयाश्रमेऽधिकारः ॥ तदुक्तं सिद्धिनाथसंहितायां ॥ अद्वैतज्ञाननि
ष्ठो यो योसौ संसारपारगः ॥ सत्त्वयजने हृत्यानाधिकारी परो भवेदिति ॥ ननु कूर्म्मपुराणगोदावरीखण्डसूतसंहि
तादौ गोनमश्राम्रब्राह्मणाख्यामोह्ययनन्त्वेरितशिवपूर्णीतान्येतानितन्त्राणीतिप्रतिपादनात् कथमागमानां प्रामाण्यं ॥
अथ तु सिंहगमगोपालतापिन्यादिप्रत्यक्षश्रुतिमूलकत्वेन तेषां प्रामाण्यमास्तेय निति चेत् ॥ न प्रत्यक्षश्रुतिमूलका
नां तथात्वेऽपि तन्न दमूलकानामप्रामाण्यादिति चेत् मैवं ॥ फलसम्बादेनायुर्वेदादिप्रामाण्येन सकलवेदप्रामाण्यव
दप्रत्यक्षश्रुतिमूलकानामपि प्रत्यक्षश्रुतिमूलकवत् ॥ प्रामाण्योपपत्तेः भारतादौ पञ्चरात्रपाशुपतादीनां प्रशंसाप्र
तिपादनात् ॥ अभावे वेदमन्त्राणां पञ्चरात्रोदितो विधिरिति वराहपुराणवचनाच्च एवमन्यच्च रेदा तत्रेति किम्मिन्नूशा
स्त्रं धर्म्माभिधायकं ॥ योन्यत्र रमते सोसौ न संभाष्यो द्विजातिभिः ॥ यानि शास्त्राणि दृश्यन्ते लोकेस्मिन् विविधानि च ॥ श्रुति
स्मृतिविरुद्धानि निष्ठा तेषां हि तामसी ॥ कापालं पञ्चरात्रञ्च यामलं वाममार्हतं ॥ एवंविधानि चान्यानि मोहनार्थानि ता
नि तु ॥ मया सृष्टानि शास्त्राणि मोहायैषां भवार्णवे ॥ इति कूर्म्मपुराणवचनानि वेदश्रुतिमात्रपराणि नत्वागमाप्रामाण्यबोध
कानि ॥ अर्थवादानां स्वार्थे प्रामाण्याभावात् भारतादिविरोधाच्च ॥ अन्यथा ॥ एवं त्रयीधर्म्ममनुप्रपन्ना गतागतं कामका
मा लभन्ते ॥ इत्यादिवचनात् सकलवेदस्यापि प्रामाण्यप्रसक्तेः वस्तुतः कापालं पञ्चरात्रं चेत्यादि कूर्म्मपुराणवचनेन वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना॰ भ ॥
॥ १२८ ॥

दामूलकत्वबोधनादीश्वरप्रणीतत्वेन वेदवत् ॥ स्वातन्त्र्येणैवागमानां प्रामाण्यं ॥ इत्थं देशावेदस्य प्रथमं प्रणापत्व ॥ प्रासाद
श्रीकरादिमन्त्रैर्वैदिकमन्त्राणामप्यन्यथानिपादनमिति ॥ नागमानामवेदोपजीवकत्वेन निरहस्यं ॥ ननु तथापि श्रुस्मृतितोक
विरुद्धानां वामागमानामप्रामाण्यमप्रलेपापि न मे वेति चेत् ॥ न न हि ऐ धर्मस्यैवाभावात् ॥ सौत्रामणीवाजपेयादौ सुराग्रहणा
स्य महाव्रते शाक्वानध्वर्य्यवः कारयन्त्येतस्मिन्नहनि प्रभृत मन्नं दद्यात् ॥ राजसूये राच धर्म्मव्याधयन्त्याग्निभीम हन्तभिं
पत्नेश्वकारादवीभूतानामश्वमेधनंत्रमूलवादिदंश्चलोः संषवादः इत्याश्वलायनशाखोक्तत्रसूत्रवादिदंश्चतीसमागमस्य छा
न्दोग्योपनिषदादौ वामदेव्योपासने परकलत्रग्रहणस्यापि प्रतिपादनात् ॥ तथा हि ॥ छान्दोग्योपनिषदि ॥ उपमन्त्र
यते स हिंकारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रति स्त्रीं सह शेते स प्रतिहारः कालं गच्छति तन्निधनं ॥ पा
रं गच्छति तन्निधनं ॥ एतद्वामदेव्यं मिथुने प्रोतं ॥ स य एतद्वामदेव्यं मिथुने प्रोतं वेद मिथुनीभवति मिथुनान्मिथुनात्
प्रजायते सर्वमायुरेति ज्योग्जीवति ॥ महान्प्रजया पशुभिर्भवति महान्कीर्त्या न काञ्चन परिहरेत्तद्व्रतं ॥ तथा योषा वा
व गौतमाग्निस्तस्या उपस्थ एव समिद्यदुपमन्त्रयते स धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गास्त
स्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति ॥ तस्या आहुतेर्गर्भः संभवति ॥ बृहदारण्यकेपि ॥ स ह प्रजापतिरीक्षाञ्चक्रे हन्तास्मै प्रतिष्ठां
कल्पयानीति स स्त्रियं ससृजे तां सृष्ट्वाध उपास्त तस्मात्स्त्रियमध उपासीत श्रीर्यैवा स एतं प्राञ्चं ग्रावाणमात्मन एव समु

135

॥ राम ॥
॥ १२८ ॥

३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दपारय्त्तेनैनामभ्यसृजत्॥ तस्य वेदिरुपस्थो लोमानि बर्हिश्चर्म्माधिषवणे समिद्धो मध्यतस्थौ मुष्कौ स यावान्ह वै वाजपे
येन यजमानस्य लोको भवति॥ तावानस्य लोको भवति य एवं विद्वानधोपहासं चरत्यासां स्त्रीणां सुकृतं वृङ्क्तेऽथ य इदमवि
द्वानधोपहासं चरत्यास्य स्त्रियः सुकृतं वृञ्जते॥ एतद्ब्रह्म वै विद्वानुद्दालक आरुणिराहैतं ह स्म वै तद्विद्वान्नाको मौद्गल्य आहै
तद्ध स्म वै तद्विद्वान्कुमारहारित आह बहवो मर्या ब्राह्मणायना निरिन्द्रिया विसुकृतोऽस्माल्लोकात्प्रयन्ति· य इदमविद्वां
सोऽधोपहासं चरन्तीति॥ एवं गोमेधाश्वमेधनरमेधादिवन्नरादिवनेरपविरोधः॥ कूर्म्मपुराणादीनाञ्च तात्पर्य्याभिव्य
क्तिरहितायानुप्रणीयमानविरुद्धार्थकानेकतन्त्रप्रणयनप्रयुक्तब्राह्मणापतारणसंपादितगोतमदत्तश्वनाकाविनत्
त्राणीयेतन्मरत्वं॥ तदुक्तं लिङ्गपुराणे॥ शिवेन देवदेवेन भक्तानां हितकाम्यया॥ वेदानृषडङ्गाउक्तमयोगशास्त्राणि सर्व
तः॥ न पश्चाद्विप्रतन्त्राद्देवदानवदुश्चरं॥ श्वभ्रैदैर्शादिसंयुक्तं गूढमप्राज्ञनिन्दितं॥ वर्णाश्रमकृतैर्द्धर्म्मैर्व्विपरीतं क्वचि
त्समं॥ शिवेन कथितं शास्त्रं धर्म्मकामार्थमुक्तये॥ शतकोटिप्रमाणेन तत्र पूजाकथं विभवितं॥ गूढमिति ज्ञानाभिव्य
क्तताद्यर्यमित्यर्थः॥ अप्राज्ञनिन्दितमितिनात्पर्यानभिज्ञनिन्दितमित्यर्थः॥ तात्पर्य्यश्च क्वचिन्नैव व्यक्तीकृतं· क्वचित्त
श्च तत्रैवोक्तं वर्णाश्रमकृतैर्द्धर्म्मैर्व्विपरीतं क्वचित्समिति॥ तेन ब्राह्मणो मदिरां दद्यात् ब्राह्मणा देवशीयतत् इति श्रीक
मे॥ वामागमापि विप्रस्तु मद्यं मांसं न भक्षयेत्॥ स्वकीयायां परकीयायां ना कथा ब्राह्मणो यजेदिति श्रीक्रमसंहितायां॥ सि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ना॰भ॥
॥१२८॥

हंवाप्यंनरन्दनारौरवंनरकंव्रजेदितितत्वान्तरेप्यङ्गीकृतनमन्यत्रापिवोध्यं ॥ एतेनस्मृतिलोकविरुद्धावपिव्यतौ ॥ वी
रसाधनादिकञ्चनकेनापिविरुद्धं ॥ अनन्तव्रतकारीरवते ॥ महाश्मशानेषुनिशाभ्रयस्याप्यतिवाहिता इतिमवाक्यं ॥ रु
षएवश्मशानेषुदेवोवसतिनिर्दहन् ॥ यजन्तेनंजनासत्त्ववीरस्थाननिषेविनः ॥ इतिमहाभारतवाक्यञ्चनत्रातिषुन्तु
हंप्रमाणमाकरयामः ॥ नचआगमैःकल्पितैस्सैस्तुजनानुद्विग्नवानकुरु ॥ माक्रगेपथयेनस्यात्स्मृतिरेकोन्तरोन्तवे
तिपद्मपुराणवचनं ॥ नदशमाणावोधकमितिवाच्य ॥ तस्यवैस्मवधर्म्मसावकत्वात् माघ्नगेपथमेत्युत्तरवकेनस्वा
गमैरितस्यानभिव्यक्तत्वात्स्यर्थकागमैरित्यर्थात्त्व ॥ अतएवहरेर्नामनक्रीयात्तस्पृष्टेत्तुलसीदलं ॥ मिन्यादिवाक्यंता
ह्यमनहमभिप्रायानुरूपंप्रकवाकरवमितिसंक्षेपः ॥ ॥ इतिमहामहोपाध्यायसद्ठक्कुरश्रीनरसिंहविरचिते
नारायमक्तिसुधार्णवेपपरस्तरङ्गः ॥ ६ ॥ अथनैमित्तिकं ॥ स्वतन्त्रतन्त्रे ॥ नित्यंनैमित्तिकंकाम्यंसापेक्ष्यंपृथक्पृथक्नः ॥
अनधाविन्नयेदितत्थंकुर्यादायमपरंपरां ॥ नीलतन्त्रे ॥ नित्याचाररतोमन्त्रीकुर्यान्नैमित्तिकार्चनं ॥ नैमित्तिकार्चन
सिद्धःकुर्यात्कामप्रमार्चविधिं ॥ कुलार्णवे ॥ कृष्णाष्टमीचतुर्दश्यावमावास्याथपूर्णिमा ॥ संक्रान्तिःपञ्चपर्वाणितेषुप्र
सपदिनेषुच ॥ स्वजन्मदिवसेनाथवाभिवासरएवच ॥ पीठोपगमनेदेविवीरस्वजनदर्शनात् ॥ देशिकागमनेपुण्य
तीर्थेदैवतदर्शने ॥ यथावत्तंयथाश्रद्धंयथादेशंयथोचितं ॥ यथाजातंयथाद्रव्यंयथापूजांसमाचरेत् ॥ नकुर्यात्कौ

॥राम॥
॥१२८॥

136

३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लिकोमेरा देवताशापमाप्नुयात् ॥ कुलचूडामणौ ॥ देवतातिथिनक्षत्रवारयोगेषु चेश्वरि ॥ सोमसूर्य्योपरागेषु मन्वादि
षुयुगादिषु ॥ पूजा कार्य्या विशेषतः ॥ अत्र देवतातिथ्यादयः कुलाख्याः स्ववने च वक्ष्यन्ते ॥ मन्मते ॥ आत्मनो जन्मदिवसे तथा
निजगुरोरपि ॥ विद्यायाः प्राप्तिदिवसे तथा व्याप्तिदिने तथा ॥ दर्शे च युगदावयने विषुवे संक्रमे तथा ॥ पूजां च महतीं कु
र्य्याद् देवतातोषहेतवे ॥ तन्त्रराजे ॥ गुरोस्तु जन्मदिवसे विद्याप्राप्तिदिने तु च ॥ स्वधर्म्मदिवसे नाथव्याप्तिवासरेष्वच
अक्षरत्रयसंपातदिने पूर्णादिने तथा ॥ पूजा कार्य्या विशेषतः ॥ नाथव्याप्ति गुरुमरणं अक्षरत्रयसंपातः ॥ युगाक्षरो
दिनाक्षरउदयाक्षराणामेकं ॥ तन्त्रसुन्दर्य्यामपि क्रमेऽपि वो क्रमनस्तथैव निमित्तं ॥ कुलचूडामणौ ॥ कुलवारे कुला
ष्टम्यां चतुर्दश्यां विशेषतः ॥ योगिनीपूजनं तत्र प्रधानं कुलपूजनं ॥ यथा विष्णुतिथौ विष्णुः पूजितो वाञ्छितप्रदः ॥ त
था कुलतिथौ दुर्गा पूजिता वाञ्छितप्रदा ॥ कुलतिथ्यादि निवारनक्षत्रयोरुपलक्षणं ॥ कुलवारादयो यामलेऽक्ताः ॥
रविश्चन्द्रो गुरुः सौरिश्चत्वारश्च कुला मताः ॥ भौमभृक्तौ कुलाख्यौ तु बुधवारः कुलाकुलः ॥ द्वितीया दशमी षष्ठी कुला कु
लमुदाहृतं ॥ कुलानि समधिष्ण्यानि तच्छेषाम कुलानि तु ॥ त्रिकुले च पूजावश्यकी ॥ त्रिकुले पूजयेद् देवीं तु पञ्चारेखस
माहितः ॥ इति वचनात् ॥ शक्तिपूजापि तत्रावश्यकी ॥ कुलवारे कुलर्क्षे च कुलतन्त्रे कुलक्षणे ॥ योगिनीनां सदा पूजा म
नसापि न हीयते ॥ इति कुलचूडामणिवचनात् ॥ कुलहर्क्षे यजेद् देवीं कुलहश्चान्यमेषु सदा ॥ न स्वयेन कुलहक्षाधो नारे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना.म ॥
॥ १२९ ॥

हेनकदाचन ॥ नचैनांश्छेदयेत्सत्त्वीनयदानानुस्पृशेदपि ॥ नतत्पत्रैश्छनभोक्तव्यंप्राणैःकण्ठगतैरपि ॥ सहकारः
कर्णिकारःकेसरस्तिलकस्तथा ॥ कदम्बःसिन्दुवारश्चकङ्केलिश्चम्पकाश्चयः ॥ श्लेष्मान्तकःकुरवकोनिम्बश्चलदलस्त
था ॥ यत्राशोकतिलोविल्वःकुलवृक्षामनात्वमी ॥ एतेषुसन्निहितानित्यंयोगिन्यस्सर्वकामदाः ॥ सर्वपीठेषुनन्तकामरू
पंफलप्रदं ॥ सकृदप्यर्चिनायत्रदेवीवाञ्छितसिद्धिदा ॥ तस्माच्छन्नउरणापुराणकानाक्षाग्रेनिमराडतं ॥ द्विविधंतत्समा
ख्यातंव्यक्तंमव्यक्तमेववाव्यक्ताव्यक्तमनघंमहापुण्यफलप्रदं ॥ तम्भ्यनेयदिभाग्येनकुलतैन्नमनीषिणा ॥ नदान
त्रयजेद्देवीमनेकैरुपचारकैः ॥ इत्यनेपियमाग्यान्नपार्श्वीमनसावरेत् ॥ पर्वतेविपिनेहेरोनिर्जनेमण्डपेतथा ॥ च
तुष्पथेश्मशानेवागच्छन्साधकसत्तमः ॥ ध्यात्वादेवींमजुंजप्त्वाननत्वास्थानेव्रजेत्ततः ॥ पश्चिश्रीकंपक्षिहाकिंशृधुवीक्षन
मेछिवां ॥ कपोतरिमहावराडेश्वहंकेशिवलिप्रिये ॥ कृतान्तारवसत्त्वापेननमस्तेशङ्करप्रिये ॥ श्मशानेचशवंवीक्ष्यम
त्रपूर्वकमानमेत् ॥ प्रदक्षिणमनुव्रज्यतंभनेक्षिप्रिमुत्तमां ॥ घोरदंष्ट्रेकरालाक्षिकटिघोषवसाधिनि ॥ घोरेघोरकरा
स्फालेननमस्तेचितिनिवासिनि ॥ एकंवस्त्वंतथाभक्ष्यंविलोक्यत्रिपुरांनमेत् ॥ वन्धुकपुष्पसङ्काशेत्रिपुरेभयनाशिनि
भाग्योदयसमुत्पन्नेनमस्तेवरवर्णिनि ॥ राजानंराजपुत्रंवाहस्तिभसन्दनानपि ॥ अश्वारोहीवीरपुरुषंमहिषंकु
लनायकं ॥ कुलवस्त्रंतथापुष्पंदृष्ट्वादुर्गान्तमेत्सुधः ॥ जयदेविजगद्धात्रित्रिपुरेम्बत्रिदेवते ॥ भक्तेभ्योवरदेदे

॥ यम ॥
॥ १२९ ॥

137

36

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विमर्हिषघ्निनमोस्तुते ॥ प्रथमश्वछिन्नीयश्चक्रीडाद्रौ लांकुमारिकां ॥ युवतीनां समभ्यर्च्य युवतीमेकवक्षकं ॥ निरीक्ष्य
मन्त्रविन्मूलं प्रजपेद्भैरवन्नमेत् ॥ नमामि वरदे देवि मुण्डमाला विभूषिते ॥ रक्तमाला समाकीर्णे वरदे त्वां नमाम्यहं ॥
प्रणमेत्सर्वसिद्ध्यर्थं दृष्ट्वा तानि विचक्षणः ॥ अन्यथा नभवेन्मन्त्रसिद्धिः कल्पचन ॥ मन्त्रसूक्ते ॥ अष्टम्यां पूजनेदेवा
सर्वकामफलप्रदं ॥ रक्ताभ्रषवीजपद्मं रङ्गगन्धियरीमिश्रितं ॥ मिश्रीकृत्य बलिन्दद्यादष्टम्यां विशेषतः ॥ कुलक्षीरन्न
पादद्याद्दधिशर्करयान्वितं ॥ दानमक्षय्यसिद्ध्यर्थं दद्याद्देव्यै प्रयत्नतः ॥ उदयाकरे ॥ षाष्ठी भाद्रपदे मासि कृष्णाश्विनच
तुर्दशी ॥ कार्त्तिके नवमी शुक्ला मार्गे कृष्णा तु पञ्चमी ॥ पौषे तु पूर्णिमा देवि माघे सितचतुर्थिका ॥ फाल्गुने कार्दशी कृष्णा
चैत्रे कृष्णत्रयोदशी ॥ वैशाखे च तृतीया स्याज्ज्येष्ठे दशहरा स्मृता ॥ आषाढे दशमी कृष्णा अमावास्या च श्रावणे ॥ एतानि दे
वीपर्वाणि क्षपायां साधयेद्बुधः ॥ अर्च्चां कृत्वा यथान्यायमश्वमेधफलं लभेत् ॥ अन्यच्च ॥ यत्र विशेषः न श्रूयते तत्र
शुक्लैकादशीतिनाम्निका ॥ यामले ॥ वैशाखे मासि शुक्लायां तिथौ प्रतिपदि ध्रुवं ॥ ब्राह्मे मुहूर्त्ते उत्थाय कृत्वा नित्यं
क्रियः सुधीः ॥ अर्च्चेद्दिने दिने सम्यक्पूजयेदिष्टदेवतां ॥ अर्घ्यं निवेद्य तत्स्तवं ज्ञात्वा सहस्रपि वेत्स्वयं ॥ प्रजपेत्प्रयतो म
न्त्रमष्टोत्तरसहस्रकं ॥ एवं क्रमदिनं यावन्न कृत्वा दर्शदिनेऽनः ॥ समयाचारचतुरः शक्तीरभ्यवहारयेत् ॥ पूजयेद्वि
धिनामन्त्री लभते वाञ्छितं फलं ॥ मध्याह्ने वाथ सायाह्ने पूजयेदुक्रमागमः ॥ त्रिसन्ध्यं वा यजेन्मन्त्री वाञ्छितां सिद्धिमाप्नु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यात्॥ माघे मासि सिते पक्षे साधकः प्रतिपत्तिथौ॥ सायं सन्ध्यामुपास्याथ दिवाहारविवर्ज्जितः॥ उदिते पूर्ववच्चन्द्र
यजेद्देवीमनन्यधीः॥ चन्द्रास्तमयपर्यन्तं मूलमन्त्रं जपेत्सुधीः॥ एवं प्रतिदिनं कुर्याच्चतुर्द्दश्यन्तिकं सुधीः॥ पौर्णमा
स्यां यथापूर्व्वमर्च्चनं कुर्याद्विचक्षणः॥ एवमेवासिते पक्षे विदधीत विशालधीः॥ मुच्यते सर्व्वपापेभ्यः स्वेष्टां सिद्धिमवा
प्नुयात्॥ ऊर्ज्जे शुक्लप्रतिपद्दिवसात्तोरणपारायणः॥ मण्डले सर्व्वतोभद्रे मधुनापूर्णतुन्नतं॥ संस्थाप्य कलशं तत्र कांस्यपा
त्रं निधापयेत्॥ ज्वालयेद्दत्तदीपन्तु स्थूलवर्त्तिकमुत्तमं॥ ध्यात्वाक्षीपमहादेवीमर्च्चयेदुपचारकैः॥ सायं सहस्रं मन्त्रमा
त्रं प्रजपेत्कुलमन्त्रकं॥ एवं भूतदिने यावत्कृत्वा दर्शदिने ततः॥ पूर्व्ववत्तत्र या देवं कांक्षितां सिद्धिमाप्नुयात्॥ भृगु
वारे विशालाक्षीं सुन्दरीं यौवनोद्धुरां॥ आहूय कुसुमैर्व्वासिकुलां सर्व्वाङ्गसुन्दरीं॥ अभ्यञ्जस्नापयेन्मन्त्री अभ्यङ्गादिवि
धिनाचनं॥ कौसुम्भवाससं तां नानाभरणभूषितां॥ उपवेश्यासने दिव्ये देवताभावसंयुतः॥ तस्या देहे न्यसेन्न्यासांस्त
स्यामावास्यदेवतां॥ निर्व्विकारमना मन्त्री जपेत्सायं सहस्रकं॥ जपं समर्प्पयेत्तस्यै देवीभूतास साधकः॥ भोगैर्नाना
विधैरस्यै सया सहनिशां नयेत्॥ एवं यो भृगुवारे वै कुर्यात्पूजनमादृतः॥ सर्व्वसिद्धिमवाप्नोति नात्र कार्य्या विचार
णा॥ कुलार्णवे॥ श्रीचक्रं कौलिको मोहाद्विज्ञो यदि वसेत्प्रिय॥ न करोति समर्थः सन्स भवेद्योगिनीपशुः॥ एवञ्चक
वित्फलश्रवणमपि न नैमित्तिकत्वसाधकं॥ इन्दोः कोटीरवेर्दृष्टेति फलश्रवणोपि ग्रहोपरागस्नानस्यान्यत्रापि ने

138

३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मित्रिकत्वव्यवस्थापनात् ॥ अकरोत्प्रत्यवायस्तु रत्नस्याविशिष्टत्वात् ॥ नीलतन्त्रे ॥ अष्टम्यां च तु देवेशीं पूजयेद्वृषयन्त
तः ॥ यथा स्वार्थयते मन्त्री निन्नदार्थिनि निन्यथाः ॥ लभते मंत्र तां वा शीं तथाष्टम्यां स्वदायजेत् ॥ अष्टम्यां पूजनं देव्याः सर्वकाम
फलप्रदं ॥ रंभापुष्पं वीजपूरं सुगन्धिपदिमिश्रितं ॥ मिश्रीकृत्य वलिन्दद्याद् दष्टम्यां च विशेषतः ॥ द्विजन्मनां नंयापं तं नन्
स्तणां देवनाशयेत् ॥ तथा ॥ नारिणी यत्र पीठे तु शिवारूपावनिष्ठति ॥ तत्र पत्नेन गन्तव्यं पुण्यसंख्यान विद्यते ॥ लक्षकृयंज
पेन्मन्त्री नारिणी यत्र निष्ठति ॥ निसृष्टहृ स्थिरचित्ते नसिद्धिर्भवति लक्षणात् ॥ समाहृतां मृत्तिकां च अक्षतं च तथैव च ॥
मधुना पायसश्चैव क्षीरमाज्यं च शर्करां ॥ वलिन्दद्याच्च गोधार्मे श्रासवश्च प्रशस्यते ॥ रंभापुष्पं शालमत्स्यं तु डयान्मच्च
वित्तमः ॥ सर्वसिद्धिमनुकम्पता त्ते मोक्षमवाप्नुयात् ॥ साक्षतं विल्वपत्रं वत्तु ऊयाच्च सहस्रकं ॥ लभते मंत्रनां वा शीं स
त्यष्टम्यां च साधकः ॥ त्रिशक्तिरत्ने ॥ चैत्रषष्ठ्यादिमासानां पोर्णमास्यां महाशिवां ॥ अर्चयेद्वक्ष्यमाणेन विधिना साधक
कोत्तमः ॥ चैत्रे दमनकैः पूजा कृत्वा निमार्च्चनं प्रिये ॥ वसन्तसंभवैः पुष्पैश्चन्दनागरुमिश्रितैः ॥ वैशाखे हेमकमलैर्द
थवा चन्द्रचन्दनैः ॥ उपचारैर्हिमैस्सर्वैर्यजेच्छक्करवल्लभां ॥ ज्येष्ठे मासि यजेद्देवीं पनसैः कदलीफलैः ॥ सहकारफलैर
न्यैस्सर्वकामार्थसिद्धये ॥ आषाढे मासि संपूज्या चन्दनैः कुसुमान्वितैः ॥ एलालवङ्गकक्कोलैरथवा यिन्हाशिवा ॥ श्रा
वणे मासि संपूज्या पवित्रैः परमेश्वरी ॥ पवित्रारोपणान्नाम तथा दमनकोत्सवं ॥ जानीयात्साधकश्रेष्ठो मन्त्रकृते नतु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना॰ म ॥
॥ १३१ ॥

ज्येष्ठे ॥ मासि भाद्रपदे पूज्या केतकैर्गन्धकैः प्रिया ॥ आश्विने मासि दद्यादियजेत् पूर्णाग्निकं सुधीः ॥ प्रत्यहं जुहुयान्मन्त्री दि
नहव्याशनं शनं ॥ महान्नमुत्सवं कुर्यात्सर्वसिद्धिमवाप्नुयात् ॥ साधकः कार्त्तिके मासि कुंकुमेन समर्च्चयेत् ॥ प्रदीपान् जु
हुयाद्वर्त्तीस्त्रीणित्रिंशाद्घृतप्लुतान् ॥ घृतप्रदीपान् देव्यग्रे विद्युयाषोडशार्प्पयेत् ॥ एकैकमर्प्पयेद्दिव्यान् परिवारगणा
यच ॥ अथ वैकत्तु संस्थाप्य मध्ये तमभितो नव ॥ देवैः समर्प्पयेन्मन्त्री मूलोच्चारणपूर्वकं ॥ मार्गशीर्षे जपन्मन्त्रं मासापूपैर्मनो
हरैः ॥ नारिकेलाम्बुसंमिश्रं कर्प्पूरमिति निवेदयेत् ॥ पौषे गुडैः शर्कराभिः पूजयित्वा महेश्वरी ॥ साधकः स्वेष्टसंपत्से गव्यं दुग्धं
निवेदयेत् ॥ माघे भर्ज्जितिलै देवीमन्नयानुदुग्धमर्प्पयेत् ॥ फाल्गुने पूजयेद्देवी सौवर्णैर्वा ध राजतैः ॥ कमलैश्चूतपुष्पैश्च नं
थानानोपचारकैः ॥ पवित्रं ग्रन्थियुतं यदादिसत्वं तद्विधिश्च वक्ष्यते ॥ यत्र मासि तिथि विशेषो नोक्तस्तत्रार्च्चना ॥ दिकंपू
र्णिमास्यामेव प्रक्रमात् प्रतिसम्वत्सरं दमनोत्सवश्चावश्यकः ॥ तदुक्तं ज्ञानार्णवे ॥ दमनेन च यो मन्त्री वर्षमध्ये न पूजयेत्
तस्य सांवत्सरी पूजा मदनाय भविष्यतीति ॥ तथा ॥ दमनारोपणाभ्यां साधकानां हिताय वै ॥ सम्वत्सरकृतपूजापू
र्णायेनं भवेत् प्रिये ॥ महाकालसंहितायां ॥ दमनारोपनाख्येका पवित्रारोपणी परा ॥ प्रतिसम्वत्सरश्चैते येन कृते न
साधकः ॥ तस्य वर्षकृता पूजा वृथा भवति भामिनि ॥ कृतामपि विलुम्पन्ति भूतप्रेतादयो गणाः ॥ प्रतिसम्वत्सरं तस्मात्
कुर्याद्यत्नेन साधकः ॥ दमनारोपणां कर्म्म पवित्रारोपणं तथा ॥ पूजाकालो दक्षिणामूर्त्तिसंहितायां ॥ चैत्रादयस्त्व

139

॥ राम ॥
॥ १३१ ॥

३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यो मासाः पञ्चौसितासिते तथे ॥ एतेषां पूर्व्व पर्व्वसु कालस्सर्व्वोत्तमोत्तमः ॥ महाकालसंहितायां ॥ कालस्सधीयोऽस्वस्तु शुक्लः पक्षो
मधोर्म्मितः ॥ मध्यमो माधवोज्येष्ठः शुचिस्त्वधमउच्यते ॥ चातुर्म्मास्यप्रतिष्ठेतु यः कुर्य्याद्दमनं विधिं ॥ ततस्य उर्म्मिते सिद्धिर्वि
पदीतत्र्व जायते ॥ भूताः प्रेताः पन्नगास्त्रिशुधासंपीडिता दशः ॥ अस्माकं भाग्ययोगेन चैतत्कष्टिस्ताधकाधमः ॥ शुभेजनार्द्दने
कुर्य्याद्दमनारोपणं विधिं ॥ नदावयवितुं पामो भक्ष्यामार्त्तनं च नन् ॥ अन्नेव सन्ते शिशिरे च्यो ये कुर्य्याद्दमं विधिं ॥ नेवर्षसु
ग्राद्दिदेमत्तन्नैत्रं न च प्रिये ॥ तस्माद्दत्तत्रये पूर्व्वो दिने दमनकार्च्चनं ॥ न परर्त्तुत्रये कार्य्य देवी प्रीतिम्विधित्सता ॥ तथा ॥ अग्रो
त्तराफल्गुनी भं तिथिश्चापि त्रयोदशी ॥ शुक्लः पक्षश्चैत्रमासो योगोवृद्धिस्तथैव च ॥ तथा ॥ इमान्निधिरतत्रारव्यान वनाट
स्ता भविष्यति ॥ त्वामस्मायेऽर्च्चयिष्यन्ति गन्धपुष्पादिविस्तरैः ॥ नैवेद्यधूपदीपाद्यैर्गीतवाद्यादिनर्त्तनैः ॥ अश्लीलवच
नाक्षेपैर्म्मोदकद्रव्यभोजनैः ॥ योनिलिङ्गादिशब्दानां प्रलापैर्हासकारकैः ॥ तत्तदाकारवचनैर्म्मोहोत्सवसमन्वितैः ॥ तस्य
रात्रीप्सितान् दद्यासेषामस्म दवनास्मर ॥ तस्मरे हनि विस्तार्यामत् पूजां मकरध्वज ॥ दक्षिणामूर्त्तिसंहितायां ॥ अष्टम्या
म्वाचतुर्द्दश्यां योस्मिन्मास्यामथापिवा ॥ पूर्व्वेद्युः प्रकुर्व्वीत सर्व्वोवाप्यधिवासनं ॥ महाकालसंहितायां ॥ अधिवासनकर्म्मा
रम्भतं सङ्कल्पमाचरेत् ॥ राशितिथ्यादिकं प्रोच्य वर्त्तमानत यास्थितं ॥ वार्षिकार्च्चा समाप्यर्थं श्वः कर्त्तव्य सकर्मणः
दमनारोपणास्याङ्गास्याङ्गभूतमधिवासनं ॥ करिष्य इति सङ्कल्प्य यथाय तनमर्च्चयेत् ॥ दक्षिणामूर्त्तिसंहितायां ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्नामन्त्रं दमनस्यादौ चन्दकलसनादिभिः॥ चन्दकलसनामन्त्रास्तु॥ ह्रीं क्लीं ऐं ब्लूं स्त्रीं ॐ ह्रीं ह्रैं क्रीं ॐ सरस्वत्यै नमः॥ ह्रीं श्रीं
क्लीं ग्रं ग्रीं क्लीं ब्लूं सः॥ कामदेवस्य सम्भूत रतिनेत्रजलाद्भुत॥ ऋषिगन्धर्वसिद्धानां विमोहकन मोस्तुते॥ शिवकार्यसमृद्धि
प्रदेनेन व्योमसिद्धिर्वा तथा॥ इत्यामन्त्र्य शिवं काममनेन सम्पूजयेत्सुधीः॥ अन्यदेवोपासकेनापि मन्त्रेण शिवपदस्थाने इष्टेन
कर्त्तव्यः॥ शक्तिमन्त्रस्य वाभिधानान्तु शिवमिन्दुपलक्षणं स्वेष्टदेवानां पूजयेदिति केचित्॥ ॥अथाधिवासनकर्म॥ त
त्र प्रोक्तावल्या॥ पूर्वेद्युः संयतो भूत्वा मन्त्री वादित्रनिस्वनैः॥ गच्छेद्दमनकारामं यत्राशोकः प्रतिष्ठितः॥ तत्रोपविश्य म
न्त्रेण पूजयित्वा सनेऽशुभे॥ नत्वा गृहं गतो धातं स्वेष्टदेवस्य मन्त्रवित्॥ स्नात्वा तं सकलीकृत्य कलशं स्थापयेत्ततः॥
वर्द्धनीञ्चैव संस्थाप्य विधिना मन्त्रवित्तमः॥ दत्वा बलिन्तु भूतेभ्यस्तानि निस्सार्य मन्त्रवित्॥ अशोकं तत्र संपूज्य तत
द्भावे विधायतं तत्॥ मराउलेचन्दनेनाथ फलपुष्पोपशोभितं॥ कालतत्त्वेन संपूज्य वसन्तं च यथाविधि॥ अघोरविद्य
या पश्चाद्दमनं प्रोक्ष्य वारिणा॥ अस्त्रमन्त्रेण संरक्ष्य कवचेनावगुण्ठयेत्॥ त्रिभूलपुत्रान्वक्षाथधामयेद्दमनोपरि॥
त् नगीनादिभिस्समं कुर्यात्तज्जागरणान्निशि॥ वर्द्धनीकरकं क्षुद्रमाईजलपात्रमिति यावत्॥ ततस्थापनं कुम्भेनैरत्र
येण॥ कुण्डलं मन्त्रसेदित्यभिधानात्॥ भूतबलिदानं॥ ह्रीं श्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हूं फट् स्वाहेत्यनेन कर्त्तव्यं॥
॥दपसारणामन्त्रस्तत्रैव॥ पापराक्षसिकारिणो भूता भूमौ ये चान्तरीक्षगाः॥ दिवि लोके स्थिता ये च ते नश्यन्तु शिवाज्ञया

140

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रक्षाभिषेकमथैव वर्द्धनीजलेन। अघोरमन्त्रः अघोरेघोरे ह्रीं घोरघोरतरे भीं सर्वध्नः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः
ह्रीं श्रीं इति मन्त्रः॥ त्रिभूलमुद्रा शिवरहस्ये उक्ता॥ अन्यत्र केनकनिष्ठाग्रं वध्वाद्विष्टाङ्गुलित्रयं॥ प्रसारयेत्त्रिभूलाख्यमुद्रेयं
परिकीर्त्तिता॥ ॥अथ दमनमनुनाद्येत्॥ तथाहि दक्षिणामूर्त्तिसंहितायां॥ सद्यमुत्पाद्य दमनं समूलं पञ्चवेष्टितं॥ आ
नीतमथ वामेन मूलादानीनमीश्वरि॥ वामनः स्थापयेद्देवि सर्वतोभद्रगामुजे॥ वस्त्वारे दामनं यावं स्थापयेत्पूजयेन्न
तः॥ प्रणवं भुवनेशानी रतयेनम इत्यपि॥ इतिमन्त्रो महेशानि कामनमन्त्रस्तथोच्यते॥ प्रणवं कामवीजश्च कामायनम इ
त्यपि॥ मन्त्रेण पूजयेन्नत्र दमनं कर्णिकागतं॥ ततस्तत्पञ्चमपूर्वादिपत्रेषु अनिपूजयेत्॥ अष्टाशाग्रपत्रकेर्मन्त्रैरष्ट
द्रव्यपुनैःक्रमात्॥ कामो भस्मशरीरश्च अनङ्गो मन्मथस्तथा॥ वसन्तसखनामा च स्मरइक्षुधनुर्द्धरः॥ पुष्पवाणश्च ना
माद्या नेहन्ताः प्रकीर्त्तिताः कर्पूरं रोचनायुग्मं कस्तूरी चन्दनः प्रिये॥ अगरुं कुङ्कुमञ्चैव धात्रीचन्दनमेव च॥ सुगन्धिपुष्प
युक्तानि अष्टद्रव्याणि पार्वति॥ संपूज्य मदनं सम्यक् गन्धपुष्पाक्षतादिभिः॥ जपेदनङ्गगायत्रीं यथाशक्त्या प्रसन्नधीः
कामदेवाय इत्युक्त्वा विद्महे च वदेत्ततः॥ पुष्पवाणाय इत्युक्त्वा धीमहि तु पदं ततः॥ भवेदनङ्गगायत्री तन्नोऽनङ्गः प्र
चोदयात्॥ नमोस्तु पुष्पवाणाय जगतानन्दकारिणे॥ मन्मथाय जगन्नेत्र रतिप्रीतिप्रियाय च॥ अनेन मनुना देवि
नमस्कुर्यादनन्तरं॥ अथ विज्ञापनं देव्यै कुर्याद् दमनयाणिषुक॥ आमन्त्रितासि देवेशि सम्प्रःकाले मया शिवे॥ कर्त्ते

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना·भ ॥
॥१२२॥

मन्त्रयथालाभं पूर्व्वसंपर्व्वतराज्ञया ॥ विज्ञाय नामर्थमन्त्रेणात्रिपुरां परितोषयेत् ॥ ततः संपूजयेद्देवीं गन्धपुष्पाक्षतादि
भिः ॥ नैवेद्यम्विविधं दत्वा श्रीविद्यां प्रार्थयेत्ततः ॥ षोडशार्ण्णे जगन्मातर्व्वाञ्छितार्थफलप्रदे ॥ हृतस्थानपूरये देवि कामा
न्कामेश्वरेश्वरि ॥ अनेन प्रार्थये देवीं पश्चाद्दमनमीश्वरि ॥ वर्म्मावगुण्ठितं कुर्य्याद्दस्त्रेणापि सुरक्षितं ॥ ततो जागरणं
कुर्य्यात्सद्यश्चेज्जागरो न हि ॥ दमनस्यानयनपक्षे पि उत्पाटनपूर्व्वकर्म्मकार्य्यमेव ॥ दमनस्थलीमित्यादिपदस्य द
मनावस्थितिस्थानमात्रवाचित्वात् ॥ यदि तु दमनारामं सविधं संस्थानदाय थोक्तस्थानस्यैवोत्पाटनमिति द्वेषः ॥ वस्वा
रे द्वादले षुजइत्यन्वयः ॥ पूजयेदीनकामोऽग्निमयन्त्रानुरोधात् ॥ रोचनायुग्मं गोरोचनावं रोचनाच ॥ त्रिपुरां श्रीवि
द्यामित्युभयमप्युपलक्षणं ॥ सर्व्वत्रैनेन कर्म्मणो विहितत्वेनाकांक्षातो लात् ॥ षोडशार्ण्णेइत्यादिमन्त्रेसी विद्याभिन्न
देवीपूजने षोडशार्ण्णेइति पदस्थाने सर्व्वरूपे इति योज्यं ॥ ॥ अथ पूजादिनकृत्यं ॥ महाकालसंहितायां ॥ ततः प्रभा
तउत्थाय कृत्वा नित्यक्रियां सुका ॥ कृतार्च्चासंभृतिः पूजामण्डपं समुपाविशेत् ॥ मूर्त्तियन्त्रालयादीनि कुर्य्याद्दुर्व्वलि
तानि हि ॥ संकल्पं पुरतः कुर्य्यात्तदनन्तरमीश्वरि ॥ दमनारोपकर्म्माहं करिष्ये इति वोलिखेत ॥ दक्षिणामूर्त्तिसंहिता
यां ॥ अथ प्रातः समुत्थाय कुर्य्याद्दैनित्यपूजनं ॥ ततो नैमित्तिकं कुर्य्याद्दमनश्च सुपूजयेत् ॥ नैमित्तिकं वक्ष्यमाणं सुरव
मिष्टदेवतापूजनरूपं यत्तत्र तदुत्तरं दमनपूजाश्रूयते ॥ तथापि ॥ दमनस्य सुतो ३ देवत्वात्तत्पूजनस्य सुरव्यापूज

141

॥ राम ॥
॥१२२॥

५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नोपयुक्तदमनसंस्कारकत्वेनोपादेयत्वात् ॥ प्रथममेव तदाचरणं युक्तं ॥ अस्य क्रमानानर्थकत्वात् ॥ अत एव वज्रानासिवेन तथैवो
क्तं तथा हि ॥ दमनं नवधा कुर्यात् पूजयेत्तदनन्तरं ॥ आनन्देश्वरवीजेन ततो भिन्ने न सुन्दरि ॥ आनन्देश्वरीवीजेन नवधा वि
तुना सह ॥ नवप्रकारसंभिन्नं दमनं पूजयेत्क्रमात् ॥ तेनैव महतीं पूजां मध्ये तत्पुष्पमिश्रितां ॥ मनोहराश्च विधिवत्कृ
त्वा नैवेद्यमुत्तमं ॥ सकर्पूरस्त्वनाम्बूलं दत्वा संप्रार्थयेत्ततः ॥ समस्तचक्रचक्रेशि सर्वविद्याशरीरिणि ॥ वेदमानमर्मैतत्तुभ
वविद्यनवात्रया ॥ ततः स्वगुरुमभ्यर्च्य पुष्पभूषाम्वरादिभिः ॥ दत्वा दमनकं तस्मै प्रणिपत्य प्रसादयेत् ॥ जलकेलिन्ततः
कुर्यान्नाकं समयिभिस्सुखं ॥ अन्ते यतनं प्रकुर्वीत रसैः खड्गिः समन्वितं ॥ एवं च कुरुते विधानदमनारोपणक्रमं ॥ ततस्स
र्वन्तरीं पूजां श्रीविद्याधिष्ठिता भवेत् ॥ आनन्देश्वरानन्देश्वरीमन्त्रयोः पूर्वोक्तयोश्च दमनस्य रयूथ्यम्भावेन नवाक्षरत्वं
अत्र सर्वाक्षरेषु तु सारयोगो विशेषः ॥ पूजा च प्रथमं भैरवमन्त्राक्षरैस्तथा भैरवीमन्त्राक्षरैर्न्नमोन्तिकैः कार्येति संप्रदायः
प्रथमश्च मध्ये ततः स्वाग्रादिप्रदक्षिणेन कामपूजायां तथा दर्शनात् ॥ मध्यं पूर्वं लिखिताष्टदलकमलस्य तत्पुष्पमिश्रितां
दमनपुष्पमिश्रितां पूजां च इष्टदेवतायाः उत्तरवाक्ये प्रार्थनस्य तन्त्रत्वेनैव श्रुतत्वात् इयमेव पूजा प्रधानं ॥ महाकाल
संहितायां ॥ शक्तिपूजा च कर्त्तव्या दमनारोहणोत्तरं ॥ कृते पुरस्तात्सकलं विफलं जायते प्रिये ॥ अतः कार्या शक्तिपूजा
दमनारोहणोत्तरं ॥ तथा ॥ सत्पुष्पदमनश्चैत्रे तेन चाभ्यर्च्य कालिकां ॥ सप्तजन्मकृतैः पापैर्मुच्यते नात्र संशयः ॥ चैत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भुक्त्वा त्रयोदश्यामधिवासनपूर्वकं ॥ आरोप्य दमनं दुर्गां विधिनानेन पूजयेत् ॥ मयोक्तेन वरारोहे तस्य पुण्यफलं शृणु ॥ अ
श्वमेधसहस्रस्य राजसूयशतस्य च ॥ तत्फलं समवाप्नोति देववद्दिवि मोदते ॥ तथा ॥ एवं यः कुरुते पूजां दमनारोपणा
भिधां ॥ भवन्ति नापदस्तस्य कदाचिदपि सुन्दरि ॥ सिध्यन्ति तस्य मन्त्राश्च नारीणां वल्लभो भवेत् ॥ सर्वसंपद्युतः श्री
मान् मोदते दिवि देववत् ॥ इति दमनारोपणविधिः ॥ ॥ अथ पवित्रारोपणं ॥ तत्र प्रतिवर्षमावश्यकं ॥ इसिणामृ
न्निसंहितायां ॥ ईश्वरवाक्यं ॥ अथ वक्ष्ये महेशानि पवित्रारोपणं महत् ॥ यस्मिन्कृते कृतं सर्वमन्यथा भ्रंशमुच्यते ॥ गते संवत्स
रे यस्तु न करोति पवित्रकं ॥ एकीकृत्य फलं तस्य नीयते दुर्गया बलात् ॥ ॥ कालोत्तरे तथैव ॥ आषाढ उत्तमो मासः श्रा
वणो मध्यमः प्रिये ॥ हीनो भाद्रपदो मासः पक्षौ सितसितेतरौ ॥ प्रशस्तः शुक्लपक्षस्तु तदभावे सितेतरः ॥ चतुर्दश्यष्टमी
पूर्णमासी तिथिर्वै यजेत् ॥ महाकालसंहितायां ॥ कालो ग्रीष्मः शरद्वर्षास्ववसुखतनमः प्रिये ॥ केचिद्वसंतमिछंति
कालं साधारणिकं बुधाः ॥ नैव हेमंतशिशिरौ प्रशस्ते नैकदाचन ॥ ॥ तथा ॥ न च कार्यासजं ज्ञेयं शाणं वायदजं तथा ॥
सूत्रं इव्यमशक्तौ स्या हे विकार्याससंभवं ॥ शक्तौ तु कृमिकोषोत्थं यदस्त्रं पशस्यते ॥ ॥ तथा ॥ कृतेन वरगणां सूत्रं मुपवी
तमुदीर्यते ॥ त्रयाणां तद्विवर्णानां सं सेनि रुणितं सुंदरि ॥ तद्देवसूत्रं देवानां कंठे वऊगणीकृतं ॥ पवित्रमिति नाम्नैव कथ्यते
निगमादिषु ॥ ॥ तथा ॥ आम्नायभेदाद्विज्ञेयं तत्सूत्रवर्णैः सुरेश्वरि ॥ पूर्वोर्द्ध्वयोः सितं सूत्रं रक्तसूत्रं तथोत्तरे ॥ पश्चिमे प्यप

142

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पीनं द्विजश्रेष्ठो दक्षिणायोर्मतं ॥ नलिन्याः कं भवेत्सूत्रं षडाम्नायेषु कर्हिचित् ॥ आम्नायेष्वथ सर्वेषु प्रशस्तं सितमेव वा ॥ कुमारीकर्त्तितं सू-
त्रं मतिशाश्यस्य कारकं ॥ पतिपत्न्याकृतं मध्यमधमं विधवाकृतं ॥ विप्रक्षत्रार्य्यजातीनां पत्नीभी रचितं शुचि ॥ आवर्ज्जितं पट्टसूत्रमपि
रन्दष्टुचैव कथ्यते ॥ विशेषतो ह्यमीषां हि विहितं यतिहीनया ॥ वैश्यया कर्त्तितं सूत्रं मेध्यमित्यपरे जगुः ॥ रजकावायपात्रिका का-
षायपयहृद्यायवा ॥ गोष्ठावायप्यथ रंडिन्या गातिन्या पद्धिनिर्मितं ॥ नक्तंत्रजपविज्ञेयसानन्वयो नरकं व्रजेत् ॥ तस्मात्सूत्रं विनिर्मीतोपलः
कार्यो विशेषतः ॥ मध्यमः स्त्रीग्रहीय स्मृतं भावः श्रेष्ठ उच्यते ॥ षरत्वारो धमकल्पः स्यान्निर्थारिक्ता विवर्जिता ॥ सापि भद्रतिथौ ग्राह्या वनु-
र्थीभौमश्चवर्च ॥ रवौ तु सप्तमी वर्ज्या रिक्ता वर्ज्या गुरावपि ॥ तिथिस्त्याज्यानकार्यी हस्तौ मेन सहिता यदि ॥ पुंनक्षत्रस्य योगेन पवित्राधिकं
विज्ञायते ॥ नानीं तु जीवदिनकृद्दिवसे वा निशीनिस्तथा ॥ केचिद्व्येतेषु पर्वेषु परे सुरपि वा पुनः ॥ ॥ ~~दक्षिणामूर्त्तिसंहितायां~~ ॥ पट्टसू-
त्रं विशिष्टं तु कर्पासजनितं तथा ॥ त्रिगुणं त्रिगुणीकृत्य पक्षाल्य मलवारणं ॥ पश्चिमास्ये फनैर्मन्त्रैर्दक्षिणैः शोषयेत्ततः ॥ मंत्रैर-
थ पवित्राणि मनोरम्याणि कारयेत् ॥ अष्टोत्तरशतं श्रेष्ठं तदर्द्धं मध्यमं प्रिये ॥ तदर्द्धं च कनिष्ठं स्यात् यथाशक्त्याथ कारयेत् ॥ उत्तरा-
स्यो दिनेर्मंत्रैर्द्दशग्रंथीस्तु कारयेत् ॥ विचित्रया चित्रयेत्ताः कुंकुमादिभिरद्रिजे ॥ पवित्रसमदिवसात्पूर्वेषु रधिवासनं ॥ सद्योधि-
वासनं वापि कुर्यात्तु परमेश्वरि ॥ रात्रौ समर्चयिभिः सार्द्धं नित्यपूजाप्रतं नरं ॥ ऊर्द्ध्वं सिंहासने मंत्रैः सूत्रपातं तु वा मतः ॥ स्थापयित्वा
स्ववर्मभ्यां कृत्वा रक्षावगुंठने ॥ दंतकाष्ठं तथा गंधं भस्मचंदनमृत्तिकाः ॥ सिद्धार्थश्च तथा धात्रीफलं वकुलसंभवं ॥ पूर्वादिदिक्षु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमनःपवित्रसूत्रभाजनात् ॥ अश्वत्थपत्रपात्रेषु प्रक्षिपेत् सिद्धिहेतवे ॥ कुमारसोमस्वारेशात्र सनागशिखिध्वजाः ॥ सूर्यः सदाशि
वःशार्वो देवताःसुर्नवामराः ॥ सूत्रेषु पूजयेत्त्रु लविश्वीशाश्वत्रिसूत्रके ॥ क्रियात्रयोरुपीवीरागायत्रीचापराजिता ॥ विजयाचज
याद्देविमुक्तिदा च सदाशिवा ॥ मनोन्मनी च नवमी दशमी सर्वतोमुखी ॥ ग्रंथिस्थदेवता पूजाउपचारैः समर्चयेत् ॥ नित्यावे
उशदेवे शिष्यीविद्यां च स्मरेत्प्रिये ॥ पश्चिमास्योद्गनेत्रित्यादिशी विद्यापरं ॥ अत्र तु मूलमंत्रेण तस्मींमेव वाक्षालनं
कुर्यात् ॥ कुमारःसनत्कुमारः शिखिध्वजो गुरुः ॥ षोडशानित्या पूजनमपिश्रीविद्यापरमेव ॥ ॥महाकालसंहितायां ॥ याव
त्यो देवताः संनिदिस्येनैमित्तिकेपि च याथ्याह्नपरीवाराः पंचायतनसंयुता ॥ अपेक्षितं हि सर्वेषां पवित्रमत्र कर्मणि ॥ तथा
कृतांजलिः पशमेनं मंत्ररूपमुदीरयेत् ॥ त्वंसूत्रनाथ्देमखक्रियाणांप्रमोसिकर्पासजसूत्रसंज्ञा ॥ तथा विनिर्माय वरूपवीतं दाये
ऽमरेभ्यो भवसूत्रपूतं ॥ ॥दक्षिणामूर्तिसंहितायां ॥ अधिवासदिनेप्रोक्तः पश्चादाराधनं भवेत् ॥ नित्यार्चनानंतरं तु नैमित्तिकमिदंभ
वेत् ॥ ॥महाकालसंहितायां ॥ अथ नैमित्तिकसमसमारभेतार्चनं बुधः ॥ ॥तथा ॥ नैवेद्यधूपदीपानां कर्तव्या मत्यसीस्थितिः ॥ आकार
णीयपत्नेन सस्वर्णासु देशिकैः ॥ कुसुमैर्लोरुणां कार्यं बहिरंतर्गृहस्य च दक्षिणामूर्तिसंहितायां ॥ समयिभ्यश्च विद्याशिकमात्सश्च सुभो
जनं ॥ स्वगुरुं पूजयेद्रत्नवस्त्रालंकारगोधनैः ॥ यथाविधि नमस्कृत्य देवीरूपेणचिंतयेत् ॥ आरोपयेत्स विज्ञं तु वित्तशाठ्यविवर्जितः ॥ गुरुः
संपूजने यत्र तत्कर्मसफलं भवेत् ॥ सचेत्तपूज्यते यत्र क्रियासानिःफला भवेत् ॥ गुरोरभावे तत्पुत्रं तदभावे तदंगनां ॥ भार्याभावे त्वं येद्द

143

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यं गुरुगोत्रसमुद्भवं ॥ कृत्वा पूर्णाहुतिं पश्चाद्द्यो दक्षिणान्यविशेषकं ॥ श्रीचक्रमध्यसिद्धायै पूजयेत्तन्निवेदयेत् ॥ महा
कालसंहितायां ॥ यस्य यस्य तु देवस्य यो योर्च्चावसरो भवेत् ॥ तस्य तस्य तु देवस्य तस्मिंस्तस्मिन्वरानने ॥ पवित्रन्तस्य दा
तव्यं तन्मन्त्रोच्चारपूर्वकं ॥ तथा ॥ दुर्गाश्चावश्यकत्वेन दानव्यावलिकर्म्मणि ॥ तन्त्रे ॥ दिवानिशार्च्चनं कुर्य्यात् पात्रैर्नैमि
त्तिकं भवेत् ॥ इति पवित्रारोपणविधिः ॥ ॥ कुलचूडामणौ ॥ पर्व्वते विपिने चैव निर्ज्जने शून्यमण्डपे ॥ चतुःपथे क
लामध्ये यदि देवाः जनिर्ब्बवेत् ॥ कुलं ध्यात्वा मनुं जप्त्वा नत्वा गच्छेद्यथासुखं ॥ कलामध्ये प्रमदामध्ये कुलं इष्टदेवतां ॥ पु
रश्चरणकाले तु यदि स्यात्पीठदर्शनं ॥ तदा तत्र पीठपूजा मनसापि न हीयते ॥ देवीकूटे महाभागा मोड्डियाने च भैरव
योगनिद्रा च कामरूपे महिषासुरमर्द्दिनी ॥ कात्यायनीं कामभूमौ कामाख्यां कामदायिनीं ॥ जालन्धरे पूर्णेशीं पूर्णशैलेच
चण्डिकां ॥ कामरूपात्तु चौहारे पूज्या दिक्करवाहिनी ॥ अथवा कामरूपस्य दर्शनं यदि भाग्यतः ॥ तदा भगादि देवीनां
पूजा तत्र विधीयते ॥ तथा ॥ प्रथमं साधकश्रेष्ठो देवीकूटस्य मस्तके ॥ विलिख्य यन्त्रं पूर्वोक्तं पूजयेत्कुलवर्त्मना ॥
पीठादि देवीं प्रथमे पूजयेद्गन्धपुष्पकैः ॥ महाभागान्ततो मूलदेवीमावरणैः सह ॥ लक्षैकं तत्र जप्त्वा तु उड्डियानं ततो
विशेत् ॥ तत्पीठयोगनिद्राख्यां पूजयित्वा ततो यजेत् ॥ निजेष्टदेवतामन्त्रं जपेल्लक्षं समाहितः ॥ कामरूपं ततो गत्वा
ततः कात्यायनीं यजेत् ॥ जप्त्वा लक्षं ततो नाभौ कामाख्यां प्रथमं यजेत् ॥ ततो जालन्धरे गत्वा पूर्णेशीं प्रथमं यजेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रापि लक्षसंख्यानं जप्त्वा मन्त्रं समाहितः ॥ ततः पूर्णगिरौ गत्वा यत्नेन सुधीस्ततो जपेत् ॥ कामरूपं ततो देवस्तकामाख्यां प्रथमं य
जेत् ॥ ततस्तत्रैव महादेवि यजेद्दिक्करवाहिनीं ॥ एवं पीठेश्वरीमिष्ट्वा पूजयित्वेष्टदेवतां ॥ सप्तपीठे सप्तलक्षं जपेच्छान्तो
समाहितः ॥ पीठानां परमं पीठं कामरूपं महाफलं ॥ तत्र या क्रियते पूजा सङ्कथापि महेश्वर ॥ विहाय सर्वपीठानि तस्य दे
हे वसाम्यहं ॥ तस्मादुत्तरं प्रोक्तं कामाख्यायोनिमण्डलं ॥ ॥ अथ कुमारीपूजा ॥ महाकालसंहितायां ॥ ततश्चानुष्यनिशिवा
वलिशेमस्तुनीश्वरौ ॥ कुमारीपूजनेनात्र यथा सद्यः प्रसीदति ॥ न केवलं पूजयेत्तां भोजयेत्तामपि यत्नतः ॥ तथा ॥ वस्त्रानाच
पकरणात् पूजायाः परिकीर्त्तिता ॥ करणस्याज्ञातापि सा दत्ताऽस्मिन्नकृतेपि हि ॥ तथा ॥ कौलानां निशि पूजोक्ता स्मार्त्तानामप
राह्णिकी ॥ नित्यानुष्ठानप्रवृत्ताया काम्या नैमित्तिकी तथा ॥ सुस्नातां रक्तपीनादिनानारोगैरलं भुक्तां ॥ सर्वालङ्कारविचार्जी
मत्तानां नग्नो वेष्टितां ॥ अजातपुष्पमनङ्गां सप्ताष्टनववार्षिकीं ॥ अनीचजातिगोत्रजां पितृमातृमतीमपि ॥ अदन्तुराम
वागदन्तामधिकोनाङ्गवर्जितां ॥ अदीर्घकेशीं कुटिलां सुस्मितां श्यामलोभवां ॥ श्यामाक्षीं दीर्घदन्तीमोन्नतनयनां पिङ्गमूर्द्धजां
ततुमुन नगनिकुष्ठां कुब्जां खञ्जाम्लां खर्वदगं ॥ भुक्तेशालपत्रसङ्गितां तथा चैव गलत्कुष्ठां ॥ जातस्तनरजोन्नयां प्रयत्नेन विव
र्ज्जयेत् ॥ एतत्त्रिका कुमारीतु वरणीया स्वनक्रमे ॥ यामले ॥ यः कुमारीं यजेन्मन्त्री सर्वं यर्वं सुसर्वदा ॥ तेनार्च्चिता महादेवी
सर्वं समन्तसंशयः ॥ संध्येकवर्षा संप्रोक्ता द्विवर्षा च सरस्वती ॥ त्रिधा मूर्त्तिस्त्रिवर्षा च चतुरब्दा च कालिका ॥ सुभगा पञ्चव

॥ राम ॥
॥१२५॥

144

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्वेयमुमाय ष्ठापिकी भवेत् ॥ मालिनी सप्तवर्षा च अष्टमी कुब्जिका मता ॥ नवाब्दा कालसंकर्षा दशवर्षापराजिता ॥ एकादशा
ब्दा रुद्राणी द्वादशाब्दा च भैरवी ॥ त्रयोदशा महालक्ष्मीस्तथा कुलनायिका ॥ क्षेत्रज्ञा तस्य राप्रोक्ता षोडशाब्दा च चण्डिका ॥ एवं क्र
मेणविज्ञेया विना पुष्पं कुमारिका ॥ महाकालसंहितायां ॥ गीतवादित्रनिर्घोषैरानन्दपूर्वकं ॥ नीत्वा पूजागृहद्वारि कुमारी
स्या अशुम्भिकाः ॥ पञ्चवासन्नवा चापि नवैकादशवासुनः ॥ पश्चैकानाशु कर्त्तव्याया स्यात्सर्वाङ्गसुन्दरी ॥ वहीनामपप्रभवेहि
मवेदेकाकुमारिका ॥ कामे नैमिनिके वैकावस्थः शारदपूजने ॥ श्रेणीभूता उभिनाम्ब नश्रीभूनानना अपि ॥ स्थापयित्वा क्रमेणै
नामुखामार्गेन योजन ॥ देवीं बुद्धिं विधायास्यां साधको विगतज्वरः ॥ गृहीनमदिरानन्तः कल्पितान्नैन संभूतिः ॥ प्राणायामं विधा
यादीननी भूतापसारणं ॥ गुरुं गणपतिं नत्वा वामदक्षिणयोस्तनः ॥ मध्ये कुमारीश्च तथा मूलदेवीस्वरूपिणीं ॥ छोटिकाभिस्तथा
तालत्रितयैर्वन्धनं दिशां ॥ तथा ॥ कुमार्या मूलभूतायाया दैव्य क्षालयेत्ततः ॥ तथा ॥ तज्जलं मस्तके दद्या देवी या दोदपूजया ॥ सोनन्त
रीयां शुकेनैव यथाप्रपुनयेत्ततः ॥ पुनरक्षतमात्याविघ्नानुन्नादयेत्प्रियः ॥ उदीर्यमानमन्त्रेणातलत्रयपुरस्सरं ॥ नारपाशक
ला कूर्चस्वाणिप्रथमतो वदेत् ॥ भूतान्ययसारयत्रवविघ्नान्नाशयचेत्यपि ॥ हठीर्षेत्ररमेदद्यादेकविंशाक्षरीमनुः ॥ कुमार्या सहि
तास्सर्वे तया देवीस्वरूपया ॥ दर्शनार्थं समायान्ति यावन्तो देवयोनयः ॥ प्रेता भूता पिशाचाश्च गन्धर्वा गुह्यकाश्चपि ॥ राक्षसादान
वायक्षायेचान्ये क्रूरकर्म्मिणः ॥ सह स्रविशको मार्यामरणं पंशारदार्चनं ॥ पतिनिच कुमार्याश्चापूजां विध्वंसयन्ति च ॥ अनेवार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ता॰ भ ॥
॥१२६॥

दयं कार्यं विघ्नस्तोत्सारणं प्रिये ॥ ततः स्ववामहस्तेन कुमार्या दक्षिणं करं ॥ गृहीत्वा दक्षचरणाविनिःक्षेपपुरस्सरं ॥ पत्नीभूता:
कुमारीस्थाः श्लोकरूपं मनुं पठन् ॥ पूजागृहात्ततः शनकैर्न्निर्ममौलिः प्रवेशयेत् ॥ त्वमस्वं जगतामाद्ये जगदाधाररूपिणि ॥ कुमा
रीरूपमास्थाय प्रविशेदं गृहं मम ॥ भवत्याः कीदृशं रूपं जाने मान रहं नहि ॥ कुमारीरूपमेवेदं पश्यामि नरचक्षुषा ॥ भक्ति(
म्मदीयाम्विज्ञाय त्वमागा मनुजयोषिते ॥ त्वया प्रकटितं रूपं मीदृशं सर्वसिद्धये ॥ दृष्टिः कार्या न मे पापे सञ्चारे नाऽस्मनः पथः
दृष्ट्वायां केवलं भक्तोदानवासुरवंदिते ॥ शिराप्लवरूपं हि कीदृशान्ने निजानने ॥ ज्ञातास्वामिको वराकोहं पाश्चभौतिकविग्रहः
इति पञ्च पठन् श्लोकान् स्वपृष्ठेनैव तालयेत् ॥ अनीक्षमानएवेशि गीतवाद्यपुरस्सरं ॥ यामले ॥ स्नापिता गन्धतैलेन नाना
भरणभूषिता: ॥ आनीय देवतापार्श्वे स्थापनीया सुधीमता ॥ महाकालसंहितायां ॥ उरस्वां यत्पूजनं प्रोक्तं मुस्थायाया एव तन्म
तं ॥ तत्पूजयैव तास्सर्वाः पूजितास्युर्न्न संशयः ॥ तथा ॥ बलिन्दत्वा ततो देवयोनिभ्यः परमेश्वरि ॥ आरम्भेन निरालस्यः कुमा
रीन्यासमुत्तमं ॥ तथा ॥ नामान्यादौ खड्गमहाचण्डयोगेश्वरीमता ॥ ततः सिद्धिकरालीचण्डनः सिद्धिकराल्यपि ॥ महाना
मार्थ्य थज्ञे पावज्रकापालिनी ततः ॥ मुण्डमालिन्यट्टहासिन्यतो हे परिकीर्त्तिते ॥ चण्डकापालिनी कालचक्रेश्वर्यपतन्त्र
रं ॥ गुह्यकाली ततः कामाख्यिनी कामाख्यया सह ॥ चामुण्डासिद्धिलक्ष्मीश्वकुब्जिकानन्दनन्तरं ॥ मातङ्गीनदनुज्ञेया च(
ण्डेश्वर्यथकीर्त्यते ॥ सर्वशेषेतु कौमारी एता अष्टादशोरिता: ॥ अङ्गान्यतो वाग्भवशिरोमुखनन्दनचक्षुषी ॥ कर्णौ नासा

॥ राम ॥
॥१२६॥

145

43

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठेचापिकपोलेतुनयनेपुनः॥ अधरोष्ठेदन्तपंक्तिस्कंधौहृदयमेवच॥ वाहूचजठरेपृष्ठगुह्ये जानूतथैवच॥ जंघेपादेचसर्वाङ्ग
तावन्त्येवस्थलानिच॥ त्रिशक्तिस्थले॥ कलादिवक्तान्तंताः पूजयेद्विधिनाबुधः॥ उपवेश्यासनेदिव्येकुमारीसाधकोत्तमः॥ वस्त्र
मानेनविधिनादेहन्यासमाचरेत्॥ कुमारिकास्यात्त्वथमाद्वितीयानायिकामता॥ तृतीयाभैरवीख्याता तुर्यावागीश्वरीभवे
त्॥ पालिकापञ्चमीप्रोक्तासंवुद्ध्यंताः कलादिकाः॥ न्यस्याःपञ्चाङ्गयोगेनकुमारीणांकलेवरे॥ वामावर्त्तक्रमादास्यचतुःकंपुन
येत्क्रमात्॥ ततःसिद्धाजयापूर्वाजयान्याकुब्जिकापरा॥ कालिकापञ्चमीप्रोक्ताविज्ञेयावोधिनाइमाः॥ पूर्वादिवक्त्रसंयुक्ता
श्चतुर्थ्यन्तानमोन्तका॥ तत्तस्थानेषुविन्यस्याःस्वक्रियाक्रमपूर्वकं॥ पञ्चप्रणवयोगेनचैतन्यमनुनासह॥ न्यासजालंहिपू
र्वोक्तंकुर्यात्साधकसत्तमः॥ महाकालसंहितायां॥ ततोर्घस्थापनंकुर्यान्निजकेयदुदाहृतं॥ पूजोपकरणस्यापिभ्युक्षिरू
क्षापुरोक्तवत्॥ तथा॥ ततोध्यानंप्रकुर्वीतकुमार्यावक्ष्यमाणकं॥ तथा॥ उपचारांस्ततस्सर्वान्पाद्यादीन्स्तुनिपश्चिमान्॥ या
मले॥ षष्ठ्याःपूर्वमार्गेणवक्ष्यमाणेनषोडश॥ स्वनामभिश्चतुर्थ्यन्तेस्त्विनारोपयेन्नमोन्तकैः॥ देवतापश्चिमेमन्त्रीयजेद्रत्ना॥
सुलक्षणाः॥ आद्याशुद्धाबालिकास्यात्तृतीयाललितास्मृता॥ चतुर्थीमालिनीख्यातापञ्चमीस्याद्वसुन्धरा॥ सरस्वतीरमागौरीदुर्गा
तुनवमीभवेत्॥ पश्चाद्दत्तवचर्षश्चयजेद्वालंविचक्षणः॥ पश्चाद्वोवटुकःक्षेत्रोनववर्गगणेश्वरः॥ तथा॥ प्रदद्यादासनं
वाचाद्यंपाद्यंसमर्पयेत्॥ रमयार्घन्निवेद्याथस्त्रियाचन्दनमर्पयेत्॥ कुमारीशक्तिवीजेनसद्यात्कुसुमोच्चयं॥ चैतन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मजुनामन्त्री पृपदीयादिकं दिकंदिशेत् ॥ नाराएनेसमाख्याताम्न गुर्ड्वसमन्विताः ॥ विन्दुनादसमाक्रान्तश्चेतस्यमजुरीरितः
क्रचिन्भैरवबीजन्तु पञ्चमःप्रणवोमतः ॥ महाकालसंहितायां ॥ भूषणानि दुकूलानिसिन्दूरालक्तकावपि ॥ कज्जलादर्शविरचि
ततालहन्तानि पेटिका ॥ परिकर्म्माधारचोलमञ्चिकापीठदोलिकाः ॥ पश्चातिथावचमञ्जुपापादुके कृपयष्टके ॥ वन्त्रानये
यसंव्याने तथोद्वर्त्तनभाजनं ॥ शय्योयधानपर्य्यङ्कासमजुञ्चषप्रसाधनी ॥ शनिखाहश्चसिंदोलानपासीमनवर्त्तिका ॥ गोरो
चनामृगमदोकर्पूरकुंकुमन्तथा ॥ स्वमादीनिचान्यानि पावच्छकानिसुन्दरी ॥ प्रदानव्यानि वस्तूनि कुमारीत्युष्यनेयथा ॥
तथा ॥ ततोयस्यापितंपात्रंकुमार्य्यैप्रतिपादयेत् ॥ स्वीकुर्य्यात्साचतच्चैवतथायत्नसमाचरेत् ॥ अगृहीतेतुतन्मात्रेमहान्दो
षोऽभिजायते ॥ अतोयत्नस्तथाकार्य्यःस्वीक्रियेतयथातया ॥ ततोगृहीत्वाक्रमुमाक्षतेनस्याःकलेवरे ॥ पश्चाशन्संख्य
काःशक्तीःक्रमतःपरिपूजयेत् ॥ ताइदानींप्रवक्ष्यामिसावधानानिशामय ॥ आद्याजयाचविजयाऋद्धिसमायपानिता
कलाचसिद्धिदासूक्ष्माप्रभास्यानन्दप्रभाननः ॥ विपूतावविभूद्धिश्चनन्दिनीचविभूतिशुक ॥ अपराजिताचललिताल
क्ष्मीगौरीतथैवच ॥ श्रद्धामेधाचगायत्रीसावित्रीचसुधाप्रतः ॥ स्वाहेच्छेचक्रियाविद्याप्रज्ञादीप्तावचेतना ॥ मजाज्ये
ष्टातथोमाचशिवाचमुदिताक्षमा ॥ श्रद्धाथविमलाकोन्त्रापिवैविशदाननः ॥ अशोकाशानदान्वैवबलदाराज्यदापि
व ॥ मैत्रीतरदन्वरूद्राणीभवानीचमृडान्यपि ॥ सर्वज्ञावरिउकाचापिकुमारीसर्वदोषगा ॥ पञ्चाशत्संख्यकाएताःकुमार्यो

॥राम॥
॥१३८॥

146

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाक्तयस्मृता ॥ भैरवानष्टन दत्तु पूजयेदक्षतादिभिः ॥ भैरवीभ्यस्तनोधि प्रविनायकेभ्योस्त्वच ॥ वटुकक्षेत्रपालाभ्यां योगिनी
भ्यस्तथैवच ॥ भूतेभ्यः क्षेत्रपक्षेभ्योडाकिनीभ्यस्तथैवच ॥ कुर्वीत पूजनं देवि कुसुमाक्षतचन्दनैः ॥ पुनरष्टौ सर्वशोभे हेत्वादे
वीयजेत्प्रिये ॥ महामायाकालरात्रीनतो वै सर्वमङ्गला ॥ पूज्या डमरुकापश्चाद्गजराजेश्वरी तथा ॥ संपन्नप्रदा भगवती कु
मारी नदनन्दनं ॥ यामले ॥ कुलान्तः पूजयेद्देवीं कुलकोणाधिमायजेत् ॥ कामेश्वरी च वज्रेशी त्रिनीया भगमालिनी ॥ उपवि
ष्टाकुलबन्धकोणेष्वेतास्समर्चयेत् ॥ अनङ्गकुसुमानङ्गमन्मथानङ्गपूर्विका ॥ मदनानङ्गाबाध्याय चतुर्थी कुसुमातुरा
पञ्चमनंगमदनातुरानबापदादिका ॥ शिशिराकथिता सेनाः याज्ञयोरससंस्थका ॥ अनेन विधिना पूजा कुमारी साधकोत्त
मैः ॥ महाकालसंहितायां ॥ समाप्येत्थं कुमार्यर्च्चां तन्मुखे विचारिणा ॥ वर्तुलं मण्डलं कृत्वा तन्मध्ये कुलकासिनीं ॥ विलिखय
जलकुसुमाक्षतचन्दनतागजैः ॥ पूजयेन्मण्डलं तत्र भुमयैतमोवदेत् ॥ स्थालीगतनस्सर्वमन्नन्तत्र निवेशाहि ॥ नाना
विधान्नसामग्रींलेह्यचोष्यादिघटितां ॥ मांसमीनसुरापर्णभक्ष्यचर्व्यादिपूरितां ॥ कुमारीदक्षहस्तस्थ स्थापयित्वान्न मूर्ध
नि ॥ उत्तमुद्रूपमानेन मनुनान्नं समुत्सृजेत् ॥ तथा ॥ इतरासां कुमारीणां प्रत्येकं पूजनश्चरेत् ॥ गन्धपुष्पैर्धूपदीपैर्नै
वेद्यैरन्नसंभृतैः ॥ तथा ॥ अतानिपात इश्यान्ससेसु रब्याये कलितानि हि ॥ अन्याभ्यस्ताह शाम्येव दानत्वान्येय निश्चय ॥ फ
लफलं तु सुरव्याया ज्ञेयमन्त्रविपश्चिता ॥ उच्छ्रानासुकुमारीसुनवूर्यध्वनिमाचरेत् ॥ नामन्त्रचमनोदद्यात्तस्या यन्नैवक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ना॰भ॥
॥१२८॥

लयेत्॥ कोलाहलनिषेधेन अमन्त्रालानियानिवा॥ रुदितायानवामूत्रयत्ने नविवर्ज्जयेत्॥ सावधानोभवेदत्र किमादो
भक्षयन्नच॥ मिथः किम्वाप्यजल्पन्तितत्रवाचस्तुनिस्पृहा॥ कुत्र दृष्टिंप्रक्षिपन्तिभीताः किंवा वदन्त्यमूः॥ इत्यादिनानाज
ल्पैश्चप्रसंग्रासंप्रयत्नतः॥ सावधानतयातेयाभद्राभद्रसमस्तकाः॥ भक्षयन्तीष्टुतास्वेवं पठेन्मन्त्रोत्तमत्वं॥ कृताञ्जलिर्न्न
म्रशिरा आसामन्वेक्षिपन् दृशो॥ जयकालिमहाभीमेभीमरावेभयापहे॥ संसारदवाग्निरर्व्वदेहिनांविनाशिनि॥ ब्र
ह्मेन्द्रोपेन्द्रभूतेशप्रमुखामरवन्दिते॥ सर्गपालनसंहारकारिणिहितमारिणि॥ गुह्यकालीपरानन्दरसपूरितविग्रहे॥
परब्रह्मरसास्वादकैवल्यानन्ददायिनि॥ गुणातीतेपिसगुणोमहाकल्पान्तनर्त्तननर्त्तकि॥ कुमारीरूपमास्थायविज्ञाय
ज्ञासुरूपिणी॥ आगतासिममागारं द्वारं ग्रह्वीसमाप्नये॥ साम्वत्सरिककलाणासुवनायनथैवच॥ धन्योस्मि कृतकृत्यो
स्मि सफलंजीवितंमम॥ यस्मात्वमीदृशं कृत्वाकौमारंरूपमुत्तमं॥ गुह्यकालिसमायातापिकपूजाजिघृक्षया॥ त्वमेवै
तेनरूपेणदेवेभ्यः प्रार्थितापुरा॥ दत्तवत्यसिसाम्राज्यवरानपिसमीहितान्॥ महासमयपदेवोर्ध्ववरन्देहिसम्पूजितः॥
त्रैलोक्यसृष्टिसामर्थ्यंत्वंगुरादत्तवत्यसि॥ विष्णवेचत्वमेवादास्त्थापालनशक्तिता॥ महारुद्रायसंहारकर्तृत्वमददाः
शिवे॥ देवेभ्यश्चापिदैत्यानांनाशनेदक्षतामपि॥ अन्येषामपिमर्त्यानांनिविलोकीवासिनामपि॥ निवेदयामिकिमहंस
र्वकर्म्मैकसाक्षिणि॥ शत्रुनाशं राज्यलाभं शरीरारोग्यमेवच॥ त्वत्प्रसादात्सुजयोर्वृद्धिं क्रियाचेहंचतुर्वेवराणव॥ नमस्तेभगव

147

॥ राम ॥
॥१२८॥

८५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्र्यम्बनमस्ते भक्तवत्सले ॥ नमस्ते जगदाधाररूपिणि त्राहि मां सदा ॥ मातर्न्न वेद्मि रूपत्वेन शरीरं न वा गुणं ॥ भक्त्याहन्नु स्थि
तया पूजां न वजानाम्यनन्यधीः ॥ त्वं माता त्वं पिता बन्धुस्त्वमेव जगदीश्वरि ॥ त्वं गतिः शरणं त्वं स्वर्गस्त्वं मोक्षस्त्वं च ॥
विहाय त्वां जगन्मातर्न्नान्यां जानामि देवतां ॥ नमस्तेस्तु नमस्तेस्तु नमस्तेस्तु नमो नमः ॥ इति भिः श्लोकैः स्तुतिं कुर्यात्कुमारीणाम्
एनन्ते ॥ दद्याद्दत्तमनीयं हि भोजनानन्तरं नरः ॥ ततः प्रदद्यात्ताम्बूलं मृगचर्म्माधिवासितं ॥ सद्वाद्यादिभिः सावदत्तु ब्रह्म
विसर्ज्जयेत्तत् ॥ शुभाशुभफलं वक्ष्ये सांप्रतं तव पार्वति ॥ तव याग भुभवक्ष्ये वियदि नन्त नोस्य च ॥ तत्तु छिद्र तन्तो द्य
ज्जमुकेभ्योथ भूतले ॥ निरवनेद अवा देवि समलोद्य विसर्ज्जयेत् ॥ आदौ भक्तेकरे दत्ते अभिक्षं विषये भवेत् ॥ पय
से यजमानस्य पशुवृद्धिः प्रजायते ॥ घृते स्याद्वराधिकं प्रजा नैश्वर्यमृत्यने ॥ तथा मोदकशष्कलोः सन्तानिर्वृयसी
भवेत् ॥ मत्स्यजाति स्वार्थलाभः कृशरे यानसंपदः ॥ मांसे तु पुत्रलाभः स्यात्ते मनेकामिनी भवेत् ॥ फलं मांसं विशेषत
भिन्नभिन्नं ब्रुवे हितत् ॥ अर्थलाभस्त्व वाराहे स्वाङ्गे विजयो रणे ॥ माहिषे गानु मांसे नराज्यप्राप्तिर्ध्रुवे दयं ॥ आरो
ग्यं हारिणे नाभुक्ताङ्गे सारेण वाग्मिता ॥ शासे मेधाविनां गच्छेद्यज्ञेयजरत्नानपि ॥ आवेयेयतलेदे वि सर्वकल्याण
माप्नुयात् ॥ कामठे मेदिनीलाभो वहन्ननत्वश्व राज्ञावे ॥ वाङ्गीनसे शत्रुनाशो हंसे मत्तजव प्रपना ॥ नेत्रिरे ३भी स्त्रसिद्धि
श्चवर्त्तके पापसंक्षयः ॥ ननस्थो घोरसातायां फले क्षौहिंश्वव ग्रना ॥ कीर्तिस्तु महती राहुन्धे संपदत्तमा ॥ यि स्तके न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना॰भ ॥
॥१२९॥

नयावाप्निःशाकेचरिपुसंक्षयः॥ शालायांपुरपहृन्निस्याच्चोथसंपन्नुवाग्मिनां॥ धनागमःफाणि नेत्रकूर्च्चिकायांवलोन्न
ति॥ नम्रीहृत्नाककूष्माण्डकारवेल्लयपोलकैः॥ घोषसस्यादीप्रांघ्रिमूलकैस्सेमनेक्षते॥ विद्यालाभोभवेद्देविनकेवा
कपटुनापिच॥ गोधूमचूर्णघटितनवसुनिधनिभावने॥ देव्यान्तक्षेभवेन्मोक्षोमण्डयेषुन्ननिर्द्ववेतन्॥ चामरछत्रये
ऽलहून्नपर्य्यंकयोर्दीप॥ घराब्दर्पणयोश्चापिहृग्दानेभूनिरूत्तमा॥ आकल्पालंकरणयोःस्पर्शचालनदृष्टिषु॥
नानाविधानिसौख्यानिभवन्तिमहिलःप्रिये॥ एवंविधानिभूयांसिवेष्टितान्यम्बानानिच॥ भुभादेवीनिजायतेविप
रीतान्यतःश्रृणु॥ मुखभूगाकुमारीवेहुमतिनिधित्रिवारकं॥ दुर्भिक्षंजायतेवश्यंप्रजाःसुःपीडिताअपि॥ राजाविनाशमा
यातिकुमार्य्यारोदनेक्षते॥ उच्चारेतुमहामारीपुरीषेपुरदाहनं॥ अभोजनेशत्रुभयमापदोवऊभोजने॥ अभावरोत्वा
पदाःसुर्विपदेवऊभावरो॥ उपसर्गावऊविधाश्चेस्यान्करयादयोः॥ अनितळ्ज्जाविनाशायनथानिर्लज्जनाश्चे॥ ना
नोत्थानासुमौनस्पुःस्वायेवाकोर्विनाशनं॥ सर्वनाशासुभीनाथांकुप्रयांमृत्युरेवच॥ आवेशेनस्सरणप्रजाम्नपनेनाच
संशयः॥ शक्तिनाथांशत्रुशङ्काश्चानानाथानीतितोभयं॥ विजितायांतुविज्ञेयंनजाछुस्येवयानतनं॥ मोहेविन्नविनाशः
स्याज्ञप्रेपूजावनिःफला॥ चाञ्चलेचञ्चलालक्ष्मीःपूजकस्येवजायते॥ विषादवन्मथयदिकुमारीनजायते॥ सरू
जंसप्रजंराष्ट्रंनदासीदतियावनि॥ रोगेणमृत्युर्नेराजायदिरूग्णाप्रजायते॥ दुर्भिक्षमरकानन्यायशक्रणिविमुच्चर

148

॥ राम ॥
॥१२९॥

५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति॥ सर्वनाशो भवेन्नर्हि धूनोति यदि मस्तकं॥ चलायाति पुनस्त्वा संसस्यराज्ञः प्रदक्षिणे॥ कलेसनिस्याद्विगुरवीकालिका
परमेश्वरी॥ नीचैःशिरश्चैन्कुरुते अस्यनुस्थानदेश्वरी॥ हीनाङ्गुःस्यात्तदा पृथ्वीपतिश्चेक्रुद्धदस्वरा॥ पूजकस्य भवेद्दैन्यं
व्याकुला यदि जायते॥ मोहेन व्याकुलायान्तु सर्वन्नगरमाकुलं॥ व्रीडितायां भवेद्रोगः स्वेदे घर्षधनक्षयः॥ अधोवायुप्रम
जनि चेत्कुमारी दैवयोगतः॥ पीडितं परचक्रेण तत्तदा भवति पत्तनं॥ गीतं गायति चेत्तच्चक्रकुमारी रहिता क्रिया॥ स मन्त्रा रा
ष्ट्रं न नयत्पारस्य नृपते र्मृतिः॥ स रोग नाभिस्कन्धचिन्तु स्वाविवदते यदि॥ तदास्य मायान्यकस्मान्परचक्रं सुदारुणं॥ पक
याचित्सा क्षुत्क्षयेन केनचिद्देवता॥ कुमारी भाषते वीनभयमत्राक्ष साक्षसा॥ पूजायत्नेन दानस्य विषय यथुषडीयनः॥
वन्या संपदि भक्ष्यस्य कुर्वते करवालनैः॥ व्यस्लं स मस्तं भवति मनसो वाञ्छितं प्रिये॥ उपायनीकृतं यद्यद्वस्तु देवैत्रु
मरुडये॥ तच्चेत्कराभ्यां स्पृशति कान्दिशीको भवेन्नृपः॥ निर्वापयति चेद्दीपं कुमारी मुखमारुतैः॥ वृद्धिध्वंसो भवेन्न
हि ज्ञानदीपस्य नश्यति॥ दैवयोगाच्छिन्नमणिः कुमार्याश्चेन्नृस्वराकुलाः॥ स राजकः स विषयः श्मशानमिव जायते॥ वसां
सुन्दरजनयाः स्पृश्यदि चक्रकुमारिका॥ शत्रुभिर्ह्रियते नर्हि राजा समवमूर्द्धनि॥ यदि पुरुषान्कर्हि चेत्करोधत्वा भ्रमति
च॥ भूतावेशः क्षीनिद्रा स्यात्रास्य ते नात्र संशयः॥ उच्चैरिष्यामि हस्तस्थावाव दनीस्यं कुमारिका॥ भोजनावसरे नर्हि म
हामारीभयं भवेत्॥ वामे वा दक्षिणे वापि चलना रकया दृशा॥ रक्तो यया प्रगीयते शिरः सस्य कुमारिका॥ कुरुते वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हतसंसायेनचस्मन्निमानवाः॥ भूमावेशो भवेत्तर्हि येनानृत्यन्ति वा पुरं॥ दत्वैःह्नानृपीठपित्वाकुर्याल्कटकमरवं॥ यथानि
सदनंमृत्योस्सदारस्वनवांधवः॥ हयावनिमिषेकृत्वासन्दसोष्टंरदेनहि॥ सनर्जयनिशीर्षंश्चेन्कलयन्नकुमारिका॥ न
देवफलउद्दिष्टंयत्स्यान्नकटकेतरवे॥ आयान्निकंभजेन्मौनंकरेणान्नंस्पृशेनच॥ शिरोन्यर्पश्चनमयेदगुष्ठेनलिखेद्र
वं॥ विदध्याद्भूनरेखांकरजैर्न्निःप्रयोजनं॥ संहृताभ्यांकराभ्यांश्चकराहुयेदथवाशिरः॥ नराणाम्यकारणांछित्वादन्तांगुष्ठेनलि
खेद्भुवं॥ लीस्फोटमाचरेन्॥ पाणिभ्यांमुडयच्चेवोकर्णौपिदधातिवा॥ कुर्वीतवावाऊरिकांपासिपृष्ठिस्करोतिवा॥ महान्न
ग्रासमादत्तेमुखंव्यादयानिष्टति॥ अन्नोपरिक्षुतन्धन्नेनृंभराम्वामुहुर्मुहुः॥ स्पृशेत्वापाणिनावान्नंचनुर्ईऊक्षिपन्यपि॥ उ
त्थायवापवलनिन्यक्तान्नंपुजनंतथा॥ आयानिवमनंत्वास्याःस्यानांरोमाश्चवेपथु॥ निर्गच्छेनोवानश्नात्रान्नपृयासेहेमन्न
ए॥ अकस्मादेवकुरुतेकाकुक्त्वेक्ताकारणाम्विना॥ श्वश्रीतंवत्वानितथासुवक्तापैषरेदिति॥ आमुक्तालंकृतीसुक्वेकृहंयासा
मिवावदेत्॥ यस्यकस्यापिवाकुर्याच्चर्मतंनन्स्थलेस्थिता॥ उपालभेनवाकश्चित्सर्वैरास्याउपेर्गुर्ष॥ भिनन्तिवाउनिदानं
साम्वहस्तवलयानिवा॥ कृनेमृतस्यकस्यापिवध्योःशोचतितनचस्ता॥ यत्किञ्चिद्दाषलयतिनिर्स्सिमितुंकुमारिका॥ सर्वमेत
दमत्ज्ञात्संविज्ञेयंत्रिदशार्चिते॥ दुर्भिक्षंधननाश्चरोगोमारीभयन्तथा॥ पदेपदेचविपदःशोकोव्याधिरिपूद्भतिः॥ परच
क्रागमेकस्मादग्निदाहःपुरेगृहे॥ मृतन्त्वासश्वदारिद्र्यंविच्छेदोवन्धुभिस्सह॥ भूतप्रेतपिशाचारीनिवेशोपिगृहेगृहे॥ अ

149

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्टभिस्तु महारोगै प्रजानां निधनं भवेत्॥ इतस्ततः प्रधावन्ति लोका भयनिपीडिताः॥ किम्बहूक्तेन देवेशि शिल्पआकान्तिको भवेत्
इतरेषाम–पस्तु भयं राजा म्पहञ्जवेत्॥ कुमारीवेष्टितं न च राज्ञायते हि शुभाशुभं॥ वार्षिकश्च फलं राज्ञो जयो वाथ पराजयः॥
मन्त्रउः स्वन्धनं सौख्यं शत्रुभीनिर्वलो न्नतिः॥ राज्यवृद्धिः प्रजापीडा व्यञ्जना उनीकसंक्षयं॥ कुमारीपूजनात्सर्वं ज्ञायते भोजनाद
पि॥ परीक्षं यत्नतस्तस्या ज्ञातास्वस्य शुभाशुभं॥ अर्च्चितोपि विशेषेण भोजनेन तु रेश्वरि॥ जातेशुभे समीचीनं हृन्ते तदिनरक्षि
कामार्च्चिवकुसंभारैर्द्दोषनत्ज निवारयेत्॥ निह्नमस्य गृहं या ना यदि रुष्टा कुमारिका॥ तस्मिन्नेवा ह्नि भवेत्तथापि न शुभं फलं॥
इत्यादिफलवाहुल्यं शुभस्याप्यशुभस्य च॥ मयाविविच्यकथितं धूपस्व हृदि पत्तनः॥ ततो निशीथसमयेविधिवत्परूजनन्ततः
पीठमन्त्रैः प्रकुर्वीत धूपदीपानुलेपनैः॥ नैवेद्यैरुपहारैश्च गीतवाद्यादिभिस्तथा॥ यामले॥ कुमारीपूजिता ह्नि कर्त्तुं यत्सर्वंस
न्निनं॥ कुमारीका विजानीयात्साक्षात्प्रकृतिरूपिणी॥ पत्रं पुष्पं फलं तोयं यत्किञ्चित्दद्भुशोभनं॥ अन्नत फलदं श्रेष्ठं कुमार्य्यै
चैत्समर्पयेत्॥ भोजिता चेत्कुमारी स्याज्जोजितं भुवनत्रयं॥ ब्राह्मणाय सुशीलाय कुमारीयस्समर्पयेत्॥ पृथिवीदानजंपु
ण्यं सोश्नुते नात्रसंशयः॥ सर्वसिद्धिमाप्नोति यः कुमारीं समर्पयेत्॥ वसन्तिसततं देहे कुमार्य्यां योगिनीगणाः॥ अतः पूज्या
नमः स्यात्साधकालती–तदिच्छया॥ अशक्तया पूजयेदेकां कुमारीं साधको नमः॥ विनाकुमारिका पूजां न पर्वपरिहापयेत्॥ यो
निस्थ मर्च्चयेदेतां तस्यस्यात्सिद्धिरुत्तमा॥ नवरात्रे समायाते नवम्यान्तु निशीथनी॥ तातो पचारै रभ्यर्च्चैत्कुमारी हस्तिपूर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ता·भ॥
॥१४१॥

कं ॥ तु त्रिक्रमेणाऽपजेद्दाभिक्षितांसि त्रिमात्रुयान् ॥ अथवा पूजयेन्मन्त्री भुवनीर्ल्लवसंख्यकाः ॥ हृद्रेखा गणना रकाम हे कुम्भाक
पालिका ॥ इच्छाज्ञानाक्रिया दुर्गा नवनामभिरीरिता ॥ पूर्ववत् पूजयेन्मन्त्री जपेन्नाष्टं सहस्रकं ॥ यदि सा शोभमायाति स्वयमे
व विलासिनी ॥ तया ~ हृनयेद्राद्विवासरस्वानिशीनधीः कुमारीन स्तुहो देवभावयुक्तेन चेतसा ॥ अथान्यन्मन्त्रुमाख्येनिनोचे
देवी परमेश्वरी ॥ इति कुमारीपूजाविधिः ॥ ॥ अथ शिवाबलिः ॥ कुलचूडामणौ ॥ विल्वमूलेथान्तरे वा श्मशाने वापि साधकः
मांसखण्डान् नैवेद्यं संध्याकाले निवेदयेत् ॥ महाकालसंहितायां ॥ पुरा च हिर्न्निस्मकाले महारण्यसमीपतः ॥ गृहीत्वा भक्ष
वस्तूनि पूजासंभृतिमप्युत ॥ आम्रैरजुगमोहितेः प्रदद्यात् फेरवीबलिं ॥ आमानि पक्वान्यपि च मांसानि विधिनार्पयेत् ॥ तत्रो
दीचीदिग्वनो वीतभीः शुचिः रुञ्जिन शारणायामं पउञ्चाश्च विधाय घ्रंषपूज्य च ॥ उत्थाय मुक्तचिकुरः शिवा याकारयेद्व
नेः ॥ कुलचूडामणौ ॥ कालिकालीति वक्तव्यं नच सा शिवरूपिणी ॥ पशुरूपा समायाति परिवारगणैस्सह ॥ भुक्तारौ निय
देशान्तां मुखमुत्तोलासुखलं ॥ तदेव मङ्गलं तत्स्थानान्यथा कुलभूषणां ॥ अवश्यमन्नदाने न नियमनोषयेच्छिवां ॥ नित्यश्रा
द्धं यथा सन्ध्यावन्दनं पितृतर्पणं ॥ तथेयं कुलदेवीनां नित्यमाकुलपूजने ॥ पशुरूपां शिवान्देवीं यो नार्च्चयति निर्ज्जनं ॥
शिवाराचेयानस्याभूत्सर्वन्तज्जपनिनिष्फलं ॥ जपपूजाविधानानि यत्किञ्चित्सुकृतानि च ॥ गृहीत्वा शापमासाद्य शिवा रोदि ॥राम॥
ति निर्ज्जने ॥ एकया तुष्टया नेयत्तच्छिवया देवभैरवः ॥ तत्तैवसर्वशक्तीनां प्रीतिः परमदुर्लभा ॥ पशुशक्तिर्न्नरशक्तिः पक्षि ॥१४१॥

150

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाकिश्च भैरवः ॥ पूजिता विगुणं कर्म्म सगुणं स्यात्त्वयेयत ॥ तेन सर्वप्रयत्नेन कर्त्तव्यं पूजनं महत् ॥ राजादिभयमापन्नं देशान्तर
भयादिकं ॥ शुभाशुभानि कर्म्माणि विविन्नवतिमाहरेत् ॥ शृणु देवि महाभागे शिवे कालाग्निरूपिणि ॥ शुभाशुभफलप्राप्तिं
बुद्धिं शृणु वलिं तथा ॥ स्ववर्णाचार्यदानाद्यो वलिः कुलजनप्रिये ॥ महाकालसंहितायां ॥ स्थानादस्मादपसरन्तु किश्चि दूरन्तं प्रिये
शिवा यथा वीतभया आगच्छन्त्वन्नसन्निधौ ॥ नत्वस्थित्वा निरीक्ष्येत किं किं तान्भक्षयन्ति हि ॥ सर्व्वा आगमश्चेत्सर्वं यदन्नं भक्षय
न्ति हि ॥ विनिर्दिशेत्सर्वसिद्धिं राजलाभं धनागमं ॥ यद्यन्नाभक्षयन्नन्नं नस्तन्फलमवाप्नुयात् ॥ यद्यच्च नैवराद्दनितन्नैव
फलं लभेत् ॥ कुमारीपूजनादौ तु विशेषस्योपवर्णितं ॥ तेन नानाचतुर्वेदे देवि ग्रन्थाधिक्यभयादपि ॥ कुमारीरूपमास्थाय यथा
यान्ति महेश्वरी ॥ शिवारूपं तथा कृत्वा स्वयमायाति कालिका ॥ ततो भक्तिः स्वकर्त्तव्या नासुपत्ने नसाधकैः ॥ शिवाशुभक्षय
न्तीशु सर्वेभ्यो वलिमाहरेत् ॥ संहरभैरवाद्यादौ वटुकेभ्यस्ततः परं ॥ विनायकेभ्यो मातृभ्यः क्षेत्रपालेभ्य एव च ॥ योगिनी
भ्यो डाकिनीभ्यः शिवदूतीभ्य एव च ॥ पुरोक्तो मन्त्र आसां हि तेन तेन वलिं हरेत् ॥ महद्दैश्वर्यमाप्नोति निःशेषं भक्षयन्ति चेत्
अर्द्धं तु मध्यमां सिद्धिरभक्ष्य तु विपद्भवेत् ॥ कुलचूडामणौ ॥ यदि नो गृह्णते वत्स तदा नैव शुभं भवेत् ॥ शुभं यदि भवेत्तत्र तु
ज्यते न दृश्यते नः ॥ महाकालसंहितायां ॥ खादित्वा भ्यायान्ति ष्टस्तेशिवा हुं देषु नत्वा हि ॥ दण्डवत्प्रणमेत्सर्वाः स्ते ह देवी धि
या ॥ पुष्पाञ्जलिं समादाय गन्धचन्दनचर्च्चितं ॥ उत्थाय मुक्तविकुरो मीलितनेत्रो दिगम्बरः ॥ भक्तिभावी नभयः किश्चित्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ता·म ॥
॥१४२॥

प्रणमकश्वर ॥ स्तुतिं कुर्यान्नमस्वरे नैवेद्यार्थनपूर्वकं ॥ शिवारूपधरे देवि गुह्यकालि नमोस्तु ते ॥ उल्कामुखि ललजिह्वे घो
ररावे भृङ्गगामिनी ॥ श्मशानवासिनि प्रेते नेत्रवमांसप्रियेऽनघे ॥ अरण्यचारिणि शिवे जम्बुकरूपिणी ॥ नमोस्तु ते महामाये
जगत्तारिणि कालिके ॥ मातङ्गि कुकुटे रौद्रि महाकालि नमोस्तु ते ॥ सर्वसिद्धिप्रदे भीमे भयङ्करि भयापहे ॥ प्रसन्ना भव देवे॰
शि मम भक्तस्य चण्डिके ॥ संसारतारणि तारे जय सर्वशुभङ्करि ॥ विप्रस्त्र चिकुरे चण्डे चामुण्डे मुण्डमालिनी ॥ संहारकारि
णी क्रुद्धे सर्वसिद्धिप्रदायिके ॥ दुर्गे किराति शावरि प्रेतासनगतेऽभये ॥ अनुग्रहं कुरु सदा कृपया मां विलोकय ॥ राज्यं प्र
ज्ञा विकटे वित्तमायुः सुतान् स्त्रियं ॥ शिवावलिप्रदानेन त्वं प्रसन्ना भवेश्वरि ॥ नमस्तेस्तु नमस्तेस्तु नमस्तेस्तु नमोस्तु ते ॥ इ
त्यनेः रष्टभिः श्लोकैः शिवास्तोत्रमुदीरयेत् ॥ न नखच्छेदयमन्त्रं यज्ञजनन्वा न देववा ॥ सर्वं हि निखने ज्ञमे प्रयत्नेवैव पार्व
ति ॥ यदि काकः खरः श्वानो ये चान्ये पापजातयः ॥ भक्षयन्ति तदुच्छिष्टं तदा विघ्नः प्रजायते ॥ तस्मादेव समागच्छेन्निर्जने
विपिनान्तरे ॥ आगम्य गन्धपुष्पाद्यैः पुन देवीं प्रपूजयेत् ॥ कुलवृक्षमथो ॥ एवं ज्ञात्वा महादेव शान्तिस्वस्त्ययनञ्च देत्
पचपचगंगविघ्ननिवारणंततः ॥ कुरुसिद्धिंमेसमुच्चार्य्यप्रदद्यात्स्वाहयान्वितं ॥ नाराचमनुनादेविप्रथमोबलिरीरितः ॥ माषा

167

॥ राम ॥
॥१५८॥

६५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्तेभैरवान्मध्यात्र्यानकयइन्ननः॥ पूर्ववद्बलिमाहृत्य दक्षिणे बलिमाहरेत्॥ हूमनेन च महाकालान्तु पश्चात्पूर्ववदुद्धरेत्
पश्चिमे कालदेवाय प्रणवाद्येन कल्पयेत्॥ शवाने कालशवाने भैरवान्नेयदन्नन॥ श्मशानाधिपतये त्वेव पूर्ववच्चोत्तरे हृ
रेत्॥ चितामध्ये तु नो दद्याद्बलित्रयमतन्द्रितम्॥ कालरात्रि महाकाले कालिके घोरनिस्वने॥ गृहाणेमम्बलिम्मातर्देहि मे
सिद्धिमुत्तमां॥ हूं कालिकायै स्वाहेति दत्वा भ्रमनाथाय चार्पयेत्॥ शवाने भ्रमनाथाने श्मशानाधिपतये नमः॥ प्रणवाद्येन
मन्त्रेण दापयेद्बलिमुत्तमं॥ हूं सर्वगणनाथ श्मशानाधिपतये नमः॥ प्रणवाद्येन मन्त्रेण दापयेद्बलिमुत्तमं॥ तत्पश्चात्
पश्चिमेन एकीकृत्यास्य संचय॥ ॐ ह्रीं आधारशक्तये नमः इत्यमुनापुनः॥ पञ्चगव्येन संप्रोक्ष्य भूर्जे वा चट्टपत्रके॥ ह
सौ रिति लिखेन्मन्त्रं स्थापयेत्तत्र तन्मनुः॥ कन्दलाद्यासनं तत्र विन्यस्याधारशक्तये॥ नमः इत्यमुना तत्र क्रीं मायाद्य प्रपूज
येत्॥ वीरार्द्दनेन देवेशि उपविश्यासनेन नमः॥ कूर्चबीजद्वयं देवि मायायुग्मं ततः परं॥ कालिके घोरदंष्ट्रे च प्रचण्डे चण्ड
नायिके॥ दानवान् दारयेत्युक्त्वा हनेति विघ्नपयन्ननः॥ परवीरं महाविघ्नं छेदय विघ्नयं ननः॥ वर्मास्त्रान्तो विघ्नान्तो यं वीरा
र्दनमन्त्रमनः॥ अनेन मंत्रितं लोष्ठं दशदिक्षु विनिःक्षिपेत्॥ तन्मध्ये भैरवो देवो नः परिभ्रमयते॥ यदि प्रमादाद्देवेशि सा
धको भयविह्वलः॥ नैसे सैक्ष्यसु हृद्भिश्च दक्षिणे नाभिभ्रमयते॥ अर्के नु सिन वाद्यालम्लोन्विर्भिनवनिर्का॥ प्रदीपन्तत्र
संस्थाप्य अचनेनत्तत्र पूजयेत्॥ हनेनस्मिन्न शदीयेवि घ्नौष्यपरिभ्रमयते॥ तदधश्चास्त्रमंत्रेणानि खनेत्कुलदीपिकां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ता॰भ ॥ ततत्कलशविधानेन भूतशुद्ध्यादिकं चरेत् ॥ षोडशाद्यानारकाद्यापि विन्यस्य पूजयेत्ततः ॥ अत्रैव यामलादिः ॥ ततः पञ्चोपचा
॥१५९॥ रेण पुरो देवतां यजेत् ॥ विमील्य चक्षुषी पश्चाद्देवं ध्यात्वा मनुं जपेत् ॥ एकाक्षरी यदि भवेद्दिक्सहस्रं ततो जपेत् ॥ द्य
क्षरे चाष्टसाहस्रं त्र्यक्षरे चायुतार्द्धकं ॥ ततः परन्तु मन्त्रेतोगज्ञानकसहस्रकं ॥ गजाननकसहस्रं अष्टोत्तरसहस्रवा ॥ निशा
र्द्धे तु समारभ्य उदयान्तं समाचरेत् ॥ यथासंख्यं भयत्कर्सने चैव स्त्रेणावं धयेत् ॥ ततोर्द्ध्वं एतत्त्रिपर्यन्तं यत्किंचिन्न लक्ष्यते ॥ ज
पतुर्गामतुनाघं तेनैव सर्षपान्क्षिपेत् ॥ ॐ निलोमिलो मदेवस्रो गोसवस्तुभ्रि कारकः ॥ पितॄणां स्वर्गदातान्त्वं मर्त्यानाम
मरक्षस ॥ भूतप्रेतपिशाचानां विघ्नेषु ग्रान्तिकारक ॥ इति क्षिप्त्वा तिलान्सर्वचतुर्द्दिग्गैः शिवादिनः ॥ ततः सप्तपदं गत्वा पुन
स्तत्रैव संविशेत् ॥ एवं तत्रापि संपूज्य प्रजपेन्मनुं ॥ निर्भयः प्रजपेत्तावद्यावत्स्त्रिः प्रजायते ॥ भयं तु स्वप्नवत्केयं यदि c
क्रियेयमाचरेदिति ॥ वामकेश्वरतन्त्रे ॥ जपान्ते च बलिं दद्याद्देवतायै यथाविधि ॥ महिषं छागलं चापि गृहीत्वा चरमेव
च ॥ गृहमाछेत्तु दुर्गेस्मार्द्दम हृष्टमानसः ॥ इति चिता साधनविधिः ॥ ॥ अथ शवसाधनविधिः ॥ वीरतन्त्रे ॥ पूर्वोक्त
मुपहारादिसमादाय तु साधकं ॥ साधयेत्स्वहितां सिद्धिं साधनस्थानमाश्रयेत् ॥ गुरुध्यानादिकं सर्वं पूर्वोक्तमाश्रयेत्सुधीः ॥ राम ॥
वीरार्द्दनाङ्कितेत्मैमायाम्मोहेन विघ्नने ॥ येचात्रेत्यादिमन्त्रेण भूमौ पुष्पाञ्जलित्रयं ॥ श्मशानाधिपतीनान्तु पूर्ववद्बलि ॥१५९॥
माहरेत् ॥ अघोरास्त्रेण मन्त्रेण वर्ति साधनमाचरेत् ॥ सुदर्शनेन वा रक्षा उभाभ्यामथवा एककल्पयेत् ॥ मायास्फुरदथ यं भयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रस्फुरद्दिनयंश्चनः ॥ घोरघोरतरैस्तेन दन्तुरूपप्रदन्तनः । वज्रमुण्डाग्नेर्वज्रंवडिदिनयंननः ॥ कट्टत्वमंत्र मत्तुमननो वज्र
मुगननः ॥ घातयद्दिनयं वर्म्मक्रूडनस्समुदाहृतं ॥ एकयश्चाग्रदर्स्नायम घोरास्त्रमयोमनुः ॥ हालाहलं समुद्भूतस्य हस्ता
रस्वरूपकं ॥ वर्म्मास्त्रान्तं महामन्त्रं सुदर्शनस्य कीर्त्तितं ॥ भूतभुक्तिननः कृत्वा न्यासजालं प्रविन्यसेत् ॥ जयदुर्गास्य मन्त्रे(
ण) सर्वयानृदिक्षुनिःक्षिपेत् ॥ ॐ दुर्गे दुर्गे रक्षिणि स्वाहे निजयदुर्गास्य मंत्रेनिलोसीनिचमच्च रातिला नोयविनिःक्षि
पेत् ॥ यांश्चिविन्दुं भलविन्दुं रवजविन्दुपयोमृतं ॥ रक्तविन्दुं सर्पदष्टं चाण्डालध्वापिभिन्नकंनकं ॥ नरुराणसुन्दरं भ्रेरं रत्तो
नष्टं समुज्वलं ॥ पलायनविभ्रमघ्नं संग्रामे रणवर्जितं ॥ स्वेछामृतं विवर्णं च हठं स्त्रीश्वछिन्नं तथा ॥ अन्नाभावमृतं(
कुष्ठं सन्नरात्रो दुर्गं तथा ॥ एवं चाष्टविधं मन्त्रा पूर्वोक्तान्यन मंत्रावं ॥ शृत्वा मूलमंत्रेण पूजास्थाने समानयेत् ॥ चारण
लाग्रभिन्नवाग्रा ग्रंसिद्धिफलप्रदं ॥ प्रणावायस्त्रमन्त्रेणाग्राव स्पर्शेक्षणां च रेत् ॥ प्रणवं कूर्च्चवीजश्च मृनकायनमस्तुभ्य
ं ॥ पुष्पाञ्जलिं चयन्त्वाष्टणवेन्न मस्पूर्वकं ॥ देवी रपरमानन्दशिवानन्दकुलेश्वर ॥ आनन्दभैरवाकारदेवीपर्य्यंक
र ॥ वीरेहं त्वं प्रपद्यामि उत्तिष्ठ चण्डिकार्चने ॥ प्रणम्यानेन मंत्रेणाश्वास्येन्नन्दनं नरं ॥ नारंथ्राध्वं मृतकायनमोनं मन्त्रम
चाने ॥ शवस्नापन मन्त्रोयं सर्वतन्त्रेषु देशितः ॥ धूपेन धूपितं कृत्वा गंधादीनाञ्जलिर्यच ॥ रक्ताक्तो यदि देवेशान भक्षये
कुलसाधकं ॥ गत्वा शवस्य सान्निध्यं धारयेत्कटिदेशतः ॥ यज्ञोपवीतवदेतस्य दत्वा निष्ठीवनं मुखे ॥ पुनः प्रक्षालितं कु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताजपस्थानं समानयेत् ॥ कुशाद्यायां परिस्तन्यन्नत्र संस्थापयेद्ध्रुवं ॥ एतालवङ्गाकर्पूरजातीखदिरसारकैः ॥ तांबूलं तत्र दे
दत्वा शवं कुर्यादधोमुखं ॥ स्नापयित्वा तस्य पृष्ठं चन्दनेन विलेपयेत् ॥ बाहुमूलादिकट्यन्तं चतुरस्रं विभावयेत् ॥ मध्ये पद्मं
चतुर्द्वारं दलाष्टकसमन्वितं ॥ ततश्चैनेयमजिनं कम्बलान्तरितं न्यसेत् ॥ पादयोर्ज्जलमानेन यज्ञकाष्ठानि दिक्षु च ॥ सं
स्थाप्य पूजयेत्तत्र इन्द्रादिदशदेवता ॥ विषमिन्द्राय संलिख्य सुराधिपतये नमः ॥ इमं वलिं गृह्ण गृह्ण गृह्णाय स्वयुगन्ततः
विघ्ननिवारणं कृत्वा सिद्धिप्रय कुठद्वयं ॥ अनेन मनुना पूर्वे वलिं दद्याच्च सामिषं ॥ स्वस्वनामादिकं दत्वा पूर्ववद्वलिं
माहरेत् ॥ सर्वेषां लोकपालानां ततः साधकसत्तमः ॥ शवाधिष्ठातृदेवेभ्यो वलिं दद्यान्तु रयासह ॥ चतुःषष्टियोगि
नीभ्यो डाकिनीभ्यो वलिं दिशेत् ॥ पूजाद्रव्यसन्निधौ च हरेचोत्तरसाधकं ॥ संस्थाप्यासनमभ्यर्च्य सुमन्त्रेनेच यत्नतः
फडित्यनेन मन्त्रेण नत्वाश्वारोहणाविशेत् ॥ कुशान्वा दत्तले दत्वा पादकेशान्प्रमार्ज्य च ॥ हत्वान्तेवध्धजुटिकां कृत्वा सम्य
क्साधकः ॥ शवोपरि समारूढः प्राणायामं विधाय च ॥ वीरार्द्धेनेन मन्त्रेण दिक्षु लोष्ठान् समाक्षिपेत् ॥ ततो देवस्य
सम्पूजा उपचारैः सुविस्तरैः ॥ शवास्य विधिवद्देवि देवध्यानमाचरेत् ॥ उत्थाय संमुखे स्थित्वा पठेद्भक्तिपरायणः ॥
ॐ वशो मे भव देवेश ममामुकपदत्ततः ॥ सिद्धि देहि महाभाग कृताश्रमपरस्तुतः ॥ मूलं समुच्चरन्मन्त्री शववप
दयन्ततः ॥ पदस्पर्शेण वध्नीयात्तदोत्थातुं न शक्यते ॥ ॐ भीम भीरुभयाभाव भवलोचनभावुक ॥ त्राहि मां देवदेवे

169

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शशवानामधिपाधिप ॥ हनियादनलेनस्पत्रिकोणंचक्रमुष्टिरेवन् ॥ नरोभ्यानुंनशक्नोतिशावोपिविश्वलोभवेत् ॥ उपविश्यपु
नस्तस्यवाहूनिस्थायार्थयोः ॥ इस्तयोः कुसुमांजलींप्रपादौनत्रनिधापयेत् ॥ ओष्ठौनुसंपुटौकृत्वास्थिरचित्तः स्थिरेन्द्रियः ॥ स
दादेवींहृदिध्यात्वामौनीतुजपमाचरेत् ॥ श्मशानेप्रोक्तसंख्याभिर्जपंकुर्यात्कुलेश्वरः ॥ अथवारंभकालात्तुयावद्वोदयनेर
विः ॥ यग्रदर्शनात्रपर्यंतंजप्ते किंचिन्नलभते ॥ नशपूर्ववद्दृष्टिसंप्रयादगतानिच ॥ कृत्वोपविश्यनत्वेवजपंकुर्यादन
न्यधी ॥ चलासनाद्भयन्नास्तिभयेजातेवदेत्ततः ॥ यत्वार्थयासिदेवेशिदानर्थंकृतज्ञएवकिं ॥ दिनानन्तरेष्वदास्यामिस्व
नामकथयस्वमे ॥ इत्युक्तासंस्कृतेनैवनिर्भयस्तुपुनर्जपेत् ॥ पुनश्चेन्मधुरंकिंचिद्वक्तव्यंमधुरंजनः ॥ नदास्यन्यत्र
सत्कार्यंवरंप्रार्थयेन्नरः ॥ यदिसम्यंनकुर्याच्चवरस्थानपथपहृति ॥ नदापुनर्जपेद्धीमानेकाग्रंमानसंजपेत् ॥
नरस्येरणाच्चदेवोनरोयोवासपर्यति ॥ यन्ननसैनवोद्भवंनरोवादेवयोनयः ॥ मातावानन्तुनावापिमातुलानीनवापि
वा ॥ आगत्यविघ्नश्वरनेमाययासाधविग्रहं ॥ उत्तिष्ठवन्सनेकार्यंसर्वंजानन्नसंशयः ॥ एवमानसमयोजानस्वतृपिता
कोग्रनेष्टहे ॥ घायेरणसकलालोकाराजानोदण्डधारिणः ॥ कदाचित्केनाप्यादिष्टसदाकिंनेकरिष्यति ॥ इत्यादिविविध
र्वाक्यैर्न्निजापंपारंसंत्यजेत् ॥ मृताः पितृगणास्तत्रइष्टदेशनिवासिनः ॥ बांधवास्तत्रमायानिदेवरूपधरास्ततः ॥ स्त्री
पुत्रसेवकांश्चैवदृष्ट्वातानीयनेपरैः ॥ वदन्तिपुत्रकास्सर्वेभ्रातरोऽनुजाग्रिष्यकाः ॥ निजकान्तास्तसंस्पर्शंवस्त्राग्रामर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णादिकं ॥ गृहीत्वानीयनेयन्नियालकैस्सञ्चयंत्यजेत् ॥ दिवसेयत्रवाशंकासैवनत्रप्रजायते ॥ यदिनक्षुभ्यतेतत्रदाकिवनल
भ्यते ॥ स्त्रीरूपधारिणीदेवीद्विजरूपधरःप्रमान् ॥ वरंगृह्णीतिशाद्वैवैद्विवाराननेवरंलभेत् ॥ साधुनासाधुनावापियोषित्वे
दुरदायिनी ॥ नपावीरयनेत्संसाकिंवासिद्धनिभमन्ते ॥ निःपापःपुरुषश्चैवकृतेचैवसुसंस्कृतः ॥ असंस्कृतवरादेवीया
ययुक्तानसंशयः ॥ संमुखेसंमुखेवापिसंस्कृतंवक्तिचापरं ॥ सैवदेवीनसन्देहःसदेवोभैरवःस्वयं ॥ नचेद्देवंभवेद्वैवमा
यापुटिनविग्रहा ॥ वरयेत्तवरंनत्रनवरंप्रवदेत्कचित् ॥ सचेत्संस्कृतमाख्यातंवक्तिवक्तव्यमीदृशं ॥ नचेत्त्वयंलोकिकोक्त्या
वरंग्राह्यंनिराकुलं ॥ अथवाउत्कटंकिंचिल्लभेताप्यात्मनोहितं ॥ शाकोवाजायतेसम्यगमृतंवापिलभ्यते ॥ सर्वविचार्यगृही
त्वयमेवंदिकपरिकीर्त्तिता ॥ देवाहूतनयेवरंधानरोयाकृतनयःक्वचित् ॥ अवश्यंनचभेनवंननत्रप्रत्ययःक्वचित् ॥ भैरवाच
एकाश्चैवकुलशास्त्रपरायणाः ॥ रुतत्वात्सत्वसंगेनकृत्याकुटिलविग्रहाः ॥ पत्नीभूत्वावरयेत्तुनारीभूत्वाविमोहयेत् ॥ त
स्मात्तत्वपरोवीरोविचारेयत्नमाचरेत् ॥ समकृतेवरंलब्धामन्त्रजपेत्त्वजपादिकंज्ञानंफलमितिज्ञात्वाजुटिकांमोचयेन्न
नः ॥ संप्रक्षाल्यवसंस्थाप्यवक्ष्यतंमोचयेन्मदे ॥ पटवकंमार्द्धयित्वापूजाद्रव्यंजलेक्षिपेत् ॥ शवंजलेथगर्त्तेवानिःक्षिप्य
स्नानमाचरेत् ॥ ततस्तुस्वगृहंगत्वावलिन्दत्वादिनान्तरे ॥ अग्निमराचोरयेषांदेवानांयजमानोहंनेरटक्रतुमयादत्तंवलि
मिमं ॥ अथयेर्याविनश्याश्चनरकंजरत्मकराः ॥ दत्वापिष्टमयानेवकर्त्तव्यंसंप्रयोषनं ॥ नचानरेपि ॥ यवक्षोदमयं

170

॥ राम ॥
॥१६१॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वापि शान्तिक्षोदमयं पथवा ॥ चन्द्रहासेन विधिवत्तत्तन्मन्त्रेणाधानयेत् ॥ यद्वेदोक्तं नित्यमाचार्यपयं च गव्यं पिबेत्ततः ॥ ब्राह्मणा
न् भोजयेत्तत्र पञ्चविंशतिसंख्यकान् ॥ पश्च पञ्चविंशतिनाम्ना क्रमान्नैव दशावधि ॥ ततः स्नात्वा च भुक्त्वा च निवसेदुत्तमस्थ
ले ॥ यदि तस्यापि प्रभोज्यं न यतिनिर्दिष्टं तत्तां व्रजेत् ॥ तेन चैन्निर्दिष्टत्वं स्थानदादेवः प्रकुप्यति ॥ त्रिरात्रं च स्वाध्याय श्रान्तं गेये येकु
लसाधनं ॥ शाम्भायां यदि गच्छेदेनश व्याधिः प्रजायते ॥ गीतं भक्त्वा च वधिरो निम्बश्रुन्त्वन्य दर्शनात् ॥ यदि वक्ति दिनेवास
नशसमृकतां व्रजेत् ॥ पञ्चरथ्यादिना नाहि देहे देवस्य संस्थितिः ॥ गोब्राह्मणानान्देवानाम्निदानं कुर्यात्तत्क्व चित् ॥ देव
गोब्राह्मणादीश्च यस्मद्धन्तु मृत्युशोकादिः ॥ ज्ञानर्निर्मक्रियानेनु विल्वपत्रोदकं पिबेत् ॥ ततः स्नात्वा नु तीर्थोदौ प्राज्ञो वोदशवास
रे ॥ स्वाहा तन्मन्तन्त्राथ्यं तर्पयामि नमश्च दं ॥ सर्वज्ञानन्त्रयाइर्द्धं देवानां तर्पयंशांजलैः ॥ मुनि तर्पणाष्टभ्यस्तस्मादेवस
तर्पणं ॥ तृप्तिरिमर्थः ॥ इत्यनेन विधानेन सिद्धिं श्रीतिनिश्चितं ॥ इह भुक्त्वा वरान्दिव्यानन्ते याति हरेः पदं ॥ असाध्यं
साध्यमपि वा निष्फलं सफलं स्ववा ॥ कृत्वा साधनमेवैतन्त् शक्तैः प्रियतमो भवेत् ॥ शवाभावे श्मशाने वा कर्तव्या वीरसाध
ना ॥ यो भावो यस्य यो शेक्तसेद्धिवेर्यादिनाश्रयेत् ॥ इह शक्रमयोगेन भ्रष्टो भवति साधकः ॥ नो यदि ज्ञानेन तत्र भावेन पूजा
नच स्मन्दिशेत् ॥ श्मशाने नष्टहीन्वानु यावत्क्षुद्रिः प्रजायते ॥ ॥ इति महामहोपाध्याय सद्गुरु श्रीनरसिंहविरचिते
नारायणीक्रियाधारणी वेवीरसाधनविधिर्नवमस्तरङ्गः समाप्तः ॥ ९ ॥ अथ कामं ॥ कालीनत्रे ॥ आदौ पुरस्क्रियां कुर्यात्क्रिय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेन यथाविधि। न नस्सिद्धमनुर्मंत्री प्रयोगाहनि चान्यथा ॥ फेत्कारिणीतन्त्रे ॥ शान्तिकादीनि कर्म्माणि यथा रन्तिथियोग
नः॥ प्रारब्धव्यानि विधिना नन्त्र संप्रोच्यते ऽधुना ॥ शान्तिवश्यस्तंभनानि द्वेषणोच्चाटनेन नः॥ मारणान्तानि यत्कर्म्माणि
मनीषिणः॥ पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ॥ बुधेज्यवारसंयुक्ता शान्तिकर्म्मणि पूजिता ॥ कार्त्तिकी चतुर्दशी नवम
ष्टमी मन्दवारका ॥ उच्चाटने निषिद्धा साध्यदेवेषु विशेषतः ॥ चतुर्दश्यष्टमी कृष्णा अमावास्या तथैव च ॥ मंदारार्क्कदिनो
पेता शस्ता मारणकर्म्मणि ॥ बुधचन्द्रदिनोपेता यष्ठी दशमी तथा ॥ पौर्णमासी च विज्ञेया तिथिः स्तम्भनकर्म्मणि ॥ शु
भं भूत्यै दयेकर्यो दश भाषु भोदय ॥ रौद्रकर्म्माणि रिक्ता कृष्णपक्षे तु योगेन च मारणं ॥ कार्त्तिके स्वयमस्य सम्बन्धिनी ॥ इज्यो
गुरुः मन्दः शनिः आरः कुजः ॥ पिङ्गलामते ॥ अथ राशिदेवि वक्ष्यामि वारनिथ्यर्क्षदेवताः ॥ रवेः सूर्यः शिवो देवि चन्द्रसो
मान्तकौ ततः ॥ भौमे च मङ्गलेशश्चैव बुध विष्णुस्ततः परं ॥ परे गुरुश्चतुर्वक्त्रो भृगोभुक्पुरन्दरौ ॥ मन्दे शनैश्चरः कालो वा
रेखा देवि कीर्त्तिताः ॥ ब्रह्मा विधाता विष्णुश्च यमः शीतकरो गुहः ॥ इन्द्रश्च वसवो नागा धर्म्मः शिव दिवाकरौ ॥ मन्मथश्च
कलिश्चैव विश्वेदेवास्तिथीश्वराः ॥ दस्रो तु पितरो देवि पूर्णमास्यां वैयचारकैः ॥ अश्विनी च यमो वह्निर्ब्रह्मेन्दुश्च शिवो दिति
गुरुः कद्रुजा पितरो भगोर्यमदिने श्वराः ॥ त्वष्टा वायुस्तथैन्द्राग्नी मित्र इन्द्रस्ततः प्रिये ॥ निर्ऋतिश्चैव नो पश्च विश्वेदेवाः
प्रजापतिः ॥ विष्णुश्च वसवो देवि वरुणाश्चाजरकया ॥ अहिर्बुध्न्यश्च पूषा च वेकानक्षत्रदेवताः ॥ एतास्वैव पञ्चारेस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नद्दिनेषु समर्च्चयेत् ॥ षण्णावर्षेभ्यन्तु थीडेः युतैर्न्नाजभिरीश्वरि ॥ ब्रह्मयामले ॥ मरणे वर्ज्जयेद्विद्वान्नन्यांश्चापि सुधार्म्मिकान् ।
स्त्रीजनव्यतिरेकेषु राजवैरिषु योजयेत् ॥ स्वरोषमनोवालोकानां रक्षार्थञ्चानदावरेत् ॥ नन्तु लोभाद्भयाद्वापि कुर्य्यान्मन्त्री तु मारणं
प्रायश्चित्तं च कर्त्तव्यं देवि नित्यं दोषशान्तये ॥ अष्टोत्तरं जपेन्मन्त्री जुहुयाद्वा वदीश्वरि ॥ स्वघ्नेः पायसैर्द्देवि निलैर्वा वीरवन्दिते
आत्मरक्षा च कर्त्तव्या कर्म्मकाले सदा बुधैः ॥ पञ्चमीश्वरीतन्त्रे ॥ क्रूरकर्म्मसु देवेशि कर्म्म कृत्वा यथाविधि ॥ नैत्यल्पकः पुनः
स्नानः साङ्गां सावरणां बुधः ॥ अभ्यर्च्च्य देवतामिष्टामात्मरक्षार्थमद्रिजे ॥ जपेन्मन्त्रं प्रसन्नात्मा सहस्रं साधकेश्वरि ॥ मां रक्षर
क्षवेमुक्त्वा पुष्पाण्यं विसृजेच्छिवे ॥ भस्मेसु हृद्भिः सुगन्धैरात्मरक्षान्तु कारयेत् ॥ मृत्युञ्जयादिभिर्द्देवि प्रयोगस्सेन चाग्गना
जयहे मर्त्त्वनाश्रेष्वत्रा स्मरणाराधनादिभिः ॥ कुलार्णवे ॥ प्रयोगान्ते तथा चक्रपूजां मन्त्री समाचरेत् ॥ स्कन्दलक्षं जपेन्मन्त्री ध्या
नन्याससमन्वितः ॥ प्रयोगदोषशान्त्यर्थमात्मरक्षार्थमेव च ॥ नचेन्नफलमाप्नोति देवताशापमाप्नुयात् ॥ इत्थं क्रूरतर
विषयं ॥ तथा ॥ काम्यप्रयोगकर्त्तृणां परलोको न विद्यते ॥ प्रयोगसिद्धिरेवैषां फलमन्यन्न विद्यते ॥ एकस्मिन्हि विधानस्य न
कुत्रापि फलदं ॥ देवेशि दृश्यते यस्मान्निष्कामो देवतां भजेत् ॥ तन्त्रान्तरे ॥ गायत्रीमयुतं जप्त्वा सिद्धोऽपि प्राविनाशिनीं
कृत्वा चाभ्युदयश्राद्धं हविष्याशी वरेद्विधिं ॥ मारणादिप्रयोगेषु ज्ञात्वा शत्रोर्ग्रहादिकं ॥ प्रयोगं प्रारभेत्तत्र ज्ञश्चान्यथा ऽ
निष्वमाप्नुयात् ॥ शत्रोर्यदि शुभःकालस्तदा नैव समाचरेत् ॥ यदा तस्याष्टमे भौमो राहुः केतुश्च चन्द्रमाः ॥ दुष्टा नभश्चरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केन्द्रे लग्ने गोक्तं समागतः॥ अष्टमस्थोऽथवा षष्ठः क्रूरमध्यमितोऽथवा॥ द्वादशो शस्तथ क्रूरमध्यान्यापोक्लिमस्थितः॥
दग्धश्चाष्टं समायान स्तदा मरणमाभवेत्॥ अन्येपि यदि वारो गास्तुरीन ष्टस्मरकाः॥ त्यो निःशास्त्वा न दत्तान्ना प्रारभे
त्मारणादिकं॥ आयुर्हीयन्त याज्ञात्वा दशापाकम्विशालधीः॥ सन्याद्युषिकृनः पुंभिष्टयो गोनिष्फलो भवेत्॥ भौमस्य च दशने
र्वपिराहोर्वा चेद्दशा भवेत्॥ न यानुमारणं कर्म कुर्यात्मान्त्रिकसत्तमः॥ शचोरथुभनक्षत्रे चंद्रे वारे तिथौ तथा॥ लग्नेल
ग्नस्य योगादिकाले स्वस्य शुभे तथा॥ प्रारभेत् क्रूरकर्माणि विधिमास्थाय मान्त्रिकः॥ नवमे शस्तुनीये षोलग्नेश्वयपरिवेः
स्वकत्रस्यान्तदावन्चो दृष्टिर्वापयपरस्परं॥ न दैवाज्ञाटनं कुर्यादन्यथा निष्ठमावहत्॥ यदिसाध्यग्रहोऽष्टो मासस्थसन्त्तव
स्तथा॥ न यान स्यशुभं कर्म न कुर्यादिति निश्चितं॥ आरंभे महतीं पूजां कृत्वा देवस्य यत्नतः॥ गुरुं संपूज्य यत्नेन ब्राह्मणा
नपि भोजयेत्॥ कुलार्णवे॥ तिथिवारर्क्षकरणयोगमासर्तुपक्षकं॥ दीपेस कर्मचक्राणि ज्ञात्वा कर्माणि साधयेत्॥
कर्मचक्रप्रशस्तकं॥ तथा॥ पञ्चपञ्चाशनप्राणायामन्यासाक्षमातिका॥ दोषसंस्काररणादीन् ज्ञात्वा मन्त्राणि साध
येत्॥ दोषाश्छिन्नादयः संस्कारा जननादयः॥ राशिचक्रं यथा॥ वालंगैरंश्रुरं शोणं शमिज्ञो भनि राशिषु॥ क्रमेणाभेदि
नावर्णाः कं त्याष्यांशाद्यः स्मृता॥ लग्नो धनभ्रातृबन्धुपुत्रामित्र कलत्रकाः॥ मरणं धर्मकर्मायव्यया द्वादशराशयः
तथा च॥ स्वद्वितीयराशीयमन्त्रेणाधनार्थं पञ्चमराशीयेन ष्वर्थं सप्तमराशीये न भार्यार्थं योगकार्य्यः॥ एवमन्य

172

60

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दयत्सं अत्र राशिनक्षत्रयोश्चक्रे मंत्रवर्णानामाद्यक्षरं यत्र यत्र तत्र तन्निदेवसाधकस्यापि राशिनक्षत्रं तज्जन्मराशिनक्ष
त्रं ॥ तथा समेन त्वप्रणायन वैयर्थ्यं मन्त्रमात्रार्थताया विनिगमकाभावात् ॥ राशिचक्रमधिकृत्य तेन मन्त्रघवर्गो
नन्त्वाद्यक्षरेणाव ॥ गणायेयत्तु षष्ठ्याद्यष्टमस्याद्वाशुवा ॥ रिपोर्मन्त्राद्यवर्णस्यात जन्मनस्याहितं भवेदिति तंत्ररा
जवचनाच्च ॥ वस्तुतस्तु ॥ एकैकं यस्य वर्णर्क्षं तस्य जन्मर्क्षतो भवेत् ॥ प्रशस्तं यत्तमं यस्य तस्य नामर्क्षतो वदेत् ॥ इति पि
ङ्गलामतवचनाद्यवस्था ॥ तथा ॥ कोष्ठे वा अवनारखेराशिवर्णानुकूलता ॥ अतमैत्रीं तथा मंत्रं ज्ञात्वा मन्त्राणि साध
येत् ॥ कोष्ठं ॥ अकथहादिचक्रं ॥ यथा तन्त्रराजे ॥ प्राक्प्रत्यक् दक्षिणोदक्कृतरचनयद्वकयोगतः ॥ कोष्ठानि षोडशात्रसु
लेखुवर्णान् क्रमाल्लिखेत् ॥ चतुश्चतुर्विभागेन कल्पयेत्तानि वै क्रमात् ॥ प्रथमे प्रथमे चाद्यं द्वितीयं प्रथमे तथा ॥
द्वितीयमपि तन्वान्यत्तथान्यदपि कल्पयेत् ॥ ततस्तु कोष्ठेषु विलिखेत्तन्मन्त्रमक्षरं ॥ एवं चतुर्षु कोष्ठेषु सातावं
धि समालिखेत् ॥ स्वनामाद्यक्षरं यत्र कोष्ठे सन्दृश्यते यथा ॥ सिद्धादीन् गणयेद्यावन्मन्त्राद्यक्षरदर्शनं ॥ सिद्धसिद्धो
जपात्सिद्धो द्विगुणात् सिद्धसाध्यकः ॥ सिद्धसुसिद्धः संप्राप्त्या सिद्धारिर्हन्ति गोत्रजं ॥ साध्यसिद्धोति संक्लेशात् सा
ध्यसाध्योतिदुःखकृत् ॥ साध्ये सुसिद्धो भजनात् साध्यारिः स्वाश्रियं हरेत् ॥ सुसिद्धसिद्धोध्ययनात् फलं दद्याद्यथेप्सि
तं ॥ सुसिद्धसाध्यो जप्याद्यैः सिद्ध्येत्स्यादिनोऽन्यथा ॥ सुसिद्धसुसिद्धस्तत्क्षणाद्धि विघ्नराज्ञः पात् ॥ पूर्वजन्मकृतश्रमः ॥ त

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मानं सर्वसिद्धीनां साधको योजयेन्मनुं ॥ अभिचारे रिपोरेवं यदिस्वान्नविपर्यये ॥ सुसिद्धारिरहो येवास्य तु
ल्यान्वादायेत्कृवं ॥ अरिसिद्धः सुतं हन्याद्‌रिसाध्यः स्वयोषितं ॥ अरिसुसिद्धमन्त्रस्तु कुलोन्मादनकृद्भवेन्‌:
अर्थाऽरिः स्वात्महा मंत्रः संप्रोक्तश्च तु निश्चितं ॥ पिङ्गलामतेन तु ॥ यथोक्तान् सिद्धसिद्धस्तु तन्त्राध्यो विधिनाऽऽ
ज्ञपात् ॥ जपार्द्धान्नन्तु सिद्धस्तु न दरिद्रो भवापहः ॥ द्विगुणाज्जपान्त्साध्यसिद्धस्वन्त्राध्यस्तु निरर्थकः ॥ नन्तु
सिद्धः सार्द्धजपान्न दरिद्रोऽत्रजापहः ॥ सुसिद्धसिद्धोऽर्द्धजपान्तन्त्राध्यो विधिनाज्जपात् ॥ नन्तु सिद्धोऽथवा देवत
दरिज्ञोऽनिजानहा ॥ अरिसिद्धः सुतं हन्याद्‌रिसाध्यस्तु कन्यकां ॥ नन्तु सिद्धस्तु पत्नीघ्नस्तदरिः साधकाय ह
इति ॥ पिङ्गलामते ॥ प्रसिद्धं यच्च वे नाम किंवा स्यजन्मनामच्च ॥ यतीनां पुण्यपानेन गुरुराणं यत्कृतं भवेत्
नाम्नस्तस्यैव वर्णानि विभक्तानि च कारयेत् ॥ अन्यत्रापि ॥ लोके प्रसिद्धनाम च मात्रा पित्रा तथा कृतं
अन्यत्रापि ॥ सुप्तो जागर्ति येनासौ इदरस्यार्ह प्रभाषते ॥ वदन्त्यन्ये मतं स्त्रोपि तन्नाम ग्राह्यमेव तु ॥ अन्य
त्रापि ॥ मातापितृकृतं नाम शोधनीयं प्रयत्नतः ॥ न च जन्मर्क्ष्याक्षरतो वीक्ष्यं न च मन्त्रादिमाक्षरं ॥ भिन्न
कं नजन्मनामैव यत्र प्रसिद्धिस्तमपरं ॥ तत्रैव प्रत्यक्षरं सिद्धादि गणनोक्ता ॥ मातापितृकृतं नाम यत्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्यभिजनैः कृतं ॥ विश्लिष्यन्तस्य वै वर्णान् स्वरवर्णविभेदनः ॥ तथैव मन्त्रवर्णास्तु नन्नशोधनमारभेत् ॥ विन्दुर्विदि
तु कोयध्मानीयजिह्वाग्रिसंभवः ॥ संहतोच्चारणाभ्रान्तमधिकाक्षरमेव च ॥ अपभ्रंशाक्षरं लक्षैर्नत्कारएट च नु
ष्ठ यं ॥ मन्त्राक्षरैः सहैकैकं नामवर्णान् विशोधयेत् ॥ व्यञ्जनैर्व्यञ्जनान्येव स्वरैस्सा ईस्वरांस्तथा ॥ आद्यमाद्येन सं
शोध्यं द्वितीयकं ॥ मन्त्रवाप्यथवा नाम्नि वर्णाः स्युर्विषमा यथा ॥ तदा मन्त्रं समारभ्य समं यावन्न पूरयेत् ॥ आद्य
नयोसिद्धवर्णा मन्त्रे यस्मिन् वराननो ॥ अचिरेणैव कालेन स तावत् सर्वसिद्धिदः ॥ साध्यनादिषु तोयस्तु सानि
कृष्णेण सिद्ध्यति ॥ आदावन्ते सुसिद्धस्स्य सर्वकामविभूतिदः ॥ आदावन्ते रिपुर्यस्य सम्भवेन्त्याज्य स्तम मन्त्रकः ॥
आदौ सिद्धोऽन्यसाध्यो यो दिग्गुणेन स सिद्ध्यति ॥ आदौ सिद्धः सुसिद्धश्चेत् यथोक्तान्त सिध्यते जपात् ॥ आदौ सिद्धोऽ
न्त शत्रुश्च सन्त्याज्यो मन्त्रिसत्तमैः ॥ साध्यादिश्चैव सिद्धान्तस्त्रिगुणान् सिध्यते जपात् ॥ आदौ साध्यः सुसिद्धान्तः शोध
मार्गेणास्य सिद्ध्यति ॥ सुसिध्यादिस्तु साध्यान्तश्चतुर्गुणमपेक्षते ॥ सुसिद्धादिश्चान्तशत्रुर्मध्यमः परिकीर्त्तितः ॥ आ
द्यारिश्चान्तसिद्धादिः सोपित्याज्यो हि कर्मणि ॥ आदौ नध्यनथा वाञ्छे सिद्धः शुभफलप्रदः ॥ सर्वसाध्यउदासीनः
प्रोक्तस्तत्रैव स्वयं भुवा ॥ स्यान्तत्रिनयसुसिद्धस्सर्वनर्थश्च साधयेत् ॥ स्यानत्रिनयगनारिर्मन्त्रोमृत्युन्तसंश

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ता॰म ॥
॥ १६५ ॥

य ॥ सिद्धादिः साध्यसुस्मानो व्यर्थ इत्युच्यते बुधैः ॥ सिद्धादिर्द्विसुसिद्धान्तः सर्वकार्य्यार्थसाधकः ॥ सिद्धादिररिसुस्मानो ना
शकः संप्रकीर्त्तितः ॥ शत्रु ब्रूमनियदा दो मध्ये सिद्धसदन्तके साध्यः ॥ कष्टेन कार्य्यसिद्धिस्तस्य फलं स्वल्पमेव भवति ॥ अ
न्ते यदि भवति रिपुः प्रथमे मध्ये च भवति साध्यसुगं ॥ कार्य्यविलंबितं स्यात् प्रयासपनि सिद्धमेवान्ते ॥ आद्यन्तयोर्यदि
साध्ये मध्ये सिद्धिः प्रजायते ॥ आद्यन्तयोर्यदा सिद्धा मध्ये साध्यः प्रजायते ॥ नाद्यन्तौ साध्यसिद्धौ हि जयाधिको न सिद्धतः
आरिसंपुटितः सिद्धसुसिद्धो हि तथा भवेत् ॥ सर्वनाशकरो ज्ञेयः साधकस्य न संशयः ॥ सिद्धेनान्तरितः साध्यः सु
सिद्धान्तरितोऽथवा ॥ शीघ्रं सिध्यति मन्त्रोयमीशानः स्वयमब्रवीत् ॥ सिद्धेनान्तरितः शत्रुः सुसिद्धेनापि चेद्भवेत्
नासौ रिपुर्द्भवेन्मन्त्रं किन्तु कष्टेन सिध्यति ॥ साध्यान्तरितसिद्धसुसिसिद्धोपि न पायदि ॥ इद्दशं लक्षणं दृष्ट्वा दूर
तः परिवर्ज्जयेत् ॥ रिपुराशिस्थितो मन्त्रो नैव देयः कदाचनेति ॥ नारायणीयेति ॥ उच्चाराद्दुष्टरो मन्त्रो यः स्यात्तत्त्वावि
निन्दितमिति ॥ स्ववर्णानुकूलेन मन्त्रेणापराणि पं साधयेदित्यर्थः ॥ पिंगलायां ॥ रक्षुदोषेषु सर्वेषु मयाकाममथा
पि वा ॥ क्षिप्तवाचोष्टियं दद्याद्दोषाणामिव विमुक्तये ॥ नारात्स्विति ॥ नाराचकं यथा ॥ चापलोभात्पदुःशाम्नरुद्रस्यात्र
रुरु स्करं ॥ तोकलोयपडुःषायः खलौषो भेपुभेनिनाः ॥ वर्णाः क्रमात्स्वरान्योन्ये रेवसंज्ञगतो सदा ॥ जन्मसंपत्त्वि
पत्क्षेमप्रत्यरिः साधकोवधः ॥ मैत्रं परममैत्रं च जन्मादीनि पुनः पुनः ॥ अत्रापि पूर्व रेदवज्ज्ञेयं ॥ वाराहीतन्त्रे ॥ कोष्ठ

॥ राम ॥
॥ १६५ ॥

174

६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धिर्वैराद्धि च महानस्मात् कुलाकुलं ॥ नामादिचक्रं सर्वेषां भूनचक्रं तथैव च ॥ नाराभुद्धि वैष्णवानां कोष्ठशुद्धिः शिवेभ
वेत् ॥ ज्ञै पुंसां राशिशुद्धिः स्यात् श्रीपालेऽकडमः स्मृतः ॥ अकडमचक्रं यथा ॥ निःपरादकानकारादीन्मेषादिक्रमतो लि
खेत् ॥ सिद्धादीन् कलयेत्तत्तु नामाद्यक्षरादितः ॥ भूनमैत्रीमिति कुलाकुलचक्रमिमं स्पर्थः ॥ कुलाकुलचक्रं यथा
कुलाकुलपरीक्षायां प्रकारः कथ्यतेऽधुना ॥ वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात् ॥ पंचह्रस्वाः पंचदीर्घा
बिन्दुन्तास्सन्धिसंभवाः ॥ पंचवर्गाः कादयः यरलवशषसहान्तास्समीरिताः ॥ साधकस्याक्षरं पूर्वं मन्त्रस्यापि यदक्षल
पथ्येकभूतदैवमंत्रं जानीयात्सकुलं च तत् ॥ पार्थिवे वारुणाग्निन्त्वमाग्नेयस्यापि मारुतं ॥ पार्थिवाद्यक्षराणां त्व
शत्रुर्विमारुतं मतः ॥ आग्नेयस्याम्भसं शत्रुरंभसस्तैजसं तथा ॥ एषामपि च सर्वेषां विरोधिननाभसं ॥ पर
स्परविरुद्धानां न कुर्यान्मेलनं बुधः ॥ यन्त्रं षष्ठदचक्रं यथा ॥ कुलमूलावतारे ॥ षष्ठदं चक्रमालिख्य प्रागादिषु
दलेषु च ॥ अकादिवर्णाने के कंदि रखेन्निःषरादकुटकान् ॥ स्वनामाद्यक्षरं यच्च तत्पारम्भ विचारयेत् ॥ उदिनेसं
पदाद्दिष्टाद्वितीये संपदा क्षयः ॥ तृतीये तु धनं विद्याच्चतुर्थे बन्धुविग्रहः ॥ पञ्चमे संज्ञायाम्नास्यात् षष्ठः सर्वविना
शकः ॥ इदमुपलक्षणं ॥ गणागणा योनिफलीराशिवर्गचक्रत्र्यणधनचक्रात् कुलमप्यवलोकनीयं ॥ गणागणचक्रं यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना०भ ॥
॥१६६॥

हस्तस्वातिश्रुतिमृगपुष्यमैत्राश्विरेवती ॥ पुनर्वसू जयेरिति भानि देवानि मात्रिकाः ॥ पूर्वोत्तरात्रयभ्राद्रीभरणीरोहिणीतथा
मर्त्याहोमगणाः प्रोक्तो भान्येतानि विशारदैः ॥ चित्राश्लेषेमूलमघे धनिष्ठाज्येष्ठिके तथा ॥ वरुणः कृनकेन्द्राग्नी रक्षोगणा उ(
दाहृताः ॥ एकयोरुत्तमा प्रीतिर्द्वयोस्तु मध्यमा ॥ देवैस्मनुष्यैरपि महद्वससो वैरमुच्यते ॥ एवंबुद्धा बुधो मत्रं विधिनामे
लियोजयेत् ॥ अथ योनिचक्रं ॥ अश्वेभाजफणिद्वयं च हयमुख्ये षोनवो मूषिकश्वाख्वमैगः ॥ क्रमशस्तनोपिमाहिषी व्याघ्री
पुनः सैरिभी ॥ व्याघ्रैणौ मृगमार्जौ कपिरथो चक्र वयं वानरः ॥ सिंहोश्वो मृगराट्पशुश्च करटी योनिक्रमानादिवं ॥
हयमुखविडालः श्वा वभ्रुनकुलः करटी हस्ती विरोधकृत् ॥ गोव्याघ्रंगजसिंहमश्वमहिषं श्वैणं बभ्रुरगं ॥ वैरस्थान
रमेयकम्पसुमहन्मार्जारमूषन्तथा ॥ लोकानांप्यवधार्यत्नोन्य दपिवज्जान्वेति ॥ अथ फणिचक्रं ॥ क्रमेणाच विलेख्यानि
सप्तविंशानि भानि च ॥ अंकानि दापयेत्तत्र बुद्धो धर्म्यस्त्रिभिस्त्रिभिः ॥ सर्पाकारं भवेच्चक्रं नाडीचक्रं च कथ्यते ॥ याम
लेपि ॥ अश्विन्याद्यं लिखेच्चक्रं सर्पाकारं त्रिनाडिकं ॥ त्रिनाडीवेधनक्षत्रं मध्यन्याड्रीप्रगोत्तरा ॥ हस्ते त्वन्मूल(
वारुणपः पूर्वभाद्रपदा तथा ॥ याम्यः सौम्यागुरुर्ज्येष्ठा निष्ठामित्रजलाह्वयं ॥ धनिष्ठाचोत्तराषाढा मध्यनाडीव्य ॥ राम ॥
वस्थिता ॥ कृत्तिकारोहिणीसर्पोमघास्वातीविशाखके ॥ उत्तराश्रवणोपौष्णं पृष्ठनाडीव्यवस्थिता ॥ योनिः पूर्वैफल्गु ॥१६६॥
नीजलाह्वयं पूर्वयाष्ठा ॥ फलश्च ॥ एकनाडीस्थितायस्य गुरुमन्त्रश्च देवताः ॥ नचवेधस्त्वर्षामनस्तु क्रमेणाफलमा(

175

६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिशेत्॥ अथाष्टवर्गचक्रं॥ वर्गाष्टकं समाभ्याय मन्त्रं स्याङ्कुरत्वतः॥ अवर्गः पक्षिराड्ज्ञेयो मार्ज्जारश्च कवर्गकः॥
चवर्गश्च तथा सिंहः टवर्गश्चैव कुक्कुरः॥ तवर्गो नाग इत्युक्तो मूषकश्च पवर्गकः॥ यवर्गश्च गजो ज्ञेयः शवर्गो प्यजमे-
षकः॥ गरुडभुजगयोर्वैरं तथा च गजसिंहयोः॥ मार्ज्जारमूषयोर्वैरं तथा कुक्कुरमेषयोः॥ भुजङ्गसिंहयोर्मैत्री मेषमूषक-
योस्तथा॥ लोकादन्यच्च विज्ञेयं व्यवहारेषु योगतः॥ ताराधनचक्रं यथा॥ मन्त्रकोष्ठगणां॥ धनादिकं विदित्वा तु मनौ सिद्ध-
दिकेपि च॥ प्रवर्त्तितव्यं धीमद्भिर्वैकल्यं पदतोन्यथा॥ दक्षोत्तरायतं कुर्य्यात्तच्च पञ्चक उत्तमं॥ प्राक्पश्चिमगायताश्चैव भा-
नुरेखाः प्रकल्पयेत्॥ वैवस्वरोल्लिखेद्विद्वान् पञ्चकोष्ठे तथापरान्॥ पञ्चकमे मालिख्य कादिहान्तान्नोक्षरं॥ एकैक-
मेकादशस्वधिकेषु मतिमान् लिखेत्॥ दिग्भूगिरिग्रहाग्नि गजारामर्षीषु ज्ञिष इन्द्रकैः॥ गुणयेत्साधकस्यार्णान् स्वरव्यञ्ज-
नभेदिनान्॥ इन्दुनक्षत्रनयनरविपक्षदशाङ्गुभिः॥ ऋतुपयोधनागेन्द्रनवभिश्च तथा मनोः॥ नामार्णकोष्ठसंजातमथो आप्तसंख्या-
हितं क्रमात्॥ हृत्वा त्वोष्ठगणेनैव पञ्चपञ्चभिर्यथा॥ एवं यल्लब्धवस्तु नास्येगुणकाङ्का समासतः॥ ऋणमीननरेशानभा-
वकाः साधकाक्षरे॥ मन्त्रवर्णेषु नन्ननगभानु निम्नगाः॥ नामाष्टमलादक ठवार्हष्टभक्ताधिकं तु धैः॥ ज्ञात्वा भयोर्ण-
र्णां विद्यादधिकं शेषमङ्कवित्॥ उक्तश्च वस्वभिर्व्वागमाहरेदुभयोरपि॥ वाहुल्यं यत्र हृष्टेन बोधमर्णाः प्रकीर्त्तितः॥ धा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धीतेयस्यैर्म्मैवृत्तेशृङ्गीयन्नान्मनन्त्मैवे ॥ तदभावे समधनं धनिकत्वकदाचन ॥ वाराहीतन्त्रे ॥ मन्त्रो यद्यधिकाङ्कः स्या
त्तदा मन्त्रं जयेत्सुधीः ॥ समे पि च जयेन्मंत्रं न जयेत्तु ऋणाधिके ॥ अन्येषन्तु विजानीतस्मात्तु मंत्रं परित्यजेत् ॥ कादि
मनेऋणाद्यो धनषकादेयथा ॥ नामाद्यक्षरमारभ्य यावन्मन्त्रादिवर्णकं ॥ त्रिधाकृत्वा स्वरैर्भिन्द्यात्तदन्यद्विपरीत
कमिति ॥ स्वरैः सप्तभः विपरीतकमिति ॥ सप्तभिर्गुणानं त्रिभिर्विभजनं वैपरीत्यमिति राघवभट्टः ॥
तच्चिंत्यं साधकाङ्कस्य त्रिभिर्विभागे अङ्कत्रयाधिकाङ्कस्याशक्ते ॥ तस्मान्मात्तकावर्णगणनायामेव वैप
रीत्यं तदर्थः ॥ ॥ तन्त्रान्तरे ॥ साध्यमन्त्रं द्विगुणितं साधकेन समन्वितं ॥ अष्टाभिश्च हरेच्छेषं तदन्याद्विपरी
तकमिति ॥ अस्यार्थः ॥ मंत्राक्षराणि स्वरव्यंजनरूपेण पृथक्पृथक्कृतानि द्विगुणयेत् ॥ साधकनामाक्ष
राण्यपि स्वरव्यञ्जनरूपेण पृथक्पृथक्कृतानि तेष्व संयोजयेत् ॥ ॥ ततोऽष्टभिर्हरेत् ॥ अयं मन्त्रा
र्थः ॥ ॥ एवं साधकनामाक्षराणि स्वरव्यञ्जनरूपेण पृथक्कृतानि द्विगुणितानि स्वरव्यञ्जन
रूपेण पृथक्पृथक्मन्त्राक्षरैः ॥ ॥ संयोजितानि अष्टभिर्हरेत् ॥ ॥ एवं साधकराशिः ॥ ॥
एवं यस्योत्तरोर्ण्यो मन्त्रस्तेन तदनिष्टं यस्य चाधमर्णो यस्ते न तदिष्टं साधयदित्यर्थः ॥ चक्रभेदे

176

८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्ययेदित्यर्थः ॥ चक्रभेदे ॥ हरचक्रं षट्कलश्चक्षिप्रादिचक्रमेव च ॥ राशिनक्षत्रचक्रे च स्वकुलाकुलमेव च ॥ अकतत्वश्चाकठवे
च कुचक्रं तथैव च ॥ उक्तानि नव चक्राणि मन्त्रसिद्धिकराणि च ॥ नवचक्रविशुद्धात्मा मन्त्री भीष्टाय कल्पते ॥ गणचक्रविचारो
पि केषाञ्चित्त्वं मतः प्रिये ॥ अथातः संप्रवक्ष्यामि हरचक्रं महोदयं ॥ यज्ज्ञात्वाज्ञानवान्लोके जायते मन्त्रवित्तमः ॥ अन्यथाव
र्जयेन्मन्त्रमित्याह भगवान्शिवः ॥ तस्मात्सर्वप्रयत्नेन यः स्वधीसद्विचारयेत् ॥ ऊर्ध्वात्क्षेत्रन्तु देवानां ताराकोष्ठसुसन्निभं ॥
ताराकोष्ठं नक्षत्राणां आगशास्त्रे गणानशास्त्रे च जन्मसंपदित्यादिनामानि ॥ एतेन सन्धेनेन दिक्षु चतुःकोष्ठानि विदिक्षु च
तुःकोष्ठानि मध्ये कोष्ठमेकं ॥ तन्मध्ये विभजेत्कोष्ठे चतुष्कं कर्मसूत्रकं ॥ चतुष्कमिति ॥ मध्यसूत्रस्य पातनं नास्तीति चतुष्ट
यं त्वं ॥ अन्यथा कर्मसूत्रस्यच्छिन्नयत्वमेव ॥ किन्तु सूत्रचतुष्टयेदन्ते राशिचक्रात्मकं कोष्ठं भवतीत्यर्थः ॥ पातयेद्दिक्षु दुर्गा
श्च वाराहीं ताराश्च भैरवीं ॥ कर्णसूत्रस्योभयतन्त्रईशानादिषु योजयेत् ॥ त्रिपुरां भुवनेशीश्च पीठेशीश्चैव वज्रम्बकं ॥ वासुदेवं
श्रियश्चैव छिन्नमस्तां श्च षोडशीं ॥ ईशानाद्यग्निवस्वन्तं क्रमाच्चत्वरितां तथा ॥ इन्द्राक्षीश्चैव हेरम्बं पितामहमनन्तरं ॥ महा
मायाश्च कालीं च यदन्यत्सौम्यदैवतं ॥ ईशानाद्यमिति ॥ ईशानकोणमाद्यं कृत्वेत्यर्थः ॥ पश्चाद्विलिखेद्दर्मानीशाकोष्ठादिकं
क्रमात् ॥ अत्र क्रमपदेन दिग्गतकोष्ठानामपि ग्रहणं ॥ मातापितृकृतं नाम वेदमन्त्रपरिःकृतं ॥ सर्वकर्म्माणि यद्योग्यं शास्त्रत
मन्त्रदीक्षणे ॥ इति तु हरचक्रपरं ॥ चक्रान्तरे ॥ सुप्तोयेनप्रबुद्धस्त्वहस्यकेः ॥ नामार्णान्तु समारभ्य यावद्देवार्णगोचरं ॥ संपुटौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ता॰म॥ ग्रहणं कुर्यादथवा दीनं कदाचन ॥ धनं धान्यञ्च लाभञ्च नित्यं धनं चैव विह्वलं ॥ सन्तोषं सौख्यञ्च धर्म्मञ्च अरिमित्रञ्च कामदं ॥ भीषणा
॥१६८॥ च्छिन्नयेत्कोष्ठे हरचक्रमितीरितं ॥ अत्रापि दक्षिणाक्रमः इति हरचक्रं ॥ ॥ विजयमालिनीतन्त्रे ॥ अल्पदोषा बहुगुणा मन्त्रा
देया विचक्षणैः ॥ नक्षत्रमित्राद्यपेक्षा लिनवाः मित्रादिदूषणामिति तारा दक्षिणादिमन्त्रमधिकृत्य नीलतन्त्रादिवचनात्क
थङ्कान्यप्रयोगेष्वपि तद्विचारापेक्षा स्यादेवं ॥ नृसिंहार्क्कवराहाणां प्रासादप्रणवस्य च ॥ सपिण्डाक्षरमन्त्राणां सिद्धादीन्न विचा
रयेदित्यादि तन्त्रान्तरसंगृहीतमन्त्रप्रयोगेष्वपि कथमेतद्विचार इति चेन् ॥ नित्यानां त्रैपुराणाञ्च नावेक्ष्यास्त्वंशकादयः ॥ त
थाप्परोक्ष्यते किञ्चिदभिचारादिसिद्धये ॥ इति तन्त्रराजवचनाद्गृहाणा ॥ एवञ्च प्रयोगार्थिनां तारादिमन्त्रग्रहणेपि कोष्ठादिशो
धनमायाति ॥ तच्छोधननिषेधस्य च मोक्षार्थिमात्रपरतेति प्रतिभाति ॥ तन्त्रे ॥ सूर्योदयं समारभ्य घटिकोदशशः क्रमात् ॥
ऋतवः स्युर्वसन्ताद्या अहोरात्रं दिने दिने ॥ वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशैशिराः ॥ हेमन्तः शान्तिके प्रोक्तो वसन्तो वश्यकर्म्म
णि ॥ शिशिरः स्तम्भने ज्ञेयो विद्वेषे ग्रीष्म ईरितः ॥ प्रावृडुच्चाटने ज्ञेया शरन्मारणकर्म्मणि ॥ फेत्कारिणीतन्त्रे ॥ संलिखेत्स्त १७७
म्भने कुम्भे हर्य्यक्षे वृश्चिकोदये ॥ द्वेषोच्चाटादिकं चक्रे कुलीरे तु तुलोदये ॥ यमकन्याधनुर्म्मीने वश्यशान्तिकपौष्टिकं ॥ मार ॥राम॥
णाश्चाष्टमे राशौ रिपोश्चैवादिनिग्रहं ॥ हर्य्यक्षः नक्रो मकरः कुलीरः कर्क्कटः अजो मेषः यमो मिथुनः ॥ तथा ॥ वश्यं पूर्वे क्रिम ॥१६८॥
ध्याह्ने विद्वेषोच्चाटने लिखेत् ॥ शान्तिपुष्टी त्वहन्यन्ते सन्ध्याकाले तु मारणं ॥ अर्द्धरात्रे लिखेत्स्तम्भमाकृष्टिः प्राग्दिनोदयात् ॥ य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दन्यस्तोभनंकार्य्यंतस्मृत्नूषेलिखेद्बुधः॥ इन्द्रस्तंभनमुच्चाटमेग्नौसर्वाभिचारकं॥ यमेरक्षसिविद्वेषंशान्तिस्वरुणासोमयोः॥ कूलो
न्मादंमरुद्भागेयक्षेकलहविग्रहौ॥ कुर्वीतनोदिनेकर्म्मयद्धभंब्रह्मणापदे॥ वश्यणकूर्मस्यवनंभूर्जेलिखेदुच्चाटनंध्वजे॥ गर्द्दभ
त्वविविद्वेषंस्तंभनंगजवर्म्मणि॥ प्रेतचीरेस्मशानेखेज्वरनाशादिमारणं॥ विवादसैन्यस्तंभान्निशिलायामपिमोहनं॥ वश्य
कुंकुमकर्पूररोचनाभिर्हरिद्रया॥ यावेनस्तंभनाकृष्टिंलिखेच्चानामिकासृजा॥ विद्वेषंफेरुरक्तेनकाकरक्तेनमारणं॥ मो
हनंत्वकरक्तेनउच्चाटश्चोष्ट्रजासृजा॥ यावोऽलक्तकंअनामिकासृजाअनामिकाऽङ्गुलीरुधिरेणफेरुःशृगालः॥ तथा॥ व
श्यादौलेखनीदूर्वाकर्षणेशिखिपिच्छजा॥ विद्वेषोच्चाटनेकाकपक्षेणापिचमारणं॥ वश्याकर्षणस्तंभेरक्तकराग्निविवि
न्नयेत्॥ निर्विषीकरणेशान्तौपुष्टौवाप्यायनेसितं॥ पीतंस्तम्भनकार्य्येषुधूम्रमुच्चाटनेस्मरेत्॥ उन्मादेशक्रगोपाभंकृष्णं
मारणकर्म्मणि॥ सात्विकंमोक्षकामानांराजसंराज्यमिच्छतां॥ तामसंशत्रुनाशार्थेसर्वव्याधिनिवारणं॥ सर्वोपद्रवशान्त्य
र्थंतामसन्तुविचिन्तयेत्॥ कुलप्रकाशतन्त्रे॥ श्वेतद्रव्यैर्य्यजेच्छान्त्यामारक्तैर्वश्यकर्म्मणि॥ स्तम्भनेपीतवर्णैश्चधूम्रैर्विद्वेष
णेयजेत्॥ उच्चाटनेमारणेवकृष्णद्रव्यैःप्रपूजयेत्॥ आत्मानञ्चाहशैरेववस्त्रायैर्भूषयेत्तदा॥ रतिर्वाणीरमाज्येष्ठादुर्गाका
लीयथाक्रमात्॥ षट्कर्म्मदेवताःप्रोक्ताःकर्म्मादौताःप्रपूजयेत्॥ कान्यायनाभिवारेवदक्षिणाप्लवगामही॥ वसनंलोहितं
प्रोक्तमुष्णीषंलोहितंस्मृतं॥ सौम्येसुवर्णाद्वर्णायज्ञसूत्रमुदाहृतं॥ स्तंभविद्वेषयोःप्रोक्तंमार्ज्जाराचर्म्मसम्भवं॥ कुक्कुटाद्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

समुद्भूतं यज्ञसूत्रं मनीषिभिः ॥ उच्चाटनेव कान्ताराणात्तुपरीतमुदाहृतं ॥ उल्कात्तु समुद्भूतं यज्ञसूत्रन्तु मारणे ॥ वश्यश्यान्मोहविष्यंस्या
त्स्तंभने पायसं मतं ॥ विद्वेषे माषमुद्गाः स्युर्गोधूमा वासुदेवते ॥ श्यामाकान्नं मसूरान्नं शाल्यन्नं दुग्धपायसे ॥ मारणे भक्ष्यमेतत्स्या
दित्युक्तो भक्ष्यसंयमः ॥ पद्मासनं स्वस्तिकञ्च विकटं कुक्कुटन्तथा ॥ वज्रं भद्रकमित्याकूरासनानि मनीषिणः ॥ लक्षणामुक्तमत्रानरे
वामोरूपरि दक्षिणान्तु चरणं संस्थाप्य वामन्तथा याम्योरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढं ॥ अङ्गुष्ठौ हृदये निधाय चिबु
कं नासाग्रमालोकयेदेतद्व्याधिविघातकारि यमिनो पद्मासनं प्रोच्यते ॥ जानूर्वोरन्तरे सम्यक्कृत्वा पादतले उभे ॥ ऋजुकायस्स
मासीनः स्वस्तिकन्तदुदीरितं ॥ एकपादमथैकस्मिन् विन्यस्योरुणि संस्थितः ॥ इतरस्मिंस्तथा चोरुं विकटासनमीरितं ॥ पद्मासन
न्तु संयोज्य जानूर्वोरन्तरे करौ ॥ निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनं ॥ मेढ्रादुपरि विन्यस्य सव्यं गुल्फं तथोपरि ॥ गुल्फान्तर
ञ्च निःक्षिप्य वज्रासनमिहेरितं ॥ गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ॥ पार्श्वपादौ च पाणिभ्यां दृढं बध्वा सुनिश्चल ॥
भद्रासनं भवेदेतत्सर्वव्याधिविनाशनं ॥ आसनाधारमधुना वक्ष्येतन्त्रानुसारतः ॥ सर्वसिद्ध्यै द्वीपिचर्म्म ज्ञानसिद्ध्यै मृगाजिनं ॥ व
स्त्रासनं रोगहरं वेत्रजं श्रीविवर्द्धनं ॥ कौशेयं पौष्टिकं प्रोक्तं कम्बलं दुःखमोचनं ॥ अभिचारे कृष्णवर्णं रक्तं वश्यादिकर्म्मसु ॥ शान्ति
के धवलं प्रोक्तं चित्रकं सर्वकर्म्मसु ॥ स्तम्भने गजचर्म्म स्यान्मारणे माहिषन्तथा ॥ मेषीचर्म्म तथोच्चाटे खड्गिजं वश्यकर्म्मणि ॥ विद्वे
षे जाम्बुकं प्रोक्तं भवेद्व्याघ्रचर्म्म शान्तिके ॥ वशीकरणकर्म्म स्याद्देवतायतने शुभे ॥ शान्तिकर्म्म भवेद्गेहे श्मशाने क्रूरकर्म्म च ॥ अथवा स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्वकर्म्माणि भवेयुर्द्देवनाम्हे ॥ षण्मुद्राः क्रमतो ज्ञेयाः पद्मपाशगदाह्वयाः ॥ मुशलाशनिखड्गाख्याः शान्तिकादिषु दर्शयेत् ॥ हस्तौ तु
संमुखौ कृत्वा सन्नताकुञ्चिताङ्गुली ॥ तलान्तर्म्मिलिताङ्गुष्ठौ मुद्रैषा पद्मसंज्ञिका ॥ वाममुष्टिस्थतर्ज्जन्या दक्षमुष्टिस्थतर्ज्जनी ॥ सं
योज्याङ्गुष्ठकाग्राभ्यां तर्ज्जन्यग्रे मुकेक्षिपेत् ॥ एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्त्तिता ॥ अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथिता
ङ्गुली ॥ अंगुल्यौ मध्यमे भूयः सलग्ने सुप्रसारिते ॥ गदामुद्रेयमाख्याता विष्णोस्सन्तोषवर्द्धिनी ॥ मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योप
रि दक्षिणं ॥ कुर्य्यान्मुसलमुद्रेयं सर्वविघ्नविनाशिनी ॥ कनिष्ठाङ्गुष्ठसंयोगात् त्रिकोणाशनिसंज्ञिता ॥ कनिष्ठानामिके बध्वाङ्
गुष्ठेनैव दक्षतः ॥ शिष्टाङ्गुलीश्च प्रसृते संसृष्टे खड्गमुद्रिका ॥ चतुरस्रार्द्धचन्द्रश्च त्रिकोणश्च षडस्रकं ॥ वर्त्तुलश्च पृथिव्यादिम
ण्डलाकृतयः क्रमात् ॥ पीतश्वेततथारक्तकृष्णधूम्रमिति क्रमात् ॥ नाभौ स्मरेन्मण्डलन्तु वायोस्तद्बीजसंयुतं ॥ त्रिकोणं पिङ्गल
म्वह्निमण्डलं हृदि चिन्तयेत् ॥ चतुरस्रं भाले पीतं पृथिवीमण्डलं स्मरेत् ॥ अर्द्धचन्द्रं ललाटे तु श्वेतं पद्मद्वयाङ्कितं ॥ मस्तके धूम्र
वर्णाभं वर्त्तुलं व्योममण्डले ॥ स्वस्वबीजयुते ध्येयं चैतन्यं परिचिन्तयेत् ॥ जलं शान्तिविधौ शस्तं वश्ये वह्निरुदाहृतं ॥ स्तंभने पृ
थिवी शस्ता विद्वेषे व्योम कीर्त्तितं ॥ उच्चाटने स्मृतो वायुर्भूयोऽग्निर्म्मारणे मतः ॥ तत्तद्भूयोदयोदये सम्यक् तत्तन्मण्डलसंयुतं ॥
वर्णाभं वर्त्तुलं व्योममण्डले ॥ स्वस्वबीजयुते ध्येयं चैतन्यं परिचिन्तयेत् ॥ जलं शान्तिविधौ शस्तं वश्ये वह्निरुदाहृतं ॥ स्तंभने पृ
थिवी शस्ता विद्वेषे व्योम कीर्त्तितं ॥ उच्चाटने स्मृतो वायुर्भूयोऽग्निर्म्मारणे मतः ॥ तत्तद्भूयोदयोदये सम्यक् तत्तन्मण्डलसंयुतं ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना·म ॥
॥ १८० ॥

तत्रत्कर्मविधातव्यं मन्त्रिणानिशितात्मना ॥ दण्डाकारागतिर्भूमेः ऊर्द्धयोरुभयोरधः ॥ तोयस्य पावकस्योर्द्ध्वगतिस्तिर्यग्नभस्वतः ॥
गतिर्व्योम्नो भवेन्मध्ये भूतानामुदयः स्मृतः ॥ धरणोदये कुर्यात् स्तंभनं स्वस्य मालिने ॥ शान्तिकं पौष्टिकं कर्म तोयस्य समये वमोः ॥
मारणादीनि मरुतो विपक्षोच्चाटनादिकं ॥ छेदनादिनाशनं शस्त्रमुदये च विहायसः ॥ धरादिपञ्चभूतानि ह्रताद्याः कलाः स्मृताः ॥ निवृ
त्तिः स्वप्रतिष्ठा स्याद्विद्याशान्तिरनन्तरं ॥ शान्त्यतीतेति ताज्ञेयास्तद्भूत्यास्तत्र तत्रताः ॥ मन्त्राणां योजनं नाम्नः पल्लवः सम्प्रकथ्यते ॥ मा
रणोविषसंहारे ग्रहभूतविनिग्रहे ॥ उच्चाटने च विद्वेषे पल्लवः सम्प्रशस्यते ॥ नामान्ते मन्त्रसंस्थानं योग इत्यभिधीयते ॥ शान्तिके
पौष्टिके वश्ये प्रायश्चित्ते विशोधने ॥ मोहने दीपने योगं प्रयुञ्जन्ति मनीषिणः ॥ स्तंभनोच्चाटनोच्छेदविद्वेषेषु स उच्यते ॥ नाम्न आ
द्यन्तमध्येषु मन्त्रः स्याद्रोध इष्यते ॥ मन्त्राभिमुखकरणो सर्वव्याधिनिवारणो ॥ ज्वरग्रहविषाद्यार्त्तिशान्तिके रोध उच्यते ॥ सम्मोहने
सम्पुवाथ मन्त्रनामाक्षराणि च ॥ एकैकान्तरितं यत्तु ग्रथनं तत्प्रकीर्तयेत् ॥ तच्छान्तिके विधातव्यं नामाद्यन्ते यदा मनुः ॥ तत्सम्पुट
भवेत्तत्तु कीलने परिभाषितं ॥ स्तंभे मृत्युञ्जये दिव्ये रक्षादिष्वेव संपुटः ॥ मन्त्राक्षराण्यमेकैकं साध्यनामाक्षरं क्रमात् ॥ कथानेस
विदर्भः स्याद्वश्याकर्षणपौष्टिके ॥ वश्याकर्षणासन्नापञ्चरे स्वाहां प्रयोजयेत् ॥ क्रोधोपशमने शान्तौ प्रीतौ योज्यं नमो बुधैः ॥ वौषड्
सम्मोहयोद्दीपपुष्टिमृत्युञ्जयेषु च ॥ हुंकारं प्रीतिनाशे च छेदने मारणे तथा ॥ उच्चाटने च विद्वेषे वौषड्वाञ्छीकृते वषट् ॥ दशो
द्दीपनकार्ये च लाभालाभे वषट् स्मृतं ॥ मंत्रविद्याविभागेन द्विविधा मन्त्रजातयः ॥ मंत्राः पुंदेवता ज्ञेया विद्याः स्त्रीदेवताः पुनः ॥ स्त्री

179

॥ राम ॥
॥ १८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुंस्त्रीनपुंसकात्मानो मन्त्राः सर्वे समीरिताः ॥ पुंमन्त्रा हुंफडन्ताः स्युर्द्विठान्ताश्च स्त्रियो मताः ॥ नपुंसका नमोन्ताः स्युर्विभक्ता मनवस्त्रिधा
शस्तास्ते त्रिविधा मन्त्रा वश्यशान्त्याभिचारिके ॥ अग्नीषोमात्मका मन्त्रा विज्ञेयाः क्रूरसौम्ययोः ॥ कर्मणोर्वह्नितारान्ते वियत्प्रायास्स
मीरिताः ॥ आग्नेया मनवः सौम्या भूयिष्ठेन्दुमताक्षराः ॥ आग्नेयाः संप्रबुद्धाः स्युः प्राणो चरति दक्षिणे ॥ भागेन्यस्मिन् स्थिते प्राणे सौम्या
बोधं प्रयान्ति च ॥ नाडीद्वयगते प्राणे सर्वे बोधं प्रयान्ति वै ॥ प्रयच्छन्ति फलं सर्वे प्रबुद्धा मन्त्रिणां सदा ॥ शीतांशुसलिलक्षोणीव्योम
वायुहविर्भुजां ॥ वर्णास्युर्मन्त्रबीजानि षट्कर्मसु यथाक्रमं ॥ जपः स्यादक्षरावृत्तिस्तस्य भेदान् ब्रवीम्यहं ॥ जपः स्यात्त्रिविधः प्रोक्तो वा
चिको मानसस्तथा ॥ आद्यो ह्युपांशुरुच्चैश्च द्विविधः परिकीर्तितः ॥ द्वितीयोपि द्विधा प्रोक्तो जिह्वाचित्तप्रभेदतः ॥ यदुच्चनीचस्वरितैः
शब्दैः स्पष्टपदाक्षरैः ॥ मन्त्रमुच्चारयेद्वाचा स उक्तो वाचिको जपः ॥ शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयेत् ॥ किञ्चिच्छ्रवणयोग्यः
स्यादुपांशुस्स जपः स्मृतः ॥ जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैः ॥ धिया यदुच्चरेन्मन्त्रं स उक्तो मानसो जपः ॥ उच्चैर्जपादि
शिष्टं स्यादुपांशुर्दशभिर्गुणैः ॥ जिह्वाजपः शतगुणः सहस्रो मानसो जपः ॥ मानसः सिद्धिकामे स्यात् पुष्टिकामे रूपांशुकः ॥ वाचिको
मारणे चैव प्रशस्तो जप ईरितः ॥ तथा ॥ प्रणवाद्या मुक्तिकरी श्रीबीजाद्या धनागमे ॥ हृल्लेखाद्या महासिद्धिकरी सर्ववशङ्करी ॥ वा
ग्भवाद्या वरे विद्यां कामाद्या जनवश्यनी ॥ रुद्रयामले ॥ ऊर्द्ध्वदृष्टिर्जपेच्छान्त्यै अधोदृष्टिश्च मोहने ॥ समदृष्टिः स्तम्भने च पार्श्वतो द
र्शनक्रमात् ॥ विद्वेषे च समुच्चाटे मारणे सूर्यदर्शनः ॥ विद्यार्थं जलमध्यस्थो भानुमण्डलदर्शनात् ॥ भ्रूमध्ये दशनाद्देवि मोक्षमा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना॰ भ ॥ स्नेो शुभे विवले ॥ नामाग्रदर्शनो देवि सर्वत्र शुभकर्म्मणि ॥ तंत्रे ॥ नित्यजपङ्करे कुर्य्यान्नप्रयोगे कदाचन ॥ प्रयोगे विहितामालानन्तत्क
॥ १६१ ॥ र्म्मानुरूपतः ॥ तंत्रशेखरे ॥ वश्ये पद्माक्षमाला स्याच्छान्तौ शंखमयी भवेत् ॥ निम्बारिष्टाक्षिकालंभेद्वेषणे प्रेतदन्तजा ॥ अश्वदन्तोद्भवो
च्चाटे मारणे खरदन्तजा ॥ तंत्रे ॥ रुद्राक्षैर्विहितामाला सर्वकामप्रसाधनी ॥ निर्मिताश्वश्वमणिभिर्द्धनं कीर्त्तिं च यच्छति ॥ पद्माक्षा
पुष्टिलक्ष्मीदा शत्रुनाशकरी सदा ॥ पुत्रंजीवभवा पुत्रपशुधान्यसमृद्धिदा ॥ मुक्ताभीरचिता माला सौभाग्यं विपुलां श्रियं ॥ मंत्र
प्रत्यक्षतां सिद्धिं शान्तिकं चाथ पौष्टिकं ॥ मुक्तिश्च तनुते नन्दत्स्फाटिक्यप्यक्षमालिका ॥ सारस्वते पद्मरागा शुक्ले वर्द्धने तथा ॥ सौ
वर्ण्णी राजती माला सर्वान्कामान्प्रयच्छति ॥ सारस्वते प्रवालोत्था वश्येऽधिकधनागमे ॥ पापक्षयकरी कौशी रुद्राक्षादिकृशान्तकैः
सर्वैरेभिर्विरचिता माला स्यान्मुक्तये नृणां ॥ उच्चाटनेऽश्वदन्तानां माला प्रोक्ता च बालकैः ॥ खरदन्तैरधोदन्तैरधोदन्तैर्म्मनुष्यकाय
तन्तुना ॥ ग्रथिता निर्म्मिता माला शत्रुणां नाशिनी मता ॥ प्रेतदन्तैरधोभूतैः कर्त्तव्या जपमालिका ॥ साध्यदेहभवे केशैः प्रोतव्या
द्वेषकर्म्मणि ॥ शतं स्याथ तदर्द्धं वा सर्वसाधारणे जपे ॥ पञ्चाशद्भिः काम्यकर्म्मसिद्धिः स्यात्स्तुतु रुत्तरैः ॥ अष्टोत्तरशतैस्सर्व्वसि
द्धिस्स्यात्कामतस्सदा ॥ मोक्षार्थी पञ्चविंशत्या पञ्चदशाभिचारके ॥ मध्यमाङ्गुष्ठकाभ्यान्तु जपेदाकर्षणोत्तुहं ॥ अङ्गुष्ठतर्ज्जनीभ्या ॥ राम ॥
न्तु विद्वेषोच्चाटयोर्ज्जपेत् ॥ जपेज्ज्येष्ठकनिष्ठाभ्यां शत्रुमारणकर्म्मणि ॥ अङ्गुष्ठानामिकाभ्यान्तु जपेदन्येषु कर्म्मसु ॥ सूत्रं संपा ॥ १६१ ॥
दयेच्छिद्रान्मालाग्रहतहेतवे ॥ सितरक्तपीतमिश्रकृष्णाधूम्राः प्रकीर्त्तिताः ॥ वश्यतो मन्त्रतः प्रोक्ता देवताः षट्सु कर्म्मसु ॥ कृ

180

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चित्कल्पविशेषेणाप्रयोगे ध्यानमीरितं ॥ तत्सर्वं सम्यगालोच्य प्रयोगविधिमाचरेत् ॥ आकर्षणाम्वंश्यवत्स्याक्षुभं शान्तिवदीरि
तं ॥ उग्रं मारणावज्ञेयं कर्म्म सर्वत्र साधकैः ॥ होमप्रयोगे कुण्डानि तत्तत्कर्म्मानुरूपतः ॥ दर्शितानि त्रुधैस्तम्यगीर्य्यन्ते विधिवत्म
या ॥ सर्वसिद्धिकरं कुण्डं चतुरस्रं प्रदाहृतं ॥ पुत्रप्रदं योनिकुण्डमर्द्धेन्दुं च शुभप्रदं ॥ शत्रुक्षयकरं त्र्यस्रं वर्त्तुलं शान्तिकर्म्मणि ॥
छेदमारणयोः कुण्डं षडस्रं पद्मसंन्निभं ॥ वृष्टिदं रोगशमनं कुण्डमष्टास्रमीरितं ॥ कुण्डभेदप्रकारं मे च शृणु नयो यथा ॥ ऐन्द्यास्तं
भे चतुष्कोणामग्नौ योगे भगाकृति ॥ चन्द्रार्द्धं मारणे याम्ये त्र्यस्रं द्वेषेतु नैऋते ॥ वरुणां शान्तिके वृत्तं षडस्रं तूच्चाटने निले ॥ उदीच्यां
पौष्टिके पद्मं रौद्रामष्टास्रिशुक्तिदं ॥ पश्चात्त्रिकुण्डस्थांयत्र्यां भूतादिग्रहनिग्रहे ॥ अभिचारेपि शान्त्यर्थं मीशे सप्तास्रिविन्यसेत् ॥
शुक्लमृत्स्रोच्चया भूमिब्राह्मी सा परिकीर्त्तिता ॥ क्षत्रिया रक्तमृत्स्राबहिरि वैश्यापि कीर्त्तिता ॥ कृष्णवर्णा तथा शूद्रा भूमि रुक्ता मनी
षिभिः ॥ ब्राह्मी सर्वार्थसिद्धिः स्यात्क्षत्रिया राज्यदा मता ॥ धनधान्यकरी वैश्या शूद्रा तु निन्दिता वुधैः ॥ कुण्डमध्ये त्रिकोणान्तष्क
र्णिकायां लिखेद्बुधः ॥ शक्तिबीजश्च परितस्तन्मन्त्रार्णा मालिखेत् ॥ मूलमन्त्रस्य वर्णेन ग्रथितं स्याद्विदर्भितं ॥ संपुटं स्यात्तथा
मन्त्री तन्त्रत्कर्म्मानुरूपतः ॥ साध्यनामाक्षरं मन्त्री लिखेन्नियतमानसः ॥ अथोर्जिह्वास्तथाप्रोक्ता गुणाभेदेन कर्म्मसु ॥ हिर
णागगना रक्ता कृष्णा त्यास्य प्रभा मता ॥ वहुरूपा निरक्ता च सात्विकः शुभकर्म्मसु ॥ पद्मरागा सुवर्णा त्यात् नीया भद्रलोहि
ता ॥ रोहिता च ततः श्वेता धूमिनी च करालिका ॥ राजस्यो रसना वह्नेर्विहिता वश्यकर्म्मसु ॥ विश्वमूर्त्तिस्फुलिङ्गिन्यो धूम्रव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनोजवा ॥ लोहिताच करालाख्या कालीनामस्य हरिताः ॥ एतास्स प्रविनियुज्यन्ते क्रूरकर्म्मसु मन्त्रिभि ॥ अष्टाभिराज्याहुतिभिः
प्रणावेन पृथक्पृथक् ॥ गर्भाधानं पुंसवनं सीमन्तोन्नयनन्तथा ॥ अनन्तरं जातकर्म्मस्यान्नामकरणन्तथा ॥ वहिर्निः क्रमणं
पश्चादन्नप्राशनमीरितं ॥ चूडोपनयने भूयो महानाम्नां महाव्रतं ॥ ततोपनिषद यश्चाऽज्ञोदानो द्वाहको स्मृतिः ॥ शुभेषु स(
र्विवाहान्ताः क्रियास्याः क्रूरकर्म्मसु ॥ मरणान्तास्स मुद्दिष्टा वक्रेरागमवेदिभिः ॥ प्रोक्षणादीनि पात्राणि स्वर्णरूप्यमयानि(
च ॥ ताम्राणि शान्तिकादौ वश्येषणोच्चाटनादिषु ॥ वज्रवारकाश्मशोभां जनान्यनमकानितु ॥ श्रोत्रादिकल्पना वक्रेशख्याता
तन्त्रवेदिभिः ॥ सुखं मध्यशिरो दक्षे पादाकुन्तरदिग्गतौ ॥ इन्द्रेशयो मुखं शान्तौ दिक्षण्ये: काम्यकर्म्मणि ॥ रक्षसो मारणो वायो
राकर्षे मन्त्रमध्यतः ॥ रुद्रयामले ॥ होमे मुद्रात्रयं प्रोक्तं मृगी हंसी वशूकरी ॥ शूकरी करसङ्कोची मृगी मुक्तकनिष्ठिका ॥ हं
सी स्यात्तर्ज्जनी मुक्ता त्रिधा मुद्रा प्रकीर्त्तिता ॥ शान्तिके पौष्टिके चैव मारणोच्चाटने तथा ॥ विद्वेषे स्तंभने चैव वश्ये च परमेश्व
रि ॥ शान्तिके च मृगी ज्ञेया हंसी पौष्टिककर्म्मणि ॥ अभिचारे शूकरी स्याद्विद्वेषोच्चाटनादिषु ॥ होमाज्ञानिरूपणो ॥ नदेवाः प्र
तिगृह्णन्ति मुद्राहीनां तथाहुतिं ॥ मुद्राहीनन्तु यो मोहाज्जुमिछुति मन्दधीः ॥ यजमानन्तथात्मानं पातयेत्स्वनितं ॥ होम
श्चाग्निस्थितिं विज्ञाय कर्त्तव्यः ॥ ॥ अथ वक्ष्ये महादेवि होमकर्म्मसु सिद्धिदं ॥ अग्निचक्रं वरारोहे सर्वचक्रेषु गोपितं ॥ नव
ग्रहमयो वह्निस्तेवचक्रिमयाग्रहाः ॥ अतस्तेषां स्थितिं ज्ञात्वा वह्नौ होमं समाचरेत ॥ शान्तिके पौष्टिके वह्नौ क्रूरेष्वपि च कर्म्मसु

181

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नेषां स्थितिं क्रमं वक्ष्ये नक्षत्रेषु यथाविधि ॥ सूर्य्यो बुधो भृगुश्चैव शनिश्चन्द्रो महीसुतः ॥ जीवो राहुश्च केतुश्च नवैते देवि खेचराः
त्रीणि त्रीणि च ऋक्षाणि रविभादीनि दापयेत् ॥ सूर्य्यभाच्चन्द्रभं यावद्गणयेच्च महेश्वरि ॥ सूर्य्यादीनां फलं देवि शृणु वक्ष्ये यथा
क्रमं ॥ आदित्ये तु भवेच्छोको बुधे चैव धनागमः ॥ शुक्रे लाभं विजानीयाच्छनौ पीडा न संशयः ॥ चन्द्रे लाभो महादेवि भौमे चैव तु
बन्धनं ॥ गुरुणा च धनप्राप्ती राहौ हानिस्तथैव च ॥ केतुना जायते मृत्युः फलमेवं महेश्वरी ॥ एवं ज्ञात्वा महेशानि होमक
र्म्म समाचरेत् ॥ सौम्यग्रहमुखे यस्मिन् दिने विशन्ति चाहुतिः ॥ आरंभः सौम्यहोमस्य दिने तस्मिन् विधीयते ॥ क्रूरहोमस्त
था देवि क्रूरग्रहमुखे भवेत् ॥ इति ज्ञात्वा महेशानि काम्यहोमं समाचरेत् ॥ अन्यथा क्रियमाणे तु नैष्फल्यश्चात्मनाशनं ॥ ग
णेशादि मर्षिगणान्तु विशेषान्नरगुकं ॥ नवकोष्ठं समालिख्य पूर्वे शानैर्ऋतयोः क्रमात् ॥ वारुणे पश्चो वायुव सौम्यो दक्षिणोत्तरयोर्म
सेत् ॥ सूर्य्यादीन्मध्यकोष्ठे तु केतुं यस्य फलं दिशेत् ॥ आदित्ये च भवेच्छोको बुधे धनसमागमः ॥ शुक्रे स्थानेऽर्थलाभः स्याच्छनि
र्हानिकरो भवेत् ॥ चन्द्रे लाभं विजानीयाद्भौमे च वधबन्धनं ॥ गुरुः स्यादर्थलाभाय राहुर्हानिकरो मतः ॥ केतुना मृत्युमाप्नो
ति ह्यग्निवक्त्रे सदैव हि ॥ त्रयस्त्रयश्च गणयेत् सूर्य्यभादिनभावधि ॥ कुण्डे च स्थण्डिले चैव होतव्यं देशिकोत्तमैः ॥ नित्ये नैमित्ति
के दुर्गाहोमादौ न विचारयेत् ॥ ॥ ब्रह्मयामले ॥ अथ वह्नेः स्थितिं वक्ष्ये होमकर्म्मसुसिद्धये ॥ स्वर्गलोके च पाताले भूमौ नि
वसति हव्यवाट् ॥ तस्य प्रकारमहं वक्ष्ये साधकानां हिताय च ॥ धृतिश्च तिथिवारांश्च सप्तद्वीपश्च तु गणां ॥ एकीकृत्य हरेद्भाग

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ना॰ ग ॥ त्रिभिः शेषेणापावकः ॥ एकेन वसति स्वर्गे द्वये पाताल एव च ॥ भूलोके च मर्त्यलोके स्यादेवं वसति पावकः ॥ उत्तानः स्वर्गलोकस्थे पा
॥ १७३ ॥ तालस्थे धनक्षयः ॥ मर्त्यलोके स्थिते वह्नौ होमोऽभीष्टफलप्रदः ॥ इत्थं विज्ञाय मन्त्रज्ञो होमकर्म्म समाचरेत् ॥ तन्त्रे ॥ सौवर्णौ स्रुक्
स्रुवौ स्यातां सौम्यकर्म्मणि सर्वतः ॥ भवेतामायसावेतौ स्तम्भनादिषु कर्म्मसु ॥ लौकिकाग्नौ शान्तिकं स्याद् दुष्टं लौकिकपावके ॥ स्तं
भनाख्यं भवेत्कर्म्म वटजे जातवेदसि ॥ विद्वेषोक्षणे चैव ज्ञेयः श्मशानो बहुधेस्मृते ॥ उच्चाटमारणे प्रोक्ताः षट्कर्म्मज्वलना इमे ॥ व
श्ये दाडिमपुष्पाणि शान्तौ स्युर्दूर्वया सह ॥ समिधो गोघृतस्नाताः स्तम्भने राजवृक्षजाः ॥ मेषीघृतेन संयुक्ता द्वेषे क्षतरुजा मता ॥
उच्चाटने रसालोत्थाः कटुतैलेन संयुताः ॥ मारणे खादिराः प्रोक्ताः कटुतैलेन संयुताः ॥ होमद्रव्यमिदं प्रोक्तं षट्सु कर्मसु मन्त्रिभि
स्तथा ॥ घृतहोमे धनावाप्तिः क्षिप्रार्थैः कीर्त्तिरुत्तमा ॥ किंशुकैः सर्वकामाप्तिः फलहोमे सुखं भवेत् ॥ गुडेन प्रियता प्रोक्ता चंप
कैः पाटलैः रमा ॥ पत्रहोमे सुतावाप्तिः करवीरैः स्त्रियो वशाः ॥ आयुष्करी भवेद् दूर्वा गुडूची रोगशान्तिदा ॥ तिला अपि तथा प्रोक्ता
सौभाग्यं गन्धहोमतः ॥ श्रीफलैर्बिल्वपत्रैश्च तथा जलरुहैरपि ॥ राज्यभ्रष्टस्य राज्याप्तिर्मल्लिका कीर्त्तिदा मता ॥ कर्णिकारैः किं
शुकैश्च भवेयुर्विविधा वशाः ॥ काशमर्दैर्नृपा वश्याः कृतमालैर्विशो वशाः ॥ भूपाः स्युः पाटलैर्वश्या नीलपद्मैर्द्विजोत्तमा ॥ जातीपु ॥ राम ॥
ष्पैश्च वेश्यानां मधुरैरिष्टसंपदः ॥ अश्वत्थोदुम्बरप्लक्षसमिद्भिर्वाञ्छितान्वयः ॥ इष्टद्रव्यैर्भवेदिष्टं यवैश्चैव व्रीहिभिस्तथा ॥ मा ॥ १७३ ॥
षैरिष्टरागां मूकत्वं कोद्रवैर्व्याधिसंभवः ॥ कलायहोमतोऽरीणां भीतिः स्यान्महती ध्रुवं ॥ विभीतकसमिद्भिः स्यादुन्मत्तं द्विषतां

182.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हुलं ॥ शाल्मलेः समिधाग्राग्रोः पक्षान्नाशो भवेद्ध्रुवं ॥ फेत्कारिणी तन्त्रे ॥ अथ ड्वाणिं वक्ष्यामि तत्तत्कर्म्मानुरूपत ॥ शान्तिकेतुप
यः सर्पिस्तिलक्षीरद्रुमेधिकाः ॥ अमृतारग्वालतावैवपायसन्नत्र कीर्त्तितं ॥ पौष्टिके विल्वपत्रैश्च जातीपुष्पैर्नृपो भवेत् ॥ कन्या
र्थी जुहुयाद्वज्जैश्श्रीकामः कमलैस्तथा ॥ दध्ना च प्रियमाप्नोति अन्नैरन्नं घृतप्लुतैः ॥ क्षीरेणासर्प्पिषा वापि कमलैर्म्मधुराप्लुतैः ॥
समृद्धौ जुहुयान्मन्त्री महानैर्ईर्ष्यशान्तये ॥ लक्षहोमाद्भवेच्छान्तिर्घृतैर्विल्वतिलैर्निधिं ॥ आकर्षणे तु लवणांप्रियप्सु पुष्पैर्विल्व
कफलं ॥ जातीपलाशकुसुमैस्सर्वैरेकैकमेव वा ॥ राजीलवणकैर्वश्यं वश्यं स्यात्पौष्टिकोदितैः ॥ वश्यार्थी जातीकुसुमैरा
कृष्टौ करवीरजैः ॥ कर्प्पासवीजैस्तुक्ताक्तैर्न्नरकेशैस्तथापि वा ॥ एकीकृत्य हुनेन्मन्त्री शत्रुमारणकांक्षया ॥ जुहुयान्मार्षपै
स्तैलैरथवा शत्रुमारणे ॥ रोहीवीजैस्तिलापेतैरुच्छादे जुहुयान्नरः ॥ उपकण्ठकसंयुक्तैर्वीजैः कार्प्पासिकैरपि ॥ सर्षपैस्तिल
सम्मिश्रैर्हुनेत्सर्वाभिचारके ॥ काकोलूकच्छदैः क्रूरैकारस्करविभीतकैः ॥ मरीचैस्सर्षपैः भुण्डैरर्क्कक्षीरैः कटुत्रयैः ॥ कटुतैलै
:स्नुहीक्षीरैः कुर्यान्मारणकर्म्मणि ॥ शत्रुनाशकरहोमे अग्नेष्करणादौ होमाच्छत्रोः करणादिनाशः ॥ तदुक्तं ॥ वह्नेः शिरसि ना
सायां श्रोत्रे पुच्छेषु वा तथा ॥ जुहुयाच्चेत्तदाक्षिप्रं तत्तदङ्गानि नाशयेत् ॥ अग्नेष्करणादिलक्षणन्तु पूर्वमेवोक्तं ॥ तथा ॥ आ
युष्कामो घृतनिलैर्दूर्वाभिश्चाम्रपल्लवैः ॥ पयोक्तैराम्रपत्रैश्च ज्वरं सद्यो विनाशयेत् ॥ गुडूचीमृत्युञ्जयनेन तथा शान्तौ गजाश्व
